CC0. In Public Domain, Digitizagtion by eGangotri

DES. CAT. NO. .... SERIAL NO. .... Not catalogued Sr. No. 31	RECORD NO. .... R. III
ACC NO. 11939	SCRIPT Devanāgarī
AUTHOR Jayadeva	MATERIAL Paper
TITLE Gītagovinda गीतगोविन्द ।	NO. OF FOLIOS ...... PAGES 126 } P 126 (b) blank
WITH OR WITH[redacted] COMMENTARY Govindagītavivṛttiḥ By. Vanamālī	COMPLETE / INCOMPLETE C
SUBJECT Kāvya	COLOPHON / REMARKS इति श्रीमत्कृष्णचन्द्र... [illegible] ... श्रीगीतगोविन्दटीकायां ... [illegible] ... सर्गः । [illegible]
LANGUAGE Sanskrit	LOCATION VAIDIKA SAMSHODHANA MANDALA, PUNE

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



Dr. Urmila Sharma Collection

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी० ॥श्रीगणेशाय नमः॥ श्रीवासुदेवाय नमः॥ श्रीराधावर गिरिधरचंद्रो जयति॥ ॥स्थिराणां जंगमानां च येन
॥१॥ सृष्टिर्निरूपिता॥ सर्वेशाय नमस्तस्मै कृष्णाय जगदात्मने॥१॥ भूयात् भद्राय परं वो दृशः कमललोचनः॥
कालिंदीकेलिसंहृष्टो मे परस्य मौलिसुंदरः॥२॥ लीलाद्यनादसंसिद्धो गिरिचंद्रविहारिणः॥ जयदेव द्विजश्चाराच
तुरेषु प्रकाशिताः॥३॥ श्रीमद्गिरिवराधीशवृंदारण्यपुरंदरं॥ कृष्णचंद्रं प्रपद्येऽहं मत्कार्यानुग्रहकारकं॥४॥ श्रीकृष्ण
देवकरुणा प्रतिलब्धविद्यः॥ श्रीविट्ठलेशारूपय सकिशोरभक्तिः॥ गोविंदगीतविवृतिं वनमालिनामा भद्रस्तनोति
सुकृती शिवदाससूनुः॥५॥ टीकाशतं कविवरैः सकलं मयैव स्तिमेतदपि नो विपुलः प्रयासः॥ एकाधिपेस्तु
दितेप्यथ किमरीरो नो पश्यते भवनकोणगतो निवृत्यै॥६॥ सर्वस्नेहरसांबुधिप्रमथनप्रोद्भूतलीलारुतिः॥ श्रीराधा
मललोचनाप्रसमरप्रत्यंगगौरच्छटा॥ सर्वानंदरसैकसारसुलसंपन्नांबुदाडंबरः कृष्णश्चांबुजलोचनस्तदुभयं वर्वर्ति
सर्वोपरि॥७॥ राधाविशाखाललिताजयंती विजया जया॥ सुसुखी सुभगा चेति राधा सख्यः प्रकीर्तिताः॥८॥ ग्रंथादौ म
हाकवि नृपचक्रचूडामणिः श्रीजयदेवः स्वगानसर्वस्वसारं निखिलं प्रारंभनिर्विघ्नसमाप्तिकारणं श्रीराधावरनिरूपणं वी
जं वस्तु महामंगलमाचरति॥ मेघैरिति॥ श्रीवृषभानुजासहचरी श्रीराधानाम्नीवल्लभा मित्या ... नेति॥ ॥७॥ ॥१॥

हे राधे नंदस्त्वं दत्तात्कां क्षितसाधिके॥ यमुनाकूलेकलिंदतनयातटे नन्देराज्ञो राधामाधवयोः चैत्रदेशा रहःकेलयः क्रीडा
प्रकारा यत्र जयंति तद्रहो गृहमेकांतकुंजकेलिमंदिरं॥ रहःकामिनां विनोदस्थानं रागिणां वा संतं॥ इमं अंश्री सूक्ष्मं॥
५ माश्चर्या माः किशोरीस्त्वमेव तु युग नसापयेत्यन्वयः॥ शृंगारेनायिकायाः प्राधान्यं चैत्रदेशा च योरित्यनेन वसंतः का
मिनी केलिपु दृत्यर्थलक्षितः॥ कीदृश्यः केलयः॥ वनभुवः॥ वृंदावनभूसंबंधिन्यः॥ कीदृशयोः॥ नंदनिदेशतः॥ नंदस्याज्ञयं
त्याः देवतोनिकटतोनंदनीयापालाघनीया निदेशतः संदेशतो वा अधन्ये ध्वनि प्रस्यासन्नायकं कुंजद्रुमास्तान् प्रतिचलितयोः प्र

मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय॥ इत्थं नंदनिदेशत
श्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः॥१॥ ॥७॥ ॥७॥

कुटिलसोभागयोः॥ कीदृशं श्यामकं श्रेष्ठं॥ पुनः कीदृशं भीरुत्वं॥ श्रीकृष्णं कामय नानारूप योगः मां नेवे गोपत्र॥ पुनः कीदृशं॥
मेघैर्जलदैर्मेघसदृशैर्गाढांधकारैर्वा तमालद्रुमैः श्यामवृक्षैश्चमेदुरं स्निग्धं॥ श्रीकृष्णविशेषणानि च॥ कीदृशं अंबरं नवी
नरसभोकारं॥ कीदृशं॥ मेघैस्तमालद्रुमैश्च मेदुरं स्निग्धं नीरदपुंजश्यामलांगं॥ भीरुत्वं॥ भीरूणामभिसारिकाणां रयो
राभस्यं स्मितमात्रेण यस्मात्॥ अथ श्रीराधामाधवयोः रहःकेलयः॥ अभिसारोत्सवकारिण्य एकांतक्रीडाः॥ जयंति॥ सर्वो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्षणवर्त्तनादिति॥ नंदयतिहर्षयतीतिनंदः॥ सुरतारंभः तस्य निदेशः॥ आरणादिति केचन॥ यत्तु नंदाज्ञाभिसारव्याख्यानं तत्
दत्यंतमनौचित्यादुपेक्ष्यं॥ कीदृशे॥ अंधकारव्याप्ते प्रत्यासन्नायं कुंजादु मोऽश्यतानुग्रतिइह्वं च लिताये॥ इ उत्थं कथमि
ति॥ मेघैर्मेदुरं स्निग्धं अंबरं॥ नमाल द्रुमैश्यामं वनभुवः श्यामास्तस्मादिमं गृहं त्वमेव प्रापय॥ तत्राप्ययं नक्तं रात्रौ भीरुः भयशी
लः॥ ननु सर्वत्र तिमिरपुंजे कुंजे कथं वृजामीति मंयोक्तिः॥ किन्तु इमम्यतो व्रजतदप्रत्यंगो च्छलितानंतगौरच्छटाभिर्विधुतां
धलमसेमार्गेइयामोप्ययं सुखं व्रजेदिति भावः॥ इत्थं क्षणे अभूतेत्यनेन कर्मप्रवचनीयत्वयोगे द्वितीया॥ श्यामाइति गौरवत्वो
रीति द्धलुवचनं॥ नक्तं रात्रौ व्रतेचेतिदेशोव निकटात्ययौस्त्रिलोचनः॥ भीरुः स्यातु कातरे कुसिफामयानपियोषितिइति महोदधिः॥
श्यामः स्यात् प्रसूतास्त्री॥ श्यामाभिउश्यावर्णिकीत्यपि॥ वरः श्रेष्ठेन वरसा स्यादिदे कपरिनेनरीतिमादवः॥ भूः प्रकारे तु सन्नायः
धरण्यां संभेपचिंवतिमेदिनीकरः॥ अकारो ब्रह्मविष्णुरीशमान्यादि अनेकार्थः॥ राधावेशाखमासे स्याद्राधा गोप्यां
वेलिविश्वः॥ वृशाखमाधवोराधइत्यमरः॥१॥ ननु जपदेव स्यपुरुषत्वाद्गोप्यकेलिकथनेकथमधिकार इत्या शिप्य स्वस्त
स्यलंनिराकुर्वन् अभिसारस्वं प्रबंधं स्वयोदि निरूपणे नैव विस्तारयति॥ श्रीराधानुग्रहं च प्रार्थयेत॥ वाग्देवेतेति॥ ॥
२

अपः श्रीकृष्णः देवोचसत्ससएव कविः काव्यकर्त्ता एतं प्रबंधं करोतीत्यन्वयः॥ प्रबंध चिह्नं भोजे॥ श्रृंगारैकप्रधानो योगी
तृजालादिसंकुलः॥ अभिसारार्थनिपुणः प्रबंधः संप्रकीर्तितः॥ प्रकर्षेणा बंधोन्योन्यौ सोक्तिसक्तिरूपो नः यक्रनायिकयोः
यत्र प्रबंधः॥ कीदृशं॥ श्रीः श्रृंगाररसो भासंपत्तिः स्तुतिनः कांतिरूपा राधादेवात्र प्रसूता॥ तत्रोक्तं श्रीभागवते॥ यउत्तरा
ननयत्कोशात्वानुदिवं॥ चौरुद्धिलः स्वर्गे स्वायते॥ थोतलइति द्यौः वैकुंठस्तद्वत्रापि श्रीराधेवत्तानव्या॥ वसुषु अष्टसु

॥ वाग्देवताचरित चित्रित चित्तसद्मा पद्मावती चरण चारण चक्रवर्त्ती॥ श्रीवासुदेवरतिके
लिकथा समेतमेतं करोति जयदेवकविः प्रबंधं॥२॥

दीव्यतीति वसुदेवो नंदोवः वासुदेवस्तया राधया सहितो वासुदेवस्तस्य याः॥ रतिकेलयः स्नेह क्रीडा प्रकारास्तासां याः कथा
श्चतुः षष्टिबंधात्मिकास्ताभिः समेतं युक्तं॥ कीदृशः जः वाग्देवता श्रीरुक्मस्तस्य चरितं रासात्मिका लीलावैदग्ध्यं वा नयानेन
वा चित्रितं मंडितं को मोहाधकप्रकारान्वितं वा चित्तमंतःकरणमेवसद्म गृहं यस्य सः तत्रोक्तं श्रीभागवते॥ सावाग्यया तस्यगुणा
न्गृणीतइत्यनेनान्यत्र वाग्देवत्वं निरस्तं॥ महिमपि विविधोपकरणे श्चित्रितं भवति तद्वत्रापि भगवद्गुणचित्रैरलंक्रियते॥ प्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेत्रामात्रेणप वित्रीकृतं वर्धमानस्नेहेन लिखितं विविधकेलि प्रदर्शनेन तथा चित्रित मितिभावः॥ कीदृशः॥ पद्मावती नामस्व स्यप्रमदाद्यैः कामैः यस्यास्तस्या चरणे नृत्यनिपुणतारूपनर्तनं चक्रवर्ती नृपराजो नटराजो वा सदा शृंगारित्वात् एतेन कवेः शृंगारित्वमुक्तं॥ पद्मानिक्रिडार्थं यत्र सा पद्मावती॥ अथवा सौभाग्यद्योतकं सामुद्रिकशास्त्रोक्तं पद्मं हस्तेयस्याः सा पद्मावती श्रीराधा तस्याश्चरणयोः श्चारणं सेवकस्तथा आत्मनिवेदनं तत्र चक्रः॥ सेवकसमूहस्तद्वर्त्तिलं शीलं यस्य सः॥ उक्तंच ॥ शृंगारी चेत्कविः काव्ये तदा रसमयं जगत्॥ स एव चेदशृंगारी तदा विरसतां व्रजेदिति श्लेषोक्तिरलंकारः॥ आलेख्याश्चर्ययोश्चित्रमित्यमरः॥ कविः काव्यकरे शूरे चेति विश्वः॥ चक्रः कोके व्रजे पुंसि क्लिबे सैन्यरथांगयोरित्यपि॥ गृहं गेहोद वसितं वेश्मसद्म निकेतनमित्यमरः॥ सद्मापद्मेत्यादिवं धानुप्रासार्थमितिद्विक्वामइत्येकाक्षरे॥२॥ ॥७॥ ॥

३

एवं तावद्विघ्नजनप्रशस्यर्थमन्यकाव्यापेक्षया स्वकाव्योत्कर्षं प्रथयन् गीतगोविंदश्रवणे श्रोतृगणं प्रोत्साहयति॥ यदीति हे ॥ सुन्यप्रदाः॥ यदि हरिस्मरणे श्रीकृष्णस्मरणे मनश्चित्तं॥ सरसं भगवत्प्रणययुक्तरसः शृंगारः रसः रसेन सहितं वा साभिलाषं वा तदा जयदेवसरस्वतीं गीतगोविंदरूपां वाचं शृणुतेत्यन्वयः॥ मनस्तालुकर्त्तुमभिवांछा तदात्यादेरणः शृणु

यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं॥
मधुरकोमलकांतपदावलीं शृणु तदा जयदेवसरस्वतीं॥३॥

तधारयति॥ तद्धारणमेव तेन देवकरिष्यतीति भावः॥ किंच यदि वस्त्रीणां प्रतिनिधिं केशाद्यधोगस्य श्री श्वरणा द्वंचरतिदु तिकारोक्तः॥ तस्य कलासु तलुः षष्ठि क्रीडासु कुतूहलं कौतुकं विलासलक्षणं रतिकोषोक्तं ग्रंथविस्तरभयान्नलिखि तं॥ कीदृशीं॥ मधुरामिष्टां श्रीराधाशृंगारप्राधान्यात्॥ कोमलां मृदुलां प्राणयपूर्वकं श्रीकृष्णवचनसंयुक्तत्वात्॥ कां ताकमनीया स्निग्धसहचर्यादिवचनयुक्तत्वात्॥ तस्याः सानामापदावलींपरं परायस्यां सा॥ कर्मधारयः समासः॥ मधुरेय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

था॥ मधुरत्वं नवाचिवस्तु॥ न्यपि रसस्थितिः॥ येन माद्यंति धीमंतः मधुनेव मधुव्रताः इति॥ सुकुमारं यथा॥ सुप्रयोगे
में हत्वकैर्युक्तमस्पष्टसंदिभिः॥ सुकुमाराक्षरसंयुक्तं सुकुमारं प्रचक्षते॥ कांतं यथा॥ यन्मनः श्रोत्रविशदं प्रल्हादजनकं भवे
त्॥ शब्दार्थानुयोगेन कांतमभिवक्षणा इत्यपि तत्त्वं मन्यकर्त्ता कांत्यैस धारणं अतस्तासा धारणं॥ राधाकृष्णदूती नामि
तत्सखी॥ अतो जयदेव सरस्वतीं सर्वश्रेष्ठं श्रृणुतेति भावः॥ कलास्तात् क्रीडनः दिष्विति विग्रः॥ दीपकाख्यमलंकारः॥
तल्लक्षणं त्रिष्वेव योऽधेप्रस्तुतो विन संवर्धिपद्भ्यैः सहसंगतिः॥ दधानं दीपः॥ त्यर्थात् दीपकं तदुदाहृतं॥ एवमेतेः शब्दै
विषयप्रयोजनसंबंधाधिकारिणोदर्शिताः॥ तत्र रहः केलयः इति विषयः॥ यमुनाकूल इत्यधिकरणं॥ राधामाधवयो
रितिवसंतकालसमयः॥ सद्गीते रितिप्रयोजनं॥ प्रतिपादकप्रतिपाद्यरूपः संबंधः॥ श्रीराधाकृष्णरसभाविनांतः
करणवाधिकारी॥ एवं सर्वाणि क्रीडारसाधनानि निरूपितानि॥ ३॥ ॥७॥

४

इदानीं स्वसरस्वतीप्रामाण्योत्कर्षाय केनचिद्भगवता नमेन कविराजसभायां वर्णितं पद्यं संगृह्यते कविना॥ नन्वेतन्नानागु
णसंयुक्तापि सरस्वती लक्ष्मणसेन महानृपतिवरसभायामुमापतिधरादिनां कवीनामप्यस्तिसा किं न श्रोतृणां श्रवणरति
जनकेत्याह॥ वाच इति॥ उमापतिधरसंज्ञः लक्ष्मणसेनमंत्री वाचः वाणीः पल्लवयति विस्तारयति॥ तथा तस्यापि काव्यं

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते॥ श्रृंगा
रोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः॥ ६॥

ग्यार्थैश्चन्यं शब्दविचित्रार्थगुणश्चान्यधर्मं च नरसह्य तु रसदयाह्लाद जनकमिति भावः॥ तथा च राजसभायां शरण इति
नामा कश्चित्कविर्दुरूहस्य गूढार्थस्य द्रुतेः शीघ्रधारणतः श्लाघ्यः स्तुत्यः॥ तथा चास्य कवेः काव्यं गूढार्थत्वादिदोषसहितं
प्रसादाद्यनुग्रह रहितं चेति॥ अत एव न विद्वज्जनमनोरंजनकमिति ध्वनितं॥ तथा च श्रृंगारोत्तरस्य सत्प्रमेयस्य श्रृं

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

गाररसे रएव उत्तरः श्रेष्ठः यत्र शृंगारे गोत्तरं मुख्यं अ सत्त्रमेय मुत्तमं ॥ वस्तुनस्य रचनैः कविताया मुख्यप्रकथने शचार्य गोवर्द्धना
चार्येण सदृस्यर्धाः वान्नकोपि विश्रुतः ॥ न विख्यातः ॥ शृंगाररस मुख्य रचनायां भवतस्य प्रोढ्यं रसांतर सांतर कथने सोप्य समर्थ
एव ॥ अतस्तत्कवि दिनं सज्जलं दुग्गम कं इति भावः ॥ आचार्य पदमुपहासार्थं ॥ धोयी नाम कविः क्ष्मापतिः कविराजः श्रुति
धरः ॥ श्रवणमात्रग्राही श्रुतार्थधरो वा ॥ ननु तस्य कविर चनायांस्व कोशलं ॥ उच्चारित मात्र ग्राहक इति भावः ॥ क्ष्मापतिग्रा
ह्लादकः शदिकथनायशः जोपमानानुकविगणना तस्येत्यर्थः ॥ गिरां वचसां संदर्भ शुद्धिं गुणालंकारादि ग्रथन विशेषं जय
देवकविरेव जानीते नान्यः कश्चित्कविः ॥ अतएव जयदेवकृतगीतगोविंदकाव्यश्रवणे संतोषस्तथा नान्यत्र काव्ये ॥ अतएवेदं
श्रोतव्यमिति भावः ॥ पल्लवः किशलये पिंगे विटपे विस्तरे चलेइति विश्वप्रकाशः ॥ लघु क्षिप्रमरं द्रुतमित्यमरः ॥ उत्तरं प्रति
वाक्ये स्यादूर्ध्वदिक्ष्वेः त्तमनन्यवदिति च ॥ उदात्तनामायमलंकारः ॥ तल्लक्षणं त्रिशुबोधे ॥ उच्चैः समृद्धि वद्वस्तुवर्णनं स्यादु
दात्तता ॥ सा मेथ्र्थे जायते ॥ यत्र चरमोत्कर्ष विश्रिनाः इति ॥ ४ ॥ ॥ ७ ॥

५

एवं तावच्चतुर्भिः श्लोकैः कारोथ माधवयोः रहः केलयस्ताएव श्री कृष्णचंद्र संभोगपुष्ट्यर्थं भगवल्लीलाः विलासानां प्रनां प्रताप
सोभाग्यादिनां च श्रीकृष्णचंद्राधीनत्वं वदन्दशावतार प्रसत्तेव श्री कृष्णचंद्र नायक चूडामणित्वं च संयोगरसपुष्ट्यर्थं विप्र
योगरसमाह ॥ प्रलयेत्यादिना ॥ यथा संयोगरसपुष्ट्यर्थं विप्रयोगनिरूपणं ॥ कालायितेहि वस्त्रादौ भूयानुरागो हि जा
यते ॥ गीतस्यास्य गौडमालवरागः सूयकतालः ॥ ध्रुवपदं च ॥ गीतलक्षणं ॥ स्वरतालग्रामभेदरागरागांगभूषितं ॥ संस्कृतं
प्राकृतं वा यद्गीतं गीतविदो विदुरिति ॥ रागलक्षणं ॥ नितंबिनी चुंबितवक्त्रपद्मः शुकद्युतिः कुंडलवानुप्रमत्तः ॥ संकेतशालां प्र

गौड मालवरागे ॥ रूपकताले ॥ प्रलयपयोधिजले ॥ धृतवानसि वेदं ॥
विहित वहित्रचरित्रमखेदं ॥ केशव धृतमीनशरीर ॥ जय जगदीश हरे ॥ १ ॥

विशन्प्रदोषे मालाधरो मालवरागराजः ॥ तालक्षणं ॥ रूपके स्याद् द्रुतं लघुरिति संगीतरत्नाकरः ॥ षोडशध्रुवकाः तल्लक्ष
णं ग्रंथविस्तारभयान्न लिखितं ॥ पदस्य पुनः पुनरावृत्तिर्ध्रुवपदं हे केशव सुखशायिनु प्रशस्तानि कुरु इति वा ॥ हे धृतमीनशरी
र ॥ धृतं मीनस्य शरीरमिव शरीरं येन धृतमीनबंध इत्यर्थः ॥ स च विपरीतरतं भवति ॥ न त्वस्वरूपं ॥ प्रसार्य हस्तचरणौ पुमान्य
त्रांगना यते ॥ नायकामुपरि स्थाप्य मीनबंधः प्रकीर्तितः ॥ किं च मीनो हि रसवेदी मकरकेतनस्तोषप्रेमनिबोहकश्च ॥ मंगल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यश्च तदुक्तमपि धृतमीनवंधरूपमंगलं॥ हे देव क्रीडाकर्त्तः हे हरे भक्तजनसंतापहारिन्॥ सर्वमंगलं हरिर्नु वासु वलिकामला
पतः शनइ तिवा॥ जय जय इति दिप्सया॥ अतिशयेन सर्वोत्कर्षेण वर्त्तस्व वर्त्तस्व॥ नयजय जगदीशइति वः पवः॥ गच्छती
तिनानाशृंगाररसमायद्वेत्तनुजनयुवतिवृंदं तस्येशनायकचूडामणे॥ प्रथमं मीनवंधकेलिमाह॥ प्रलयेति॥ प्रकर्षे
ण मनसः लयस्तदाकारता यत्र सुरते प्रलयः॥ स यथा॥ सुरते च समाधौ च मनो यत्र न लीयते॥ किं तेन सुरतेनाथो॥ किं ते
न च समाधिनेति॥ तत्र नेदं श्रमजनितपयोधौ यज्जलं तस्मिन्॥ यद्वा स्यात्मन शास्त्रप्रतिपाद्यः॥ मीनवंधादि कुत्
लं पेयेते शायते रतिकोषोक्तकरास्परशादिलीलाभा॥ अखेदं यथा स्यात्तथा धृतवानसित्वं योषित्यामसीत्यर्थः॥ कीदृशं वेदं॥
विहितं वहि त्रस्यपोतस्य च रित्रं केलिजलधिपारप्रापकं रसं येन॥ एतेन नायकचूडामणित्वं सूचितं॥ प्रक्षेमीनस्यं
स्ते॥ प्रलयकालीनायेपयोधये जलधय स्तेषां जलमज्जंतं वेदं मीनशरीरं लीलया धृतमादाय च न तु कर्मवशेन अखेदं
यथा स्यात्तथा धृतवानसित्वं॥ अल्पजलनिवासान्मत्स्या भोक्तुः सुतरां जलधौ॥ तथा च श्रुतिः॥ यो ब्रह्माणं विदधाति पूर्वं यो
वेदांश्च प्रहिणोति तस्मै तमेवात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति॥ कब्रह्मा वई शाः शिवश्च तेनावासो स च केश
मो यस्येति हे केशव॥ धृतं मीनशरीरं येन तत्संबोधनं जय सर्वोत्कर्षेण वर्त्तस्व॥ ननु सर्वोत्कर्षवृत्ते किं सामर्थ्यं नत्राह॥ हे ज
गतां चतुर्दशभुवनानां ईश नियंतः हे हरे हरति भक्तानां क्लेशं भजनानुसारेण तिलथा॥ तदुक्तं श्रीभागवते हृद्यंतःस्थो ह्यभद्राणि

कच्छपसदृशं तं वंधांतरमाह॥ क्षितिरिति॥ हे धृतकच्छपरूप स्त्रीरताकच्छपवंधः॥ तल्लक्षणं॥ हस्तौ पादौ च संकोच्य कां [illegible] नासु
परि गच्छति॥ स्थापयेत्सुरते यत्र कच्छपः संप्रकीर्त्तितः॥ तव पृष्ठविभागे॥ क्षितिर्वृंदावन निकुंजभूमिस्तिष्ठतियत्तदन्वयः
कीदृशे पृष्ठे॥ अतिविपुलतरे अतिशयेन विपुलयति विशेषण महत्वं रसस्य प्राप्नोति तिलधा॥ पुलमहत्वे धातुः॥ अनेन नायक
स्य श्रांतो हृदनतत्वं सूचितं॥ कीदृशे धरणिधरणकिणचक्रगरिष्ठे॥ पूर्वोक्तवंधधारणेन किणं कुंकुमादि चिन्हं मच्चक्रं च शालति

क्षितिरति विपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे॥ केशव धृतकच्छपरूप जय जगदीश हरे॥२॥

कंकणं तेन गरिष्ठे श्रा घगौरवे न श्वेइत्यर्थः॥ अन्यच्चिरत्नमचिन्हमव्रणमेवान्यच्चिन्हं पुनस्त्वच्छरीररत्नं प्रियानखचिन्हित
तमप्यमूल्यमिति॥ श्रीराधे किरत्रसर्वत्र त्रेया॥ तद्यथा॥ सर्वस्यापि हिरत्नस्य व्रणेर्थः परिहीयते॥ दूषितोधररत्नं व्रणि
तं यात्यनर्घ्यतां इति॥ निष्ठती निष्फलपर्यंतकार्यनिर्वाहकतया स्थिरता लक्षणो नायकगुणः उक्तः॥ क्षितिः सह नगरीलेस्यादि
सीर्णे च धरा स्वपि इति मेदोदधिः॥ पृष्ठं तु पृष्ठदेशे स्यात्पृष्ठं स्यात्सिविलात्रः पद्मिनि मेदिनीकरः॥२॥ ॥पक्षे कच्छपरूपं स्तौति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे धृतकच्छपरूप ॥ धृतं कलितं कच्छपस्य रूपं येन तादृश ॥ जय जय स्वोत्कर्षमाविःकुरु आविःकुरु ॥ ननु निंद्यं कच्छपस्य रूपं मया कस्य हेतोर्धृतमित्यत आह ॥ क्षितिरिति ॥ तव पृष्ठे क्षितिः पृथिवी तिष्ठति ॥ कच्छपपृष्ठमस्यंतं कठिनतरं क्षोण्या धारणं च जात्य नुकरणार्थमिति भावः ॥ ननु पंचाशत्कोटि योजन विस्तीर्णां पृथिवीमम पृष्ठे कथं स्थितेत्यत आह ॥ अति विपुलतर इति ॥ अतिशयेन धरापेक्षयाप्यधिकविस्तीर्णे ॥ पुनः कीदृशे ॥ धरणिधरणकिणचक्रगरिष्ठे ॥ धरण्या धरायाः धरणेन च ज्जातं किणचक्रं रक्ताद्युलिमृतरुधिरमंडलं तेन गरिष्ठे गौरवयुक्ते ॥ एतेन पीनरसं गौरवं चोक्तं ॥ किणस्वात्मनरुकेइतिवि श्वप्रकाशः ॥ व्रणचिन्हं व्रणकिणाविनिहारावली ॥ कर्मः कमठकच्छपावित्यमरः ॥ चक्रं चक्रेथ निर्दिष्टं रथचक्रे रिचक्रेपी ति वैजयंती ॥ यथा रतिचक्रे प्रवृत्तस्यैव शशांकनवक्रमइति ॥ धरा धरणीत्यमरः ॥ कच्छपः कमठप्रोक्तः स्वाहुधेपिरितिप्रिये रिति भोजे ॥ विस्तीर्णे विपुलः प्रोक्तो विपुलतर प्रदेश्चैविलिको शममुच्चये ॥ २ ॥ ॥ ८ ॥

एवंविधात्मिकरुलिमुदितं नदंगसौंदर्यं वर्णयन्नाह ॥ वसतीति ॥ हे धृतशूकररूप ॥ शूकरोति सूकरोति कदानीति शूकरः ॥ अनुमानं ॥ कंदर्पणनं ॥ तथात्वं तस्यैवोच्यते ॥ उक्तं च ॥ कामिनीनयनैककज्जलपंकादुच्छितो मदनमत्तवराहः ॥ कामि मानस वनांतरचारीकंदर्पलणतिमानलशायाइति ॥ तव दशनशिखरे धरणी लग्ना तिष्ठतीत्यन्वयः ॥ धनेपसंप्रेयसीवा धरणी तच्छी लासात वदशनशिखरे दंताग्रे दशनक्षतिविधानेच वसति ॥ कस्मिन्केव ॥ शशिनि परमानंदजनके चंद्रेनिमग्ना कलंककले खेव ॥ सा यथा विद्यमानापि न शोभातिरस्करणीति ॥ एतेनायकस्य रुणप्रकर्षो दक्षितः ॥ पक्षेवाराचैहोनारमाह सैलित्व
वसति दशनशिखरे धरणी तव लग्ना ॥ शशिनि कलंककलेव निमग्ना ॥ केशव धृतशूकररूप जय जगदीश हरे ॥ ३ ॥

हे धृतशूकररूप धृतं शूकररूपे स्वयेन जयजय वाराहप्रयोजनमाह ॥ वसतीत्यादि ॥ तव दशनशिखरे दंतस्याग्रे लग्ना सक्ता धरणी वसुंधरा वसति ॥ अत्र निम ग्नापदोपदानेन बालचंद्रस्य सादृश्यं दशनेकार्यते ॥ अनेनाव्यासेन दंष्ट्रया धरणुधरणेन बलानिशय निरूपणेन महासत्वलालक्षणो नायक गुणउक्तः ॥ शेषं समानं ॥ रदना दशना दंता इत्यमरः ॥ कला स्याद्शमात्रे कइतिहलायुधः ॥ अग्रं शिखरमित्सांकुरदृशृंगेचेतिधरणिः ॥ शूकरः शूकरे प्रोक्तस्तनुकारिणि वसुनिद तिभोजे उल्लेक्षागर्भितोयमलंकारः ॥ ३ ॥ ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कोकशास्त्रप्रदर्शितां नखक्षतादिरूपां लीलां चतुरा नायिका प्रकारांतरेणाह ॥ तवेति ॥ क्रीडायां प्रवर्तमानस्याग्र
पश्चाद्वा येना स्ति नखवज्रसन्न्यसत्वात् ॥ नखक्षतनिर्दयत्वकथनाय रतिसमये नृसिंहरूपत्वं तव करकमलवरे
नखहस्तकमलवरे श्रेष्ठे नखमस्ति ॥ कीदृशं ॥ अद्भुतमाश्चर्यजनकमग्रभागो यस्य तत्तथा ॥ रक्तत्वकथनेन कंजसाम्यं ॥
पुनः कीदृशं ॥ दलितहिरण्यकशिपुतनुभृंगं दलितो विदारितो हिरण्यकशिपोः स्वर्णशय्यायां तनुरेव भृंगो यत्र तत् ॥
अन्यत्र भ्रमरेण कमलं विदार्यते ॥ अत्र तु स एव दलितः इत्यनेन शृंगाररसपूर्तिरूक्तभावः ॥ केशवेत्यादि पूर्ववत् ॥ पक्षेन

तव करकमलवरे नखमद्भुतशृंगं ॥ दलितहिरण्यकशिपुतनुभृंगं ॥ केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥

रहरिरूपं स्तौति ॥ हे धृतनरहरिरूप धृतं नरहरिरूपं येन तत्संबोधनं ॥ जय जय ॥ श्रीनृसिंहावतारप्रयोजनमाह तवेति ॥
तव करकमलवरे करोहस्तः स एव कमलवरः कमलश्रेष्ठस्तत्र नखं तिष्ठति ॥ दलितो विदारितो हिरण्यकशिपोर्दैत्य
स्य तनुर्देहः स एव भृंगो भ्रमरो येन तादृशं ॥ अन्यत्र कमले तन्मकरंदपानादिना भृंगानां तृप्तिर्भवति ॥ इह तु नहरिकर
कमलाग्रभागेन भृंग एव विदारित इति तद्वदद्भुतत्वं ॥ नरहरिरूपेत्यनेनालिविरूद्धशौर्यबलातिशयेन नायकेऽसाहसिकत्वा
तिशयगुणः सूचितः ॥ मागिस्येति शिखरे शृंगे ॥ भृंगनांग विषण केपीति वैजयंती ॥ पुनर्भवः कररुहो नखोऽस्त्री समरः ॥ शृंग
प्रसुत्वे शिखरे चिन्हे क्रीडायां तु जइति विश्वप्रकाशः ॥ ननु कायेरतो बाल्ये परिलेख्यापि यान्यवत् ॥ द्विरेफः पुष्पमधुलिङ्स्त्र ८

अलिंगनरूपां क्रीडामाह ॥ छलयसीति ॥ हे धृतवामनरूप वामनरूपधारिन् ॥ अलिंगनादि भिमोनादि नायकः स वाम
नः ॥ तत्संबोधनं ॥ तेन मानेन त्वं विक्रमणे सुरते विक्रमे सुरतपराक्रमइत्यर्थः ॥ बलिं त्रिवलिं छलयसि वंचयसि ॥ विपरीतविभा
नेन जात्या न्नमयसीति सूचितं ॥ हे अद्भुत वामपदनखेति संबोधनं ॥ विपरीतसुरते तत्र पदनखं पदनखस्तलेन तूक्षालनं
चयन्तीः रंते नजनितं जनस्येनं दनस्य पावनं चित्तप्रसादः ॥ येनन तस्संबुधिः चित्तप्रसादकारिन् ॥ एतेन नायिको त्कर्षः पावन
लंचना पकस्योक्तं ॥ ननु नखदानं कर नखेनैव जन्यते न पदनखेनेति ॥ सत्समेत तु विपरीतरतेः नायिकापदनखक्षताभि

छलयसि विक्रमणे बलिमद्भुतवामन ॥ पदनखनीरजनितजनपावन ॥ केशव धृतवामनरूप जय जगदीश हरे ॥ ५ ॥

प्रायेण ज्ञातव्यं ॥ पक्षे वामनरूपं स्तौति ॥ हे धृतवामनरूपेति अद्भुताश्चर्यस्त्वं वामन ॥ अद्भुतमदृष्टपूर्वं दैत्यानां दर्पीना
शयतीति वामन ॥ अद्भुतत्वमेवाह ॥ पदनखेति ॥ पदनखसंबं धीयतीः रंगंगा जलं तेन जनितं जनानां याविज्यं येन ता
दृश ॥ जयेत्यादि पूर्ववत् ॥ वामनावतारप्रयोजनमाह ॥ छलयसीति ॥ विक्रमणे पराक्रमे बलिं दैत्यं छलयसि वंचयसि ॥
श्रीकृष्णः वामनरूपं विधाय बलेः पदत्रयमितां भूमीं याचयित्वा पश्चात् बृहद्रूपं धृत्वा टीरस्य बलि मधः क्षिप्ता चतुर्दश
भुवनानि गृहीतवानिति पुराणप्रसिद्धः ॥ छलयसीत्यनेन नायकस्य अनुनयचातुरी सूचितेति भावः ॥ चलिवित्यानसु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिदुःसहता जो यशमनीं क्रीडामाह॥ क्षत्रियेति॥ ... विभूतिरसमितिभृगवोरसिकाः रसिकानां पतिः प्रभुः प्र शस्तो भृगुपतिरूपः प्रशंसार्थरूप॥ रसिकचूडामणे॥ जयजगदिपदं पूर्ववत्॥ क्षत्रियरुधिरसहशेपयसि स्नपयसि॥ स्त्रीका लौहित्यत्वक्रीडायां कुंकुमकर्मिरितां गच्छतीतिजगत्॥ नायिकासमूहस्तं पयसि स्नानं कारयसीत्यन्वयः॥ कीदृशं जगत्॥ व्रजयुवतिवृंदं अपगतपापं स्नानमात्रेणनष्टसंसारकलुषं॥ पुनः कीदृशं जगत् युवतिवृंदं शमितभवतापं॥ शमितः शांति प्रापितः भवस्य कामस्य चिरहोत्पन्नो तापो येन॥ भवश्च कामवाचकः॥ भीमाभीमसेनइतिवत्॥ पक्षे परशुरामावतारं स्तौः

क्षत्रियरुधिरमये जगदपगतपापं॥ स्नपयसि पयसि शमितभवतापं॥ केशव धृतभृगुपतिरूप जयजगदीश हरे॥६॥

ति॥ हे धृतभृगुपतिरूप॥ धृतं भृगुपतेः परशुरामस्य रूपं येन तादृशः॥ जयइत्यादिपूर्ववत्॥ परशुरामावतारप्रयोजनमा ह॥ क्षत्रियाणां रुधिराणि चुराणि यत्र पयसि कुरुक्षेत्राख्यतीर्थवरजले जगत् प्राणिजातं अपगतपापं नष्टपातकं यथा भवति तथा स्नपयसि स्नानं कारयसि॥ कीदृशं जगत्॥ शमितभवतापं शमितो नाशितो भवस्य संसारस्य तापो यत्र तादृशं॥ अनेन तेजस्विता लक्षणो नायकगुण उक्तः॥ रुधिरोगारके प्रोक्तो रुधिरं कुंकुमासृजोरितिविश्वः॥ पयः स्यात् क्षीरनीरयो रित्यपि॥ भवः संसारतापे स्यात् तथा शंकरजन्मनितिधरणिः॥ भवो जन्मनि च प्रोक्तो भवः कामो प्रकीर्त्यतइतिमेदिनीकरः

॥६॥ ॥६॥ ॥

सुप्रसन्नात्मिकां क्रीडामाह॰ वितरसीति॥ हे धृतरघुपतिरूप जय॥ राघव एव रूपं तेन पतयः तेषां पतिः श्रेष्ठस्तत्संबुद्धिः॥ एतेनव हुयुवतिष्वासक्तिनिर्वारिता॥ दिक्षु निविहारदिशासु रणे स्मरसंग्रामे दशानां मुखोदशप्रकारो मैलिः केशयाशस्तेनबलिं पूजां वि तरसि विस्तारयसि॥ यद्वा दशा सुखाय कामाय मौलिना किरीटरत्नेन बलिं पूजां वितरसि दद्सि इतिकेचित्॥ कीदृशं दिक्पतिक मनीयं दिशां पतयः इंद्रायेदस्तेषां कमनीयं मनोहरं तद्भीष्टं वा तद्गोचरमितिवा॥ पुनः किंभूतं रमणीयं रतिजनकं॥ शेषं पूर्ववत्

वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयं॥ केशव धृतरघुपतिरूप जयजगदीश हरे॥७॥ ॥७॥ ॥

पक्षे रामावतारं स्तौति हे धृतरघुपतिरूप जय॥ श्रीरामपुरुषार्थमाह॥ वितरसीति॥ रणे संग्रामे दिक्षु आशासु दशमुख स्य रावणस्य ये मौलयो मस्तकानि किरीटानि वा॥ तान्येव बलिं उपहारं वितरसि ददासि॥ कीदृशं॥ दिक्पतिकमनीयं॥ दि शां ये पतयः इंद्रादयस्तेषां कमनीयं अभीष्टं॥ तत्रेहतुः रमणीयं मनोहरं॥ अनेन दिक्पालकांक्षितेन राव णवधेन गां भीर्यलक्षणो नायकगुणः उक्तः॥ किरीटरत्नमूर्द्धसु मौलिः केशवसंयतेः करोपहारयोः पुंसि बलिः प्राण्यंगजो स्त्रियामिसम

रः॥७॥ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंरतिन्दिहारगर्विलंप्रत्याह॥ वहसीति॥ हे धृतहलधररूप॥ हलविलेखणे धातुः॥ हलनं हलः विलिखनं तत्खक्षला धरक्षत
रूपं रतोधरक्षेत्रइतिहलधरः तस्य तत्संबुद्धिः॥ धृतनाना रूपाधरक्षतश्च दरूपं॥ त्वं विशदे निर्मले वपुषि शरीरे वसनं वस्त्रं
वहसिस्वांगः सुंदरस्यवसनधारणं नारमते धारयसीत्युक्तं॥ कीदृशं॥ जलदाभं जलदानां नीलमेघवृंदानां शोभा यस्मा

वहसिवपुषिविशदेवसनंजलदाभंहलहतिभीतिमिलितय
मुनाभं॥ केशवधृतहलधररूपजयजगदीशहरे॥८॥ ॥

त्तत्॥ जलदस्याभिप्रायो यं॥ जलदो यथा सजीवनं ददाति अजीवनं करोति तथा त्वमपि वेदोक्तं हिला विहारं कुरु नहि
वेदोक्तमर्यादापालनेन त्वदीय सः साधयितुं शक्यः॥ पुनः कीदृशं॥ हलहतभीतिमिलितयमुनाभं॥ हलेन यद्धननं तस्य
भीत्या तद्भयेन मिलिता या यमुना तस्याभेवाभादीप्तिर्यस्य तत्॥ हलहतीति पाठे स एवार्थः॥ हलधरपदेन वीररस लक्षि १०

८

तः सूचितः। नायकगुणउक्तः॥ पक्षे॥ हलधरावतारं स्तौति॥ वहसीति॥ हे धृतहलधररूप॥ धृतं हलधरस्य रूपं येन तादृश
जयजय॥ बलदेवस्य लीलामाह॥ वहसीति विशदे कर्पूरगौरे वपुषि शरीरे जलदाभं सजलनीलमेघस्निग्धमेचकं व
सनं वस्त्रं वहसि धारयसीत्यन्वयः॥ हलहतीत्यादि पूर्ववत्॥ भीरुणां हि के पउचित एवेति भावः॥ कदाचित् श्रीवृंदाव
नेवारुणीं पीत्वा व्रजांगनाभिः सह विहरता बलभद्रेण यमुना जलकेल्यर्थमाकारिता मत्तो यं॥ श्रीकृष्णज्येष्ठो वा इ
ति मत्वा तत्किं नायातीं रुष्ट्वा क्रोधेन हलाग्रेण कृष्टवानिति पुराणश्रुतेः हलधरशब्देन दुष्टनाशेन साधुरक्षणार्थे
हलधृतवानसीति सूचितं॥ गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह इत्यमरः॥ शुक्लः शुभ्रः शुचिः श्वेत विशदः श्वेतपांडु
रा इत्यमरः॥ विशदं निर्मलं प्रोक्तं विशदं कनकप्रभे॥ विशदं प्रकटार्थे पि विशदं विमलान्वयः इति केशवः चूडामणिः॥ व
स्त्रमाच्छादनं वासश्चैलं वसनमित्यमरः॥ कर्षके स्याद्धलधरः प्रलंबघ्ने बलेऽरसि॥ विकर्षणे स्मरस्तेजस्तारुण्यपिवि
कर्षणं इति भोजः॥ उत्प्रेक्षापूर्वकोयमलंकारः॥ गीतिः हाव्यसर्कपये विनितिश्पः॥ ८॥ ॥७॥

CC0. In Public Domain, Digitizagtion by eGangotri

वेदोक्तमर्यादामहंस्थापयिहंरिति पूर्वोक्तंतद्दावरंतंप्र स्याह॥ निंदसीति॥ हे धृतबुधशरीर॥ बुधज्ञानंश्रीवृषभा
नुजाः स्वरूपा यत्रं धृतंस्वरूपं येन नतादृश जय॥ जगदीशेत्यादिपूर्ववत्॥ हे सदयहृदय यज्ञविधेः॥ केसरध्वज यज्ञविधेः
॥ अहहेति खेदे॥ श्रुतिजातंनत्वा दृक्मर्यादाभागं निंदसि मर्यादाभूतं भागं न मन्यसे न वेदस्त्वं नियामक इत्यर्थः
॥ उक्तंच॥ रतिचक्रे प्रवृत्तस्य नैव शास्त्रं न च क्रमः इति भोजो॥ कीदृशं॥ दर्शितः पशुघातो येन॥ पशुबुधावतारे त्वा

निंदसियज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं॥ केशव धृतबुधशरीर जय जगदीश हरे॥९॥

ति॥ हे धृतबुधशरीर॥ धृतं बुधस्य शरीरं येन त्वं जय॥ ननु बुधावतारे वेदनिंदकस्य बुधस्य मम कथमतिश्ला
घाप्रसंगः क्रियत इत्यत आह॥ निंदसीति त्वं यज्ञविधेः यज्ञविधानस्य प्रवर्तकं श्रुतिजातं श्रुतिविभागं निंदसि
ननु सर्वमित्यर्थः॥ एतदधर्माविर्भावात्॥ यदा यदा हि धर्मस्येति वचनात्॥ किमर्थं सोपि निंदत इत्यत आह॥ दर्शि
तेति॥ अहहेति॥ कथं दर्शिता बोधितः पशूनां घातो येन तथाभूतं॥ वेदोपि पशूनां घातं प्रथयति कथं तं निंदसी ११

ति भावः॥ तथा निंदायां कारणमाह॥ सदयेति॥ दयाकृपा तत्सहितं हृदयं यस्य तादृशा संबोधनं॥ यद्वा सदयहृदयः
ब्राह्मणास्तेषां दर्शितः पशुघातो हननं येन॥ कथं निंदसि गवादिपशुघातं धिगिति॥ तथा बौद्धसूत्रे॥ अहिंसा पर
मः धर्म इति॥ अयमर्थः॥ रागपरतः दुःस्वानुविलोक्येत्यं श्रीयो मीयं पशुमालभेतेत्यादि स्वर्गादिफलविधिवाक्यैः प्ररोच
नया तान् गुडलुब्धकवत्॥ प्रवृत्तस्य पश्चात्तिरपराधवधसाध्यं न तु नाप्राणिवधं स्वर्गादिफलं अनवरतं विचार्य पर
मपुरुषार्थे श्रीकृष्णभजनेन तान् प्रवर्तयितुमहिंसा स्यात् सर्वभूतानीत्यादिना पशवो धकस्य वेदस्य निंदां करोषि
ननु सर्वथा वेदनिंदायां प्रवर्तत इति तात्पर्यं राधांतमसात्वादुरात्मानां वेदमार्गे श्रीकृष्णभजने च तेषां मोह
नाय तवावतारप्रयोजनमिति जगदीशादिपदं पूर्ववत्॥ बुधशरीरे त्वनेन दयालक्षणो नायकगुणः॥ वेदश्रवसि
च श्रुतिरित्यमरः॥ जातं जातौ घजन्मसु इति विश्वः॥९॥ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१२ पूर्वोक्तं विहारं प्रस्ताह॥ म्लेच्छेति॥ धृतकल्किशरीर॥ धृतं सापराधं शरीरं येन तादृश हे जय॥ शेषं समानं॥ त्वं म्लेच्छ
निवहनिधने करवालं कलयसि॥ म्लेच्छ अव्यक्ते शब्दे॥ म्लेच्छस्य व्यक्तजनस्य निवहः समूहस्तस्य निधने विरामे
खड्गं खड्गपत्तिकरालं तीक्ष्णं नखं कलयसि दधासि॥ पक्षे कल्क्यवतारं स्तौति॥ हे धृतकल्किशरीर॥ धृतं कल्कि

के म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालं॥ केशव धृतकल्किशरीर जय जगदीश हरे॥
॥१०॥

नः शरीरं येन तत्संबुद्धिः॥ त्वं जय जय॥ जगदीश हरे इति पदं सर्वत्र योज्यं॥ ननु पूर्वं मम सदयत्वं कथितं तत्॥ द्विपरीतं
प्राणिवधे प्रवर्त्तस्येत्यत आह॥ म्लेच्छेति॥ म्लेच्छसमूहमारणार्थं किमपि करालमति भयंकरं करवालं खड्गं कलयसि
धारयसि॥ एतेन धर्मसंरक्षणे परिपालनेन दयत्वं लक्षणेन नः चकगुणउक्तः॥ कमिव धूमकेतुमिव॥ औत्पातिकग्रह १२

मिव॥ औत्पातिकमुदितं ग्रहं यथा म्लेच्छानां नाशो भवतीति करवालस्य धूमकेतुसाम्यं॥ औत्पातिकग्रहे उदिते प्राणि
नां दुःखस्यादितिभावः॥ यद्वा धूमः केतुश्चिह्नं यस्य स धूमकेतुर्वह्निस्तमिव॥ स्फुरन्त्यतीलत्वात् धूमसादृश्यं मुष्टेश्च
कनकमयत्वादग्निसाम्यं॥ म्लेच्छनिवहनिधन इति निमित्ते सप्तमी॥ चर्मणि द्वीपिनं हंतीतिवत्॥ म्लेच्छः पापरतो जाति
भेदे स्यादल्पभाषिणि॥ हर्षापहारकेचैव स्वआचारोज्झितेपि चेति कोशचूडामणिः॥ कल्कीतु सापराधः स्यात्कल्की
विष्णुर्मलान्वितेइतिभोजे॥ धूमकेतुः स्मृतोवह्नावुत्पातग्रहयोरपीति विश्वः॥ समूह निवह व्यूहइत्यमरः॥ निधनं
स्यात्कुलेनाश इति विश्वप्रकाशः॥ खड्गे तु खड्गनिस्त्रिंश चंद्रहासास्यरिष्टयः॥ कौक्षेयको मंडलाग्रः करवालः कृपा
ण इत्यमरः॥ करालो भीषणे न्यवदित्यचयस्तूयमाले कार॥१०॥ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१२ सर्वनीलाकर्तारं पूर्णश्रीकृष्णं स्तौति॥ श्री त्ति॥ हे रसिक॥ श्रीजयदेवकवेः इदं गीतं उदितं स्वलः प्रे
मणा स्फुटीभूतं॥ शृणु॥ कीदृशं॥ उदारं महत्तरसमयत्वात्॥ अथवा॥ उदारं अतिरमणीयं श्रीराधाकृष्ण
केलिनिरूपणत्वात् पुनः कीदृशं॥ सुखदं सकलानंदपूर्णत्वात्॥ पुनः कीदृशं॥ शुभदं॥ अथवा शुभं
ददातियः श्रीकृष्णस्तत्प्रदं भवसारं भवे सारं सारभूतं॥ यद्वा॥ भवो मनोभवः कामस्तस्य सारं॥ शृंगार
रसपूर्णं॥ यद्वा भवत्यस्मादिति विश्वं भवः श्रीकृष्णस्तस्यासारं सारभूतसुरतविस्तारकं॥ हे धृतदशवि

श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भवसारं॥ केशव धृतदशविधरूप जय जगदी
श हरे॥११॥ ७॥

धरूप॥ धृतानि दशविधानि दशप्रकाराणि मीनवंधादि शरीराणि येन तादृश जय जय॥ पक्षे कृष्णद
शावतारं श्रीकृष्णं स्तौति॥ हे धृतदशविधरूप॥ धृतानि दशविधानि दशप्रकाराणि मीनाद्यावताररू
पाणि येन तादृश त्वं जय जय॥ अथवा॥ दशविधेरवतारैः रूप्यत इति॥ शेषं समानं॥ उदारं सुंदरं प्रो १३

पूर्वं कथितं लीलासमूहं श्रीकृष्णचंद्रं विषयं प्रथयन् प्रणमति॥ वेदानित्यादिना॥ श्रीकृष्णाय दशाकृतिकृते तुभ्यं नमः इत्य
न्वयः॥ पूर्वोक्ता दशविधा दशप्रकारा मीनवंधादिलीलानुकृतिं करोतीति न सैव दशाकृतिकृत्॥ कृष्णायेति पूर्णाय नराकृ
तिपरब्रह्मणे वा॥ उक्तं च॥ कृषिर्भूवाचकः॥ शब्दो णश्च निर्वृतिवाचकः॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते इति॥ किंभू
ताय॥ वेदानुद्धरते वेदा अपि दशाकृतिकृत्स्वोक्तकवंधादिनु ये लोकेषु विस्तारयते॥ अन्यथा वा त्वया पन शास्त्रं निःफलमेवात्र
स्यात्॥ पुनः कीदृशाय॥ जगद्धुवतिसमूहं निवहते विगलतापं कुर्वते॥ पुनः कीदृशाय पमचलीति भूः कामस्तस्य गोलः

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते॥ पौलस्त्यं जयते हलं कलयते का
रुण्यमातन्वते म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥ ५॥ ७॥

समूहस्तं बिभ्रते धारयते रासे व्रजवधूमंडलं
वा॥ रासलीलाप्रतिबंधकत्वसमीपमागतं शंखचूडाख्यं दैत्यं दारयते विदारयते॥ अनेन रसे कृष्णप्राधान्यमुक्तं॥ पुनः कीदृ
शाय॥ बलिं त्रिवलिं छलयते व्रजयुवतीनां कामजनितनखक्षतादिप्रदानेन वंचयते॥ पुनः कीदृशाय॥ क्षत्रं क्षयं कु
र्वते॥ क्षत्रशब्देन असहचारितो वीररसो लक्ष्यते॥ तस्य क्षत्रस्य क्षयं विनाशं कुर्वते॥ एतेन सुरतेश्वरत्वं ध्वन्यते॥ पुनः की
दृशाय॥ पौलस्त्यं जयते॥ पुल महत्वे धातुः पुलनं पुलः महत्वं तस्य समूहो पौलं॥ तस्य समूह इत्यण॥ पौलं स्याय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येतसहतेभवत्यस्मिन्निति पोलस्यात्र आनंदः॥ स्पन्द्येद्राहं संचाल येरिति धातुस्तमपि जयति अन्यत्कुर्वते॥
हलंकलयते॥ हलविलेषणे धातुः॥ हलनंदः विलेषणं नखपणं नखक्षतादि तत्कुर्वते॥ कारुण्यमातन्वेत॥ सद्
केकुरूपा विस्तारयते॥ स्ऊ भमप्लकनः पणं ल्कज अव्यक्त ज्ञे धातुः॥ अव्यक्तान् स्वाससीत्कारान् मूर्छयते॥ मूर्छा
मोह समुछ्रायपयोः इति धातुः॥ पक्षे श्रीकृष्णरूतां बंधादिलीलां स्मृत्वा अंतः करणं चिदानंदरूपे परिपूर्णविग्र
हं श्रीकृष्णचंद्र गीतार्थश्लोकसंग्रहेण स्तौति गोपदत्तिन्यादिना॥ कृष्णायनरायेति परब्रह्मणे तुभ्यं नमः॥ मम स्फोरा
स्तु॥ ननु मीनाद्यवतारेण तस्यपूर्णं स्वस्कृतिः॥ स्तोत्रैदानीं नंदगोपबालकं मां कथं स्तौषीत्यत आह॥ द्वशाकृतिकेत
॥ अतःकृतिः कथितारूपे सा मान्यवपुषो रीतिकिम्बः॥ मीनादिदशांशरूपकर्त्री॥ अंशतावतारवानीश्वर स्त्वमेवेत्यर्थः॥
ननुकुतोत्मीश्वरः कुतोम मां शादेतत्राह॥ पूर्णत्वात्॥ उक्तं च श्रीभागवते॥ अन्ये चांश कलाः पुंसः कृष्णस्तु भग
वान्स्वयमिति किंच कृपिभिर्वाचकइति॥ ननु पूर्णश्चेद्धेतुसिलामीनादयः किमितिसीरलाःइत्यानायेनवतार
प्रयोजनमाह॥ वेदानुद्धरते॥ वेदोधरणं कुर्वते मीनशरीरेण॥ पुनः कीदृशाय जगन्निवहते॥ भुवनं धारयते कच्छ
पदेहेन॥ पुनः कीदृशाय इति पदं सर्वत्र योज्यं॥ भूगोलधरा मंडलं उद्बिभ्रते ऊर्ध्वमापयते शूकररूपेण॥ दैत्यं हिर
ण्यकशिपुं दारयते विदारयते नृसिंहरूपेण नखैः॥ बलिदैत्यं छलयते प्रवंचयते वामनावतारेण॥ क्षत्रं क्षयं कुर्वते॥ दुष्ट
क्षत्रियाणां विनाशं कुर्वते परशुरामरूपेण॥ पौलस्त्यं रावणं जयते श्रीरामरूपेण॥ हलं कलयते दुष्टनाशाय हलं धार

एवं पूर्वोक्तिकेलिश्रलापवर्णने नदशाकृतिकृतेत्यत्रा येतियत्प्रोक्तं तदेव गोप्यंतरक्रीडाकथनेन दर्शितं॥ इदानीं सकलनायक
चूडामणेः श्रीकृष्णचंद्रस्य समस्तनायककलाविशेषानुवर्णयितुमपि व्रजवध्वः स्वस्वस्थके लिकारयितुं श्रीकृष्णं नायकगुण
कंदवत्वेन स्तुवंतीति मंगलातरं श्रितकमलेति गीतं नदर्शयति॥ गीतस्यास्य गुर्जरीरागः॥ रागलक्षणं॥ श्यामासुकेशी मल
यद्रुमाणां मृदुलसत्सल्लवतल्पयाना॥ श्रुतेः स्वराणां दधती विभागं तंत्री सुखादक्षिण गुर्जरीयमिति ग्रंथवाहुल्यभयात्तल्ल
क्षणं नोक्तं॥ गीतस्यास्यार्थः॥ हेदेवकंदर्पं घोतक॥ हे हरसक लजनमनोहर॥ जयजयसर्वकेत्वमर्थं नायकोत्कर्षमाविःकुरु आविः

गुर्जरीरागेपरिमंठताले॥ श्रितकमलाकुचमंडलधृतकुंडलए॥ कलितललितवनमालजय जयदेवहरे॥ १॥ ७॥ री

कुरु आदरे द्विर्वचनं॥ ध्रुवपदं॥ नायकगुणानाह॥ श्रितेति॥ पुनः कीदृश॥ हे श्रितकमलाकुचमंडल॥ श्रिता आश्रिता स्वसौभा
ग्यसौंदर्यमाधुर्यातिशयार्थं वरस्त्री लक्ष्मीर्वा यासा श्रितकमला वरस्त्री श्रीराधा तस्याः कुचमंडलौ श्रितो यो मंडलस मयकु
चप्रदेशो येन तत्संबुधिः॥ श्रितं राधयाकुचमंडलमस्येति वा गौरपीनस्निग्धवर्तुलत्वात्॥ तत्सौभाग्यशोभाप्रास्त्यर्थं यं लक्ष्मीर्वर
स्त्री॥ श्रवसेवतइति भावः॥ अनेनालौकिकावरनायकगुण उक्तः॥ पुनः कीदृश॥ धृतकुंडलए॥ धृते स्वीकृते पुष्पनिर्मितकुंडले क
र्णाभरणे येन तत्संबोधनं॥ राइत्यनिहर्थं॥ अनेन पूर्वक्रीडायां तद्विस्मृतमित्युक्तं पुनः कीदृश॥ कलितेति॥ कलिता कंठे धृतातिम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नि

नोहरावनमालाः पादलंबवनीरत्नमयीमालायेन॥ यद्वा कलिताललिता निर्मनोहराणि शृंगाररसविलासरससचेष्टितानिय २
स्यांतादृशी विधावनमाला यस्येति॥ अथवा कलिता धृता राधासखीनां स्वेदो सन्मोचनस्य जलस्य माला पंक्तिर्यस्मिन्॥
अथवा कलिता प्रक्षिप्ता रासरसमहोत्सवे व्रजजनवल्लभीभिर्ललिता कुंकुमकर्पूरागुरुसुगंधादिभिर्मनोहरा वनमा
लायस्य॥ जलः नृत्यखेदोसन्नश्रमजल बिंदुक्लिन्नामपि मालं प्रेयसीभिर्दत्तेयं मत्वा निपतु भत्वा न त्यजतीति भावः॥
उक्तंच॥ प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने॥ स्रजं न काचिद्विजहौ जलाविलां वसंति हि प्रेम्नि गु
णा न वस्तुनीति भारविः॥ अनेन नायकाखिलविलाससंपत्प्रियाकौशल्यं चोक्तं॥ पक्षे॥ श्रितमाश्रितं कमलायाः ल
क्ष्म्याः कुचयोः मंडलं कुचाग्रभागो येन तत्संबुद्धिः॥ अनेन लक्ष्म्याः केलिकौतूहले नर १ तिकेलिकौतूहलरूपो नायकगु
ण उक्तः॥ लक्ष्म्या प्रयत्नेन धनाढ्यगुणः सूचितो नायकस्य॥ धृतकुंडलकलितललितवनमाले षि लिप रदद्वयेन ना
यकस्य भव्यत्वं सौभगत्वं च सूचितमिति शेषं समानं॥ मंडलं राजचक्रस्यात्द्विंबेवस्वपि मंडले॥ कोलाकुचप्रदेशे च मंडलं
वर्तुले त्रिचेति विश्वः॥ कुचो स्तनावितिः॥ आपादगामिनी मालां वनमालां विदुर्बुधा इति विश्वः॥ कमला श्रीपरस्त्रियो
रिति विश्वः॥१॥ ॥७॥ ॥

कर्तीव्यग्रजसुवतिकंदं वलीला प्रयत्न क नायकगुणानाह॥ दिनमणीत्यादिना द्वितीयसादरसंबुद्धेः॥ दिनस्य मणिः
प्रकाशकः॥ सूर्यमणेः॥ प्रकाशबहुलत्वं सिद्धमेव॥ तस्य यत् मंडलं प्रकाशसमूहस्तस्य यन्मंडनं श्रीराधा सौंदर्यय
स्य तादृशः॥ श्रीरो धालंकारभूतः॥ एतेन नायिकापक्षपातो ध्वनितः पुनः कीदृश॥ हेभवखंडन॥ भवस्य कंदर्पस्य खं
डननाशकतत्संबोधनं॥ पुनः कीदृश॥ मुनिजनमानसहंस॥ मुनिजनास्तच्चरणकमलसुभगसौंदर्यमाधुर्यविचारः
शील गोपीजनास्तेषां मानसमेव सरस्तत्र हंससम राल॥ प्रसिद्धमानससरसि हंसास्तिष्ठंत्यत्र मानससरोवर सदृशं

दिनमणिमंडलमंडन भवखंडन ए॥ मुनिजनमानसहंस जय जय देव हरे॥२॥७॥

गोपीमनसि श्रीरसत्वं द्रोहं सततुल्पमइतिभावः॥ अनेन मनोहारित्वं प्रोक्तं॥ पक्षे दिनमणेः सूर्यस्य मंडलं तेजस समूहरू
न स्य मंडन अलंकारभूतः॥ भवं संसारं खंडयति नाशयतीति तादृशः॥ एतेन नायकस्य गुणस्य सामर्थ्यं ध्वनितं॥ पुनः कीदृ
नः शः॥ मुनिजनानां ऋषीणां मानसं चित्तमेव सरोवरः तस्य हंस॥ अनेन नायके धूर्तादिरहितत्वं स्वच्छहृदयप्रकाशकत्वं चोक्तं॥
शेषं जयादिपदं समानं॥ मानसं सरसि स्यान्तुलिविश्वः॥ हंसो विहंगमे पि स्यात्परमात्मनि योगिनीति च॥ मंडलं तु
समूहे स्यान्मंडले राजमंडले॥ मंडलं वर्तुले चैव तेजस्यपि च मंडलमिति मेदिनीकरः परंपरे विनचिनरूपकालंकारः

तद्रूपं नीयतीरोपणो पायस्यारोपः परस्परं यत्तत्संपरि चित्तो चिकवाचके भेदमाजिवेति॥२॥ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यदप्याहुः॥ कालियेत्यादिना॥ कालियः सर्प्पस्तद्वदाकृतिः कुंडलीभूतो बंधस्तस्य गंजन मर्द्दन॥ बंधलक्षणं चोक्तं यत्रोपरि
स्थितापुंसः कांता लिंगं न खाः लसः॥ चिह्नलिंगमंगेन भोगिबंधः स उच्यते इति॥ हे जनरंजन॥ जनान् प्रभक्तजनान् स्व
कौतुकालादिना रंजयति एतेनालौकिक गुणो नायकस्य लक्षित इति॥ नहि सर्वे जनो लपसामर्थ्ये नरज्यते॥ अथवा ज
नः श्रीराधा सर्वा जनः यो भिः धुर्यादिना रंजन रतिप्रद॥ एतेन नायिकाः प्रेवणं लमनुकूलत्वं च प्रोक्तं॥ हे यदुकुलनलि
नदिनेश॥ यदुकुलं नाम गोपकुलमेव नलिनं तस्य दिनेशः सूर्य॥ एतेन कुलीनसर्वप्रकाशो नायकगुणो लक्षितः॥ उक्तं च

कालियविषधरगंजन जनरंजनए॥ यदुकुलनलिनदिनेश जयजयदेवहरे॥ ३॥ ७॥

पद्मपुराणे॥ यादवानां हितार्थाय धृतो गोवर्धनाचल इति॥ पक्षे॥ पुनः कीदृश॥ हे कालियविषधरगंजन॥ कालियनाम्नो
विषधरस्य सर्पस्य गंजन गर्वनाशक॥ अनेन पिकूनाहारित्वमुक्तं॥ हे जनरंजन॥ जनान् गोपईनो धरणादिना मधु
रसंभाषणादिना च रंजनसुखप्रद॥ अनेन कुमारक्षणत्वं शुभवचनलंचनायक गुणं उक्तः॥ यादवानां कुलमेव नलि
नं कमलं तस्य नेदि शसूर्य॥ एतेन कुलीनत्वं यादवसौभाग्यं चोक्तं॥ आशी विषो विषधरश्चक्री व्यालः सरीसृपइत्यमरः
॥ वसुंसिप भंनलिन मरविंदं महोहोत्पलमितिच॥ उल्लेखेय मलंकारः॥ अन्यत्समानं॥ ३॥ ७॥ ॥

१६

अपरमप्याहुर्मधुमुरेत्यादिना॥ एइ तिसर्वत्रानंद संबोधनं ज्ञातव्यं॥ मधौ वसंते ये मुराः मुर वेष्टने धातुः अभिमतार्थप्र
दा वृक्षाः नराणां वं सुखं यान्यस्ता॥ तुलाश्च श्वये वेपक्षिणस्तानपि न आशयति व्यापारयतिइति ना शन ताहृश॥
असैभोजने॥ अश्रु॥ स्या हो निषेधार्थेन कारः समासत्वान्नलोपः भावो नेकधेतिवत्॥ स्वं शरीर वशंयतो गरुलताप
क्षिणः को जन भोगतःत्र व्यापारं नवान्॥ किंपुनर्मनुष्यांन मिति भावः॥ हे गरुडासन॥ हे गरुडबंध॥ उक्तं कामसर्व
स्वे कोकशास्त्रे॥ तल्लक्षणं॥ पक्षवद्धाहुयुग्लं विपरीतरते प्रिया॥ धूनोतियत्र कुर्जोती सप्रोक्तो गरुडा कृतिरिति॥ हे सुरकुल

मधुमुरनरकविनाशन गरुडासनए॥ सुरकुलकेलिनिदान जयजयदेवहरे॥ ४॥ ७॥

केलिनिदान॥ देवानां कुले केलीनां निदान आदिप्रवर्त्तक नितरां॥ रसप्र. दइतिवा॥ यमपेक्ष्य सुरकुलस्य केलोस्पृहा
भवतीति भावः॥ पक्षे मधुनाम्नो मुरनाम्नो नरकनाम्नः विनाशक॥ सुरकुलकेलीनां देवकुलसमूह क्रीडानां निदानः
आदिकारणत दुद्रवकारक इतिया वत्॥ अनेन नायकस्य देवक्रीडाविशिष्टसौदर्यकुशलादयश्च गुणा उक्ताः॥ मधु
द्विषि वसंते मधुरमधुन्यपि सुरत्वकृति मेदिनीकरः॥ मुरोसुरेप्यस्तजना भिमतार्थप्रदेपि चेति वैजयंती॥ कल्पमणिसुखेवा
पिजलेब्रह्मांडकेपिच॥ सुरादेवइत्यमरः॥ निदानं त्वादिकारणे वैतिच॥ निदानं कारणं प्रोक्तं विनोशेनि श्चयेपिचेति॥
॥ ४॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१७ अपरमप्याह ॥ अमलकमलेत्यादिना ॥ अमलं यत्कमलस्य दलं पत्रं तद्वल्लोचने यस्य तादृश ॥ निर्मल
कमलकोशारक्तपत्रलोचन इत्यर्थः ॥ अनेन नायिकांतरसंभोगमालिन्यं निरस्तं भवमोचन कामसंतापनाश
क ॥ त्रिभुवनभवननिधान ॥ त्रिभुवनं भवनं यस्य श्रीराधारलस्य तस्य निधान निधिविशेष ॥ एतेन नायकगु
णोत्कर्षः प्रतिपादितः ॥ पक्षे अमलं यत्कमलं तस्य यद्दलं पत्रं तद्वल्लोचने यस्य ॥ अनेनापि मनोहारित्वं प्रोक्तं ॥

अमलकमलदललोचन भवमोचन ए ॥ त्रिभुवनभवननिधान जय जय देव हरे ॥ ५ ॥

भवस्य संसारस्य मोचन निस्तारक अथवा ॥ भवं जन्म तस्मात् भक्तान् मोचयतीति तादृश ॥ अनेन त्यागरूपो
नायकगुण उक्तः ॥ त्रिभुवनमेव भवनं मंदिरं तदेव निधानं स्थानं वसतिस्थानं यस्य तादृश ॥ जयादिपद्मुभय
त्र समानं ॥ निधानं ताऽन्येय निधावपी निविश्वः ॥ भवनं भावे वेश्मनो रिति च ॥ पत्रं पलाशं छदनं दलं पर्णं छद
इत्यमरः ॥ निधानमाकरे प्रोक्तं निधिभेदे स्थिता वपीति कोश समुच्चये ॥ अत्रस्तु तिरलंकारः ॥ ५ ॥ ७ ॥ ॥ ७१

अपरमप्याह ॥ जनकेत्यादिना ॥ जनकसुतारतभूषण ॥ जनानां कंसु खं जनयती ति जनको वृषभानुजस्तत्करे
ति ति पचादित्वात् ॥ तस्य सुता श्रीराधा तया तस्याः वा कृताः निमकरिका पत्रतिलकादिनि भूषणा नियया येन वा ॥ ज
नानां स्वस्य सीजनानां कं सुखं सुनोतीति जनकसुतारा धातयावा ॥ षुञ् प्राणि प्रसवे ॥ जित निस्वगुण श्लाघाकर्षे
ननायिके परतिप्रभृति निदूषण निये न ॥ हे समरशमितदशकंठ ॥ समरे रतिसंग्रामे शमितानां शिता दशाकंठा सु
खस्फूर्त्याद्यवस्था येन तादृशंता ः पुनर्दशः ॥ चक्षुरागः प्रथमं चित्तासंगस्ततोथ संकल्पः ॥ निद्राच्छेदस्तनुता विषय
निवृत्तिस्त्रपानाश ॥ उन्मादो मूर्छा मृति रित्येता दशावस्था ॥ एतैः सकलकलाप्रवीणवीरादयश्च नायकगुणा उ

॥ जनकसुतारतभूषण जितदूषण ए ॥ समरशमितदशकंठ जय जय देव हरे ॥ ६ ॥ ७ ॥

क्ताः ॥ पक्षे पुनः कीदृश जनकसुतारतिभूषण ॥ जनकसुतायाः सीतायाः रतानि भूषणानि येन ॥ जनकसुता या वा
कृतं भूषणं यस्मिन् ॥ एतेन तारुण्य सकल कलाप्रवीणनायकगुण उक्तः ॥ पुनः कीदृश ॥ जितो दूषणनामा रा
क्षसो येन ॥ अथवा जिता निस्वस्मिन् श्लाघातिरस्कारादी निदूषणा निये न ॥ अनेन नायकस्य शूर गुणो लक्षितः ॥
पुनः कीदृश ॥ समरे संग्रामे शमितो नाशितो दशकंठो रावणो येन तत्तथा ॥ अनेनाभिमानी नायकगुणः प्रोक्तः ॥
जनकः स्यात्तु पितरि सुखदे मिथिलेश्वर इति त्रिलोचनः ॥ दूषणं राक्षसे प्रोक्तं दूषणं खंडने पि च ॥ समरानीकइत्यम
रः ॥ ६ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपरमप्याहुः॥ अभिनवेत्यादिना॥ हे अभिनवजलधरसुंदर॥ नूतनप्रकटितस्निग्धनीरदद्युते॥ अत्र दोषयथाग्रीष्मसं
तापहारकः॥ सकलानंदप्रदश्च तथा त्वं॥ धृतमंदर॥ वर्द्धनः ×धृत× गोपसंरक्षणार्थाय धृतो येन स दरः चत्वर इति पद्म
पुराणे॥ किंच मंदराचल इति नाम अंतरं॥ अथवा धृतपर्वतवं ध॥ तल्लक्षणं॥ बाहुनैकेन वनिता कांता यत्रानुरागिणी
द्द ॥ दधात्यूर्ध्वे गिरिमिव गिरिबंधः स कीर्तित इति॥ श्रीमुखचंद्रचकोर॥ श्रीसंयुक्तं यत्॥ श्रीराधामुखं तदेवानंदजनकत्वे
न चंद्रस्तस्य चकोर तदमृतजीवन॥ अत्र श्रीराधाधरचंद्रामृतपानलीन श्रीकृष्णचंद्रस्य चकोरपक्षित्वं निरूपितं॥ श्री
मद्वृंदावने श्रीराधामुखमेव चंद्रो नापरश्चंद्रो विराजत इति॥ अनेन श्रीमद्वृंदावननायिकानामुत्कर्षः॥ पक्षे॥ पुनः कीदृ
अभिनवजलधरसुंदर धृतमंदरए॥ श्रीमुखचंद्रचकोरजयजयदेवहरे॥७॥ ॥७॥
क्॥ अभिनवेति॥ अभिनवो नूतनो जलधरो मेघस्तद्वत्सुंदर सुभग॥ अनेन नायकस्य रतिगंभीरस्निग्धभव्यत्वं चोक्तं॥
धृतः क्षीराब्धिमथनावसरे मंदराख्यः पर्वतो येन॥ अनेना पि नायकसामर्थ्यं चोक्तं॥ श्रीमुखेति श्रियालक्ष्म्या राधा
या वा॥ मुखमेव चंद्र आल्हादकारित्वात्तस्य चकोर॥ अत्रेंदिरावदनचंद्राधरपानेन भगवतश्चकोरत्वं निरूपितं॥ एते
नूलो ननायकस्य रतिकौशलमेवोक्तं॥ अत्यग्रो भिनवो नवीनो नूतनो नवइत्यमरः॥ धाराधरो जलधर इत्यपि॥ मंदरो मंदरश्चा
कोबंधभेदे पि मन्मथ इति मेदिनीकरः॥ नायकगुणलक्षणं॥ त्यागी कुलीनः कुशलो रतेषु कंजः कलाविचक्षणो धनाढ्यः॥ १८

सकलकलाप्रवीणत्वेन श्रीकृष्णं स्तुत्वा सोऽप्रतिममभिमतमाहुः प्रीष्टं च प्रार्थयंति॥ तवेत्यादिना॥ हे कृष्ण वयं तव चरणं प्रण
ता इति भावय स्मर जानीहि वा वत् ×इति×॥ ननु मया किमिति भावत्यः स्मर्तव्याः॥ अयमर्थः॥ स्मरणं चित्तधर्मस्तस्य तन्नि
२ ष्ठत्वात्त्वयैव विधेयमिति सूचितं॥ अथवा॥ त्वमेव निजचरणौ तान् स्वभक्तान् भावय कुर्वीत्यर्थः॥ प्रणतेष्वनुरागिष्वस्मासु कुश
लं कुरु॥ त्वय्यनुरागः अन्यत्र विरतिश्चेति भावः॥ तव चरणस्मरणमेवास्मासु कुशलं नहीतरमकुशलमेवेति सूचितं॥ पक्षे तव
यं तव चरणे प्रणता इति भावय जानीहि॥ ननु मया तत्ज्ञातमेव भवतां किमिष्टं कर्तव्यमित्यत आह॥ कुर्वीति प्रणतेषु शरणा
गतेषु कुशलं कुरु॥ ८॥ एवमुक्ता भीष्टमाशास्ते॥ श्रीजयेति॥ श्रीजयदेवकवेः इदं कृतं व्रजयुवतिगीतिमंगलविधानं मद्भक्तेषु
तव चरणं प्रणता वयमिति भावय॥ कुरु कुशलं प्रणतेषु जयजयदेवहरे॥ ८॥ श्रीजयदेवकवेरिदं कुरुते मुदं॥ मंगलमु
ज्वलगीति जयजयदेवहरे॥ ९॥ ७॥
मुदं कुरुते॥ कुरुतामिति वक्तव्ये कुरुत इति साक्षादनुभवाद्वर्तमानतोक्ता॥ कीदृशं॥ मंगलं सुरतमंगलप्रदं॥ कीदृशं॥ उज्ज्व
लगीति॥ उज्ज्वला दोषरहिता गीतिर्गानं यस्य तत्तथा॥ श्रीराधाकृष्णसुरतकेलिकथने नोज्ज्वलत्वं तदितरकेलिवर्णने मलि
नत्वमेव शृंगारस्यापि तथैवेति भावः॥ पक्षे श्रीजयदेवकवेः इदं गीतं शृण्वतां पठतां वा मुदं आनंदं कुरुते॥ कीदृशं॥ मंगलं मं
गलप्रदं॥ उज्ज्वलगीति उज्ज्वला अलंकारादिदोषरहिता गीतिः कवित्वं यस्य॥ गीतिदोषास्तु भरते॥ शंकितं भीतमुद्भ्रांत
मव्यक्तमनुनासिकं॥ काकःस्वरं शिरःकंपंत स्थानविवर्जितं॥ विस्वरं विरसं चैव विश्लिष्टं विषमाहतं॥ व्याकुलं ताल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१९ एवंपूर्वोक्तप्रकारेण श्रीराधामाधवयोः क्रीडा वर्णिताः इदानीं तत्तुष्टिकारिणीं लीलाभूमिकामाह॥ पद्मेत्यादिना॥ विप्र
योगात्मिकेलिः ×का× प्रथमं सन्निरूप्येत संभोग रसपुष्ट्यर्थं प्रेमवाक्यैर्वयस्य या॥ तत्रोपि श्रीराधोत्कर्षकथनाय थ
लीलामाह॥ पद्मेति॥ मधुसूदनस्य श्रीराधाधरामृतपानकर्तुः॥ भुजः अभिषवे॥ उरो वक्षस्थलं॥ वोस्तु भवांकं प्रियं मनो
भीष्टमनुपूरयतु संपूर्णं करोतु॥ कीदृशं पद्मा निक्रीडार्थं चिंतय स्यां पद्मवर्णायां पद्मांकितासा मुरारी स्वाक्ता महासौ
भाग्यवतीयापद्मा श्रीराधा तस्याः॥ पयोधरतटीकुचाग्रं तस्य परिरंभणालिंगने नत्तमं यत्काश्मीरं कुंकुमं तेन मुद्रितं चि

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य॥ व्यक्तानुराग मिव खेलदनंगखेदस्वेदांबु
पूरमनुपूरयतु प्रियं वः॥ ६॥ ७॥

न्हितं संजातमुद्रं या श्रीराधाया स्वप्रेमदर्शनाय निजस्तना ग्रलिप्तकाश्मीरेण मुद्रे
यदृत्तेति भावः॥ खेलनेन विनोदेनानंगक्रीडायां यः स्वेदः सुरता यासः तेन यः स्वेदांबु स्वेदजलं तस्य पूरः प्रवाहो यत्र ताह
शं॥ कीदृशमिव॥ व्यक्तानुरागमिव॥ व्यक्तः प्रकटीभूतो नुरागः स्नेहो यत्र तादृशमिव॥ अनेन श्रीराधो नुरागाधिक्या
त् स्नेहः कुंकुमरागव्याजेन बहिर्निर्गत इति भावः॥ पद्मेति पद्मालक्ष्मीः मधुसूदनो मधुदैत्य हंता॥ शेषं समानं॥ प
द्मालक्ष्मीः स्मृता पद्मा पद्मिन्यपि कामिनी॥ काश्मीरं कुंकुमं प्रोक्तमिति॥ अनेन दाक्षिण्यरूपो नायकगुण उक्तः॥ त
ल्लक्षणं शृंगारतिलके॥ योगौरवं भयं प्रेम सद्भावं पूर्वयोषिति॥ न मुंचत्यन्यचित्तोपि ज्ञेयो सौ दक्षिणोयथा इति शेषोक्ति

हरिः॥ ७॥

१९

पूर्वोक्तश्लोकेन केलिरससांद्रमुक्त्वा तद्विधायिनी वासंती नाम्नी कामुक्यपि सहचरी सरसमिति शृंगाररससहितं अनुनय
सहितं वा यथा भवति तथा वसंते रसमयेराधामिदमूचे॥ सहचरीलक्षणं॥ स्वात्मनोप्यधिकं स्नेहं कुर्वाणा न्योन्यमक्षयं॥
विश्रंभिनी वयो वेषादिभिस्तुल्या सखी मतेति॥ वासंती माधवीलता तत्कुसुमवत्सुकुमारैः कोमलैर वयवैः रूपलक्षितां॥
पुनः कीदृशीं कांतारे वनेभ्रमंतीं इतस्ततो गच्छंतीं॥ भ्रमती मित्यत्रहेतु गर्भं पदं विशेषणं॥ बहुधारं स्तंभी कृष्णस्यानुसरणम

वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुविहितकृष्णानुसरणां॥ अमंदं कंदर्पज्व
रजनितचिंताकुलतया चलद्बाधां राधां सरस मिदमूचे सहचरी॥ ७॥ ७॥ ॥

न्वेषणं यया तां॥ अन्वेषणे हेतुं॥ अमंदमधिकं यथा स्यात्तथा कंदर्पस्य कामस्य ज्वरस्ताप स्तेन जनिता उत्पादिता चिंता त
याआकुलतया व्याकुलत्वेन चलद्बाधां चलंती प्रसरंती बाधा दुःखं यस्यास्तां श्रीकृष्णविरहातुरत्वेन न चजीविष्यसीति
भावः॥ महारण्ये दुर्गपथे कांतार इत्यमरः पीडा बाधा व्यथा दुःखमित्यपि च॥ अथ चैवेरित्यत्र जटाभिस्तापस इतियाव
त् वासंती माधवीलते त्यमरः॥ ७॥ ७॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२० वसंतरागेयतितालेन ।। रागरूपं ।। श्रीखंडैः बर्हाश्च यवक्रचूडः ।। पुष्णन् पिकं चूतलतांकुरेण भ्रमन्मुदा वा समनंगमूर्तिर्मत्तो
मतंगस्त्वसंतरागः ।। ताललक्षणं ।। लघुद्रुतौ यत्र तालो यतितालः स कथ्यते ।। सरसमिदमत्वइति श्लोकोक्तं प्रपंचयेति ।।
ललितेत्यादिना गीतेन ।। हे सखि राधे ।। इह राधे वस्त्र खवा हरिर्मनोहरः नंदसूनुर्विहरति विहारं करोति ।। इह विहरतीति स
मक्षं दर्शयति ।। न हि विरहक्रूरे तादृशे न संभवतीति भावः ।। तत्रापि नैको विहरति किंतु युवतिजनेन व्रजवधूसमूहेन सह
वसंतरागेयतितालेन ।। ललितलवंगलतापरिशीलनकोमलमलयसमीरे ।। मधुकरनिकरकरंबितकोकिलकूजित रे
रे कुंजकुटीरे ।। विहरति हरिरिह सरसवसंते नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते ।।१।। ७।। ।।
मं नृत्यति नृत्यं करोति ।। अनेन व्रजयुवतीयूथलीलाप्रोक्ता इति भावः ।। कीदृशे इह सरसवसंते ।। शृंगाररसेन सहिते वसंत
समये ।। पुनः कीदृशे विरहिजनस्य दुरंते ।। विरहिणो जना गोपीजनाः यस्य श्रीकृष्णस्य दुःसहत्वा विनेत्यर्थः ।। अथवा ।।
विरहिजनस्य वियोगिजनस्य दुरंते दुःखेनांतः समाप्तिर्यस्य तादृशे वियोगिनां दारुणेन तु विहरतां युवतिभिः सह ।। य
दि श्रीकृष्णेनात्र जिघ्यसि तदा यं वसंतस्तवापि दारुणो भविष्यतीति भावः ।। ध्रुवपदं ।। वसंतसरसतामाह ।। ललितेति ।। व
ललिताकमनीया लवंगानां लतानस्याः परिशीलनेनालिंगनेन कोमलो मृदुलो मलयस्य पर्वतस्य वा समीरो वायुर्य
त्र ।। अनेन वायुस्त्रिविधो वर्णितः ।। कोमलेति मंदत्वं लवंगेति सुगंधित्वं ललितेति शीतलत्वं ।। पुनः कीदृशे मधुकरा मधुक

२०

रीरो येन तु तत्स्थानकर्त्तारस्तेषां निकरेण समूहेन करंबितः संयुक्ताश्च कोकिलास्तैः कूजितं शब्दितं कुंजकुटीरं मत्स
कुंजमंदिरं यत्र तस्मिन् विना वृहत् कुंजमंदिरमपि कुटीरं तं तुच्छमिति भावः ।। मधुकरयुक्ताः कोकिलास्त्व हिरह
खेदेनैव कूजंतीति ध्वनिः ।। अथ स्यात्कुटी कुटीरः स्यादित्यमरः ।। समूह निकर व्यूह मित्यपि ।। करंबितं तु संयुक्ते
समूहार्थे उत्सुके पिचेति मेदिनी ।। समीर मारुत मरुज्जगत्प्राणसमीरणा इत्यमरः ।। मधुकरो मधुव्रतो मधुलि
हो मधुपालिनइति च ।। स्तोमश्चनिकरव्रातवारसंघातसंचया इत्यपि समावोक्तिरलंकारः ।।१।। ७।। ।।७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसंतदुःसहतामेवतनोति॥ उन्मदेत्यादिना॥ उन्मद उत्कट॥ उद्धतो वा उद्भटो वा उन्मादवस्थां प्राप्तो वा यो मद-
नः कंदर्पस्तादृशो मनोरथो येषां पथिकानां वधूजनास्तैर्जनितउत्पादितो विलापो दिव्योगे यत्र॥ अनेनोद्दी-
पनावस्थातज्जन्यविलापश्चोक्तः॥ कीदृशे॥ अलिकुलैर्भ्रमरसमूहैः संकुलो व्याप्तः कुसुमसमूहः पुष्पवृंद-
स्तेन निराकुलः नितरां आकुलो व्याकुलो बकुलकलापो बकुलपुष्पाणां समूहो यत्र॥ अथवा॥ बकुल

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे॥ अलिकुलसंकुलकुसुमसमूहनिराकुलबकु-
लकलापे॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले॥ युवजनहृदयविदारणमनसिजनखरुचि-
किंशुकजाले॥४॥

एवं कलापो भूषणं यत्र॥ अनेन त्वदृते विना नानुरागोदयः कस्यापीत्युक्तं॥ कलापो भूषणे बर्हे तूणीरे संहता-
वपीत्यमरः॥ संकुलं व्यवधाने स्यात्संश्लिष्टार्थवचसि अपीति विश्वः॥ केसरबकुल इत्यपि॥ केसरः कुंकुमे प्रोक्तः
केसरो नागकेसरे॥ वाजिमौलिकेसरे सिंहे प्रोक्तः पुष्पादिष्वपीति धरणिः॥ हेत्वलंकारः॥४॥ पुनः की-

दृशे मृगमदस्य कस्तूरिकायाः सौरभस्य सुगंधः हर्षस्य वा रभसो वेगस्तस्यात्मवशंवादिनी नवदलमाला
नूतनपत्रपंक्तिर्येषां तादृशा स्तालास्तमालवृक्षा यत्र॥ पुनः कीदृशे॥ युवजनानां तरुणकामिजनसमूहा-
नां हृदयं विदारयंति॥ ये तादृशाः मनसिजस्य कामस्य ये नखास्तद्वद्रुचिर्दीप्तिर्येषां तादृशो यः किंशुकपला-
शः॥ कुसुमानि तेषां जालानि यत्र॥ साधारणतरुणपुरुषहृदयविदारकाः युवतिहृदयविदारकाः सुतरां
मिलितासामष्टगुणकामादित्यर्थः॥ उक्तं च॥ कामश्चाष्टगुणः स्त्रीणामिति॥ एतेन वसंतस्य दुः-
सहत्वोक्ता मृगनाभिर्मृगमदः कस्तूरीत्यमरः॥ रभसो वेगहर्षयोरिति विश्वः॥ रुचिर्मयूखे शोभायाम-
भिष्वंगाभिलाषयोरिति॥ पलाशः॥ किंशुकोमत इत्यपि॥ कामः पंचशरः॥ शंबरारिर्मनसिजइत्यमरः
॥ जालं गवाक्ष इत्यपि रूपकालंकारः॥ ३॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशे ॥ मदनः कामएवमहीपतिः सार्वभौमस्तस्यछत्रार्थं यः कनकदंडस्तस्येवरुचिर्द्दीप्तिर्यस्य ताद
शस्य केसरस्य नागकेसरस्य कुसुमानां पुष्पानां विकाशः प्रकाशो यत्र ॥ पुनः कीदृशे ॥ मिलिताः शिली
मुखाः भ्रमराएव बाणा यत्र तादृशं यत्पाटलपटलं पुष्पसमूहस्तेन कृतः स्मरतूणस्य कंदर्पतूणीरस्य वि
लासो लीलासारूप्यं वा यत्र ॥ ननु कामः कुसुमबाणः न तु भ्रमरबाणः ॥ सत्यं ॥ इछंनूत्प्रेक्षा ॥ अत्रातिव्य

मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकाशे ॥ मिलितशिलीमुखपाटलपटलकृतस्मरतूणविला
से ॥ ४ ॥

थोत्पादकत्वेन भ्रमराणां बाणसाम्यं ॥ केसरो नागकेसरः ॥ केसरो कनकाह्वय इत्यमरः ॥ अभिबाणे शिली
मुखावितिच ॥ समूहेपटलंनालि छिद्रे संरोधकेपिचेति त्रिलोचनः ॥ तूणोपासंगतूणीरनिषंगा इषुधिरित्य
मरः ॥ एतेन स्मराभिषेकसमर्थो वसंतगुण उक्तः ॥ रूपकालंकार एव ॥ ४ ॥ ७ ॥ ॥ ७ ॥

लज्जितं पुनः कीदृशे ॥ विगलितं गतं लज्जायस्य तस्य जगतः प्राणिमात्रस्यालोकनेन विशेषदर्शनेन तरुणकरुणैः
॥ नवीनकरुणवृक्षैः पुष्पविकाशव्याजेन कृतो हासो यत्र ॥ अत्र हासरसस्य शुभ्रत्वात् पुष्पविकाशसा
म्यं ॥ उक्तंच ॥ श्वेतो हासः प्रकीर्त्तित इति ॥ अथवा विगलितलज्जितानां वियोगिजनानां जगत्यवलोकनेन
तरुणैरभियोगिभिः करुणं यथा स्यात्तथा कृतो हासो यत्र तादृशे वियोगिनो लज्जां त्यक्त्वा पश्यंतीति चहास
स्तेषामितिभावः ॥ तरुणा रसानभिज्ञाएव वृद्धानां कृतसंनिवारणात् तरुणहासेन दोष इत्युक्तं ॥ कीदृशे ॥ वि
करुए विगलितलज्जितजगदवलोकनतरुणकृतहासे ॥ विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे ॥ ५ ॥
रहिणां वियोगिनां निकृंतनाय अतिशयेन विदारणाय कुंतस्य आयुधविशेषस्य भल्लस्य मुखमग्रभागस्येवाकृ
तिर्यस्य तादृशं यत्केतकं तेन तुरिता व्याप्ता आशा दिशो यस्मिन् ॥ केतकीरितिपाठांतरं ॥ दंतुरं दंतमुकुले विष
मे मर्मकृंतने ॥ अग्रभागे निशीक्ष्णे च प्रान्ते चेति हलायुधः ॥ करुणः करुणवृक्षः कृपायां करुणइति विश्वः ॥
दिशास्तु ककुभः काष्ठा आशाश्चेत्यमरः ॥ तारकादित्वदितच् ॥ दंतुरित इति रतीछंदे न युट् प्रत्ययः ॥ ५ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीदृशे॥ मधौ वसंतस्येयं माधविका॥ वसंतो नायकः माधवी कावासंती नायिका च तस्याः परिमलेन सौरभेन
ललिते मनोहरे॥ यद्वा मधुर्वसंतः श्रीराधाधरामृतं वा तत् प्रियत्वात् माधवः श्रीकृष्णो मधुप्रिया माधविका श्री
राधा तस्या अंगे परिमलेन सौरभेन मुखपरिमलेन वा ललिते सुंदर इति ध्वनिः॥ नान्यथैदृशी सौरभसंप
त्तिर्वसंत इति भावः॥ पुनः कीदृशे॥ नवमालिकया नूतनमालिपुष्पेण अतिसुगंधो अतिशयेन सौरभयुक्ते॥
अथवा मालतिजातिर्गिवापाठे॥ नवमालतिनूतनमालतिजातिश्च ताभ्यां सुगंधो सुरभ्युक्ते॥ गंधस्येदुत्पूति
माधविकापरिमलललितनवमालतिजातिसुगंधौ॥ मुनिमनसामपि मोहनकारिणि तरुणाकारणबंधौ॥
सुरभिप्यइतीत्॥ मालतिजातिरित्येकं पदं वा॥ कीदृशे॥ मुनिमनसां खंडब्रह्मानंदज्जुषं सेवमानानां
किंपुनरन्येषां मोहनकारिणि मोहजनके॥ एतेन ब्रह्मानंदादपि श्रीराधाकृष्णभजनानंदोधिक इति ध्वनितं॥ न चै
दं वसंतसौंदर्यसौभाग्यं च किंतु विहारिणोः श्रीराधाकृष्णयोरेव॥ युवतरुणानां विलासियुवजनानां स्वा
भाविकमित्रे॥ यद्वा कारणेन वल्लाकारण वध्नातीति बंधुरासक्तिकारके॥ पुरुषविहारः स्त्रीणां रतिजन
कोभवत्येवात्र पुरुषाणां मनोहरत्वमुक्तं इति॥ अथवा जीवानामभिमतं तनोतीति तनुः कल्पतरुः

२३

कीदृशे॥ स्फुरंतीसालिकोदयेन कंपमाना नतु वायुना कांत्या द्योतमाना वा या अतिमुक्तलता वासंती माध
वीवात्ठता तस्याः परिरंभेनालिंगनेन मुकुलिते जातकामांकुरः पुलकितः रोमांचित श्चूतवदसाधारण
गुणः॥ श्रीकृष्णे यत्र चूत एवेति तादृशे॥ अनेन श्रीकृष्णचंद्रस्य रीनिव चूतस्य पुलकादयो न वासंतीलतालिं
गनेन॥ एवं प्रसिद्धिः॥ महावृक्षा महानायकांगस्पर्शमात्रेण वनेवीनपल्लवपुष्पफलसंपदो भवंतीति॥ द्वृ

वि स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते॥ वृंदावनविपिने परिसरपरिगतश्रीयमुनाजलपूते॥

दं विना न तरवः पल्लवपुष्पफला भवंति॥ तस्मात्तदेव मंगलं चरणस्पर्शमेव॥ एतावता वसंतस्य सर्वसं
दुरंतगांवोच्छ्रृंगनीक्रीडायाः स्थानविशेषमाह॥ वृंदावनाख्यविपिने वनपरिसरे समीपदेशे परितः सर्वतः
गमनशीलेन श्रीकृष्णाजलेन पूते पवित्रित पूतं यमुनाजलं यस्मिन् इति वा तेन पूते॥ श्रीकृष्णायाः परितः
प्रसरणं वसंते तच्चरणस्पर्शोपवित्र्यूरत्वादेव॥ वासंती माधवी लतेत्यमरः॥ पर्यंतभूः परिसर इत्यपि॥ आम्र
श्चूत इत्यमरः॥ मुकुलित इति॥ नारकादित्यानचू॥७॥ ७॥

दि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंगीतार्थवसंतवर्णनमुपसंहरन्निवविदग्ध्जनप्रत्यर्थंस्वगीतेषुउत्कर्षमाह॥श्रीजयदेवेत्यादिना॥श्रीज
यदेवकवेरिदंभणितंगीतमुदयतिविराजते॥तत्रहेतुः॥हरिचरणयोःस्मृतिःस्मरणंतेनसारंश्रेष्ठं॥अथवा
हरिचरणस्मृतिरेवसारोयत्रतादृशं॥नात्रहरिपदंचेत्थंहरणपरंमनोहरपरंवाबोद्धव्यं॥नहिव्रजवासि
नांमाहात्म्यज्ञानाधीनानंदकिशोरेप्रणयः॥कीदृशंसरसंशृंगारेणसहप्रणयेनवासहश्रीराधायावासहइ

श्रीजयदेवभणितमिदमुदयतिहरिचरणस्मृतिसारं॥
सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥८॥

तियावत्॥पुनःकीदृशं॥तत्समयोचितंवर्णनंयत्रभणिते॥वनशब्देनवृंदावनमेवनहिसर्ववनेषुतादृशं
सौभाग्यं॥कीदृशं॥अनुगतमदनविकारं॥अनुगतःप्राप्तःसत्वगुणोवामदनस्यकामस्यविकारउदयो
यत्रविश्वक्षोभकोपियेनवसंतःश्रयभणितेनकंदर्पोपिमोहंप्राप्तइतिभावः॥नहिमदनोवसंतेनमोहमु
पयातिकिंतुश्रीवृंदावनचंद्रिकाविहारेणेतिरसज्ञाएवजानंतीतिस्वभावोक्तिरलंकारः॥८॥ ॥७॥ ॥ २६.

पूर्ववसंतसमयस्यदुःसहतोक्तासंप्रतितु द्वयोरपिवियोगिनसंतापकत्वमाह॥दरविगलितेत्यादिना॥इह
स्मिन्वसंतेवनेवास्वैतोदुःसहेतद्गंधवाहोवायुरपिप्रसरत्यथाभवतितथाचेनोदहतीत्यन्वयःअथोहरि
णामितिनोषः॥कीदृशः॥केतकीगंधबंधुः॥केतकीगंधोबंधुर्यत्रतद्बंधुर्वा॥अनेनपरमाधिक्यंसूचितं॥
पुनःकीदृशो॥असमबाणस्यकामस्यप्राणवत्॥कामप्राणसदृशः॥उक्तंच॥अपूर्वैवधनुर्विद्यामन्मथ
स्यमहात्मनः॥शरीरमक्षतंयातिभिन्नत्यंतर्गतंमनइति॥किंकुर्वन्काननानिवनानिवासयन्सुरभीकु

दरविगलितमल्लीवल्लिचंचत्परागप्रकटितपटवासैर्वासयन्काननानि॥
गंध इहहिदहतिचेतःकेतकीगंधबंधुःप्रसरदसमबाणप्राणवद्गंधवाहः॥८॥७॥

र्वन्॥कैः॥दरईषद्विगलितामत्ययवायुस्पर्शेणवामल्लीवल्लिर्मल्लिकालतातस्याःचंचंतःप्रसरंतोयेपरा
गाःपुष्परेणवः॥तएवप्रकटिताःपटवासाःपिष्टातकास्तैः॥अतिसुकुमारत्वादीषद्विगलितायास्तस्याः
पुष्परेणुसमूहःसंभवतीतिभावः॥कामस्यानंगत्वेनतद्रूपेणप्रसरत्मरा॥तेतोदहतीतिध्वनितंईष
दर्थेदराव्ययंइतिविश्वप्रकाशः॥परागःपुष्परजसीतिच॥पिष्टातःपटवासकइत्यमरः॥पटवासःपरा

Dr. Urmila Sharma Collection, Varanasi

गी०टी०
२५

पूर्वमेतावद्वायुवर्णनेन वसंतस्य दुरंतत्वमुक्तं संप्रति कोकिलकाकलीनामपि तथात्वमाह ॥ अद्यात्संगेत्यादिना ॥ श्रीखंडशैलानिलो मलयाचलपर्वतवायुः ॥ ईशगेरुद्रस्तस्याचलो हिमाचलस्तमनुसरति किमर्थं ॥ प्रालेयप्लवकालेयस्नवनं जीवनं तादृच्छया ॥ कस्मादिव ॥ अद्रेर्मलयस्योत्संगे येव संगो भुजंगाः सर्पास्तेषां कवलनेन पानेन यक्लेशस्तस्मादिव ॥ अनेनास्योद्वेगावस्था कथिता ॥ किंच ॥ पिकानां पुंस्कोकिलानां गिरः कुहुः कुहुरित्येवं रूपाः पंचमस्वरादिवाग्देन्यो हर्षोदयादुन्मीलंति उद्भवंति ॥ किं कृत्वा ॥

अद्युत्संगवसद्भुजंगकवलक्लेशादिवेशा चलं प्रालेयप्लवनेच्छयानुसरति श्री खंड शैलानिले किंच स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंति कुहुः कुहूरिति कोलोत्तालाः पिकानां गिरः ॥९॥७॥

स्निग्धानि रसालानामाम्राणां मौलौ शिखरे यानि मुकुलानि तानि निलोक्य दृष्ट्वा ॥ कीदृशाः कलोत्तालाः कलामधुराश्चोत्तालाश्च ॥ पुरुषकूजितत्वादुत्तालाः ॥ राजसभा ओदयत्वात्कलाः ॥ अनेन तेषामपि स्मरक्षोभकरा वनविरहिणां वामत्वादेवेति भावः ॥ एतत्संवद्धुः सह मिति ध्वनितं ॥ मौलिः पुंसि शिखायां स्यात् मुकुट मस्तके पि चेति हलायुधः ॥ धृतोतु मधुरास्फोटरः निकुल्लः अथास्त्रे शाप मालकारः ॥ ९ ॥

पूर्वं वसंतस्य तद्वायोश्च कोकिलकाकलीनामपि वदुःसहत्वमुक्तं संप्रति दिवसानामपि च विशेषदुरंतत्वमाह ॥ उन्मील दित्यादि ॥ पथिकैरमी वसंतसंबंधिनो वासरा दिवसाः कथंकथमपि महताक्लेशेन नीयंते समाप्यंते अतिवाह्यंत इत्यर्थः ॥ कीदृशाः ॥ उद्गीर्णः प्रकटीकृतः कर्णज्वरः श्रोत्रसंतापो येषु ते ॥ उन्मीलंति प्रकटीभवंति यस्मेघो वसंते गंधास्तल्लुपटा मधुपा भ्रमरास्तैर्व्याधूताः कंपिताः ये चूतांकुराः आम्रमुकुलानि तेषु क्रीडंता के कोकिलानां याकाकलिरव्यक्तमधुरा गिरस्ता साभिः कलकलाः कोलाहलास्तैः ॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥१०॥ कर्णस्या कान्नगुणत्वात् कर्णज्वरस्यापि दीर्घत्वं ॥ कर्ण इत्युपलक्षणं सर्वेंद्रियज्वरा इति ॥ तर्हि कथं नीयंत इत्यत आह ॥ ध्यानेत्यादि ध्याने स्वप्रिया चिंतने क्षणापि ॥ भाग्योदयेन यदवधानं मनसस्तल्लीनत्वं क्षण प्राप्ताः श्रोणलभायाः प्राणवल्लभायाः कांतायाः समागमरूपो रसस्तस्मादुत्पन्नायेर सोल्लासा रसोल्लासास्तैः कोलाहलः कलकलस्तिरश्चां वासितं रूतमित्यमरः ॥ काकली तु कले सूक्ष्मे इत्यपि आम्रश्चूतो

CC0. In Public Domain, Digitizagtion by eGangotri

१८

एवंरसार्थमुद्दीपनेन वसंतभावावर्णितइदानींरागांतरेणविभावानाह॥ अनेकेत्यादिना॥ यापूर्ववासंतीपरोक्षतयो
वाचसासोसखीसमक्षंराधिकांपुनराहेत्यन्वयः॥ किंकुर्वती॥ आरान्नसमीपमुरारिर्मुरस्यमधुरसूदस्यारिस्त
द्विस्मारकः श्रीकृष्णस्तंदर्शयंती॥ मधुमुरनरकेतिमुरारिशब्दार्थोदर्शितः कीदृशं॥ अनेकनारीणांपरिरंभ

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं॥ मुरारिमारादुपदर्शयंत्यसौसखीसमक्षंपु
नराहराधिकां॥११॥ रामकरीरागेरूपकताले॥ चंदनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्मणि
कुंडलमंडितगंडयुगस्मितशाली॥ हरिरिहमुग्धवधूनिकरेविलासिनिविलसतिकेलिपरे॥१॥ ध्रुपदं॥

संभ्रमेणालिंगनादरेणस्फुरद्योमनोहारीविलासस्तस्यत्लालसाऔत्सुक्यंयस्यतं॥ अनेकनारीविलासंवैदग्
ध्यंविद्यतेयस्यांश्रीराधायांलालसं॥ अन्यत्पदंपूर्ववत्॥ संभ्रमःस्नेहहर्षयोरितिविश्वः॥ आरादूरसमीपयो
रित्यमरः॥ नचविरहेप्रत्यक्षतासंभवतिसापुनर्नायिकानायकयोर्नसखीनामिति॥ अर्थांतरन्यासोलंका

२६

र॥११॥ एवंराधामाधवयोरहःकेलिंनिरूप्यइदानींसमुदायकेलिंगीतेनेवदर्शयति॥ चंदनेत्यादिना॥ गीतस्या
स्यरामकरीरागः॥ रूपकतालश्च॥ तालरूपंपूर्वमेवोक्तं॥ रागलक्षणं॥ स्वर्णप्रभाभास्वरभूषणाच्चनीलंबरा
लंसुतनोवहंती॥ कांतेपदोपांतमधिश्रितेपि मानोन्नतारामकरीप्रदिष्टाइति॥ गीतार्थमाह॥ हेविलासिनिहे
कृष्णेविहारत्रीते॥ पुनःयएतदितिशेषः॥ इहवृंदावनेवसंतेवामुग्धवधुनिकरेसुंदरवधूसमूहे॥ हरिर्मनोह
रोविलसतिक्रीडांकरोति॥ त्वांविनाक्रीडन्नपिनक्रीडतीत्यर्थः॥ कीदृशे॥ केलिपरेक्रीडापरायणे॥ अत्रमुग्
धवधूशब्देनकेलिपरशब्देनचहावभावाद्यनभिज्ञातासामान्यक्रीडापरताचव्यंजिता॥ विलासिनीतिसंबु
द्ध्यात्वय्येवसर्वकलासंपद्दर्शिता॥ विलसतिइतिसामान्यक्रीडेतिध्वनिः॥ कीदृशश्चंदनेनचर्चितंर्गसेविनी
लकलेवरंकेलिकलाकोशलेत्वेनीलमणीभूतंकलायस्मिन्॥ किंभूतोहरिः॥ वरेपीतवसनमालेयस्य॥ अ
थवा॥ त्वद्वियोगमसहमानएवचंदनेनचर्चिता अनुलुप्तानीलकलेवरःपीतवसनंचमालायस्यसः॥ ए
तेनत्वय्येवानुरागउक्तः॥ उक्तंच॥ अनंगनामदनवन्हिशिखावलीयासाबाधतेकिमिहचंदनचर्चितापि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥यत्कं भकारदहनोपरिपंकल्पस्तापाय तत्पुनरसौ ननु तापशान्त्यैइत्यादि॥तस्मात्त्वमेव विलोकयेति दूती
यती॥कीदृशो हरिः॥केलिसुरक्रीडासु चलंती कंपमाने ये मणिकुंडले ताभ्यां मंडितं गंडयुगं यस्य॥स्मिते नि
सिते नवाशाली शोभमानः॥स्मितलक्षणं च भरते॥ईषत्फुल्लकसिते गंडैः कटाक्षैः सौष्ठवान्वितैः॥अलक्षितं
द्विजं धीरमुत्तमानां स्मितं भवेदिति॥केलिचलन्मणिकुंडलेत्यादिना कुंडलान्दोलनं साकांक्षेन द्योतनासुकान्ति
दृश्यमानानंदनी तुल्याधिका चइति यस्मितं तेन नवशाली शोभमानो न तु नासां विलासेनेति भावः॥मुग्धा वधू रि
त्यत्र कर्मधारयः॥एतेन मौग्ध्यमेव न तु केलिकुशलता दर्शिता॥किं क्रीडत्यपि तु चेष्टां करोतीति अतएव त्वया
समक्षेण भवितव्यमिति मम प्रार्थना मुग्धः सुंदरे मूढयोरपीति विश्वः॥विलासो हाव विशेषः॥तात्कालिको वि
शेषस्तु विलासः॥क्रियादिषु इत्यमरः॥अथ कालेवरं गात्रं वपुः संहननमित्यमरः॥गंडौ कपोलौ वित्यम
रः॥स्वरूपो त्किरलंकारः विलासलक्षणं॥वास्थानासनादीनां नेत्रवक्त्रादिकर्मणां॥उत्पद्यते विशेषो यः
स विलासः भक्तीनितइति॥१॥ ७॥ ॥७॥ ॥

२८

व्रजवधूनां हावभावाद्यन भिज्ञत्वं कथयन्पुनस्तामेव युवतियूथलीलामाह॥पीनेत्यादिना काचिद्गोपवधूः
पीनपयोधरभारेणातिस्थूलस्तनगौरवाधिक्येन सरागं सस्नेहं यथा स्यात्तथा अथवा पीनोतीति क्षणपु
योधरयोर्भारस्तस्य भरेण स्वस्यापि भारभूतेन हरिं समाहरं परिरभ्याऽलिंग्य हरेर्गानानंतरं गायति न तु स्वयं
गायतीत्यवैदग्ध्यं स्फुटमेव॥श्रीरत्ना लिंगनेच्छां विनापि प्रथमं मालिंग्य शृंगाररसोभामावहतीति॥उक्तं
च॥विपदेशान्क्रियालापपरिरंभादि सेवनैः स्यादानंदप्रदा यूनोरूभयोरनुरक्तयोरिति॥कीदृशं हरिं॥सरा
गं तथ्येव कामभावेन स्नेहनवासानु रागं न तु सिंदूरादिरागसंयुक्तं॥एतेन तासामवैदग्ध्यमेव ध्वनितं॥
पुनः कीदृशं॥उदंचिलस्तोल्लातापनेनात्युदृं नीतः पंचमस्वरो येन तं॥शृंगारपंचमरागो न्यस्वरा बाहुल्य
नक्रियते॥अथवा पंचमरा ॥पीनपयोधरभारभरेण हरिं परिरभ्य सरागं॥ गानंतासां परी क्षार्था
यत्तदाल्हादजननाय चेति ॥गोपवधूरनुगायति काचिदुदंचितपंचमरागं॥२॥ ध्वनिः॥उक्तं च॥निषादं
ण रौति वाजी गावस्तृषभनाभिः॥अजाविकं तु गांधारं धैवतं बृहतं गजः॥षड्जं मयूरो ब्रुवते मृगा मध्यममाषिणः
पुष्पसाधारणे काले कोकिलो रौति पंचमं॥मैतिहास्य शृंगारयोर्योगे स्वरौ पंचममध्यमौ॥षड्जर्षभौ तथा वीरे

CC0. In Public Domain, Digitizagtion by eGangotri

कस्याश्चिद्वैदग्ध्यमाह ॥ कापीत्यादि ॥ कापिमुग्धवधूः मधुसूदनस्य वदनसरोजं मुखपंकजं ध्यायति ॥ समक्ष
स्य श्रीकृष्णस्य ध्यानाद्वैदग्ध्यमेवविज्ञायते कीदृशं विलासेन विभ्रमेन चेनेन विलोलयोश्चंचलयोर्वि
लोचनयोर्यत्खेलनं तेन जनितउत्पादितो मनोजः कामो येन तं पुनः कीदृशं मुखं ॥ अधिकमनुपममाधु

॥ कापिविलासविलोलविलोचनखेलनजनितमनोजं ॥
॥ ध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरोजं ॥ ३ ॥

र्यविलाससारं संक्षाद्दोहमित्यर्थः ॥ क्रियापदविशेषणं वा ॥ सौगंध्यादि गुणमधुरसेनका
मोद्दीपकत्वाच्च वदनस्य सरोजोपमा ॥ मधुसूदनपदं पूर्ववत् ॥ ३ ॥ ॥७॥

२८

कापीतिसामान्यकथनाय ध्यायतीत्यंगसंगाभावोदर्शितः ॥ मानश्चास्मिन्नवसरे त्वयागंतव्यमिति
कलाकौशलेनायं वचनीयं इतियथास्यात्तथाकपोलतले चुंबनं वृत्तवती ॥ कीदृशी ॥ किमपिलपितुंम
त्रयितुं वा कंदर्पवशाद्धैर्येणस्वचातुर्यरक्षणाय श्रुतिमूले कर्णमूले मिलिता संलग्ना व्याजेन ॥
लिंगनायचानामामृतं तत्कर्णमूलमेक्षिपुंवा ॥ अतएवोक्तं ॥ किमप्यनिर्वचनीयमिति ॥ नितंबवत्यनेन नी

॥ कापिकपोलतले मिलितालपितुंकिमपिश्रुतिमूले ॥ चारुचुचुंबनितंबवतीदयितंपुलकैरनुकूले ॥ ४ ॥

आलिंगनचतुरत्वोक्ता ॥ कीदृशं ॥ पुलकैरोमांचैरनुकूले नायिकामभिलाषसूचके ॥ पुलकोद्गमस्तु त्वंना
मश्रवणसात्विकादयात् ॥ चुंबनेनइत्यस्या अर्धात्त्वं संपादितं ॥ औत्कंठ्येनसहसाकांतमुखचुंबनं स
खीजनहास्यकरं भवतीतिभावः ॥ यदातत्कश्रवणेन जातपुलकोभवति तदात्वय्येवस्नेहमाचुर्यं ॥ तस्मा

[illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंसोहमान्तुयेरीत्यासंनुष्टां श्रीराधांसखीपुनराह ॥ हेरासरसे ॥ आश्चर्यंसखिकलय ॥ रासरसेगोपवधू
निकररतितोपियुवतिः श्रीराधेवप्रधानाचा तोस्तुना श्लाघितेत्यर्थः ॥ नृत्ययासहनृत्यपरा ॥ रासरसस्तुवेर
स्त्रीकदंबविनानंभव नीत्यमनोहरत्वेन निकरस्यात्तः ॥ अथवा ॥ हरिणासहनृत्यपराकाचित्युवति
स्त्वाप्रधानासंज्ञो ॥ ननुसाकथंतथान्यैरुत्तमरमणीयवस्तुनेनकस्यबहुमानइति ॥ अथवा ॥ रासेरास
क्रीडायांरसः ॥ बहुनर्त्तकीनृत्यविशेषागोषुक्रीडावा ॥ तस्मिन्हरिणासहनृत्यमात्रकुशलानतुसर्वक
॥ करतलतालतरलवलयावलिकलितकलस्वनवंशे ॥ रासरसेसहनृत्यपराहरिणायुवतिःप्रशंसेत्रो ॥ ५ ॥
मेसु ॥ एवमपितस्याउपहासः नैवंवप्रशंसासंज्ञाइतिध्वनिः ॥ कीदृशे ॥ करतलयोस्तालेनपरस्परंवादनेन
तरलाचंचलायावलयावलिः कंकणपंक्तितयाकलिता मिश्रितः कलस्वनः अव्यक्तमधुरशब्दसंहितोवंशो
वेणुर्यत्रतादृशे ॥ रासरसइत्यनेनगदुहक्रीडा स्वबसास्कनानतुसकलसंगीतकलास्वितिध्वनितं ॥ क्रम
भेदकरास्कालेनहेतुहरितालकइति विश्वः ॥ तरलश्चंचलखंडहारमध्यमणावपीतिहारावली ॥ रासेस्तु
गदुहक्रीडइत्यपिचे तिविश्वप्रकाशः ॥ स्वभावोक्तिरलंकारः ॥ ५ ॥ ॥ ७ ॥ २९

२ सखिरासविहारेतासांलदुकरीत्याश्राधान्यंताभिः ॥ किलिः तद्वारचान्वेषणायास्तिनतुतासांगौरवं ॥ उक्तंचात्र ॥
राधामाधायहृदयेतत्याजव्रजसुंदरीतिलद्वारवमेवाह ॥ श्लिष्यतीत्यादिना ॥ सः श्रीरुष्णचंद्रः कामपिरामांक्रीडा
स्वभावा श्लिष्यति आरुष्यालिंगनंकरोति ॥ कामपिरामांचुंबतिचिबुकोद्धृत्यचुंबनंकरोति ॥ कामपिरामांकुच
स्पर्शाधरपानमधुरवचनादिनारमयति ॥ भावगर्भितस्मितेनचारुतरां निरीक्षयन्मनोहरांपश्यत्यवलोकनं
करोति एवंतास्वभिमुखंनृत्यमानासुप्रीत्याश्लेषणालिंगनादिकंदृष्ट्वा अपरांवामांमात्सर्यस्वभावांमनोहर
स्वभावांवातामनुग ॥ ॥ श्लिष्यतिकामपिचुंबतिकामपिरमयतिरामां ॥ ॥ छति ॥ तत्सखीमनुनयार्थं कामपि
मनुगतिंकरोति ॥ अ ॥ पश्यतिसस्मितचारुतरामपरामनुगच्छतिवामां ॥ ॥ भवानहृच्चनमेवमकारेणवि
धायअपरानविधृतिपरान्यात्वत्सद ॥ री श्रेष्ठलांतांवामांकोपवतींस्वापराधशमनायानुगच्छतिव्वलात्कारेण ॥
लिंगनादिकेरुतेपिताभिर्नरुत ॥ मत्यवैदग्ध्यसूचितं ॥ तासांपरस्परवूलालिंगनादौश्रृंगाररसः पुष्टोभवतीति
ग्राम्यसुखेप्रसिद्धिः ॥ अतएवतासामपकर्षार्थं स्वोत्कर्षश्रृंगाररसपुष्ट्यर्थंच नायकवरातिकुलयागंतव्य
मितिसूचितं ॥ सुंदरीरमणीरामेतिविश्वः ॥ मुदासंक्रीडद्भिर्व्रजयुवतियूथैः परिवृतोनतोषप्राप्तोलिङ्कविदर्पिम
नाग्रेतनयः ॥ तदुक्तं ॥ तस्मिन्नेवसहचरिमनागन्यविषयेमनः कर्तुकोपेनवचरणपालकत्रारणे ॥ ६ ॥ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
३०

उ लीलांतरमाह ॥ केलिकेत्यादि ॥ काचिद्व्रजांगना अमुं श्रीकृष्णचंद्रं केलिकलाकुतुकेन क्रीडाविलासोत्पादक
व्याजेन कूलपदवस्त्रविषयकेणाहृत्य स्तनविषकर्षणं आकृष्टवती ॥ दुकूलगृहीत्वामुं विकर्षति किंचिद्ब्रुवंति ॥
कीदृशं नोज्ञवेतसमंदिरगतं ॥ नवध्या नायतदं चनायवारहः स्थितमिति सूचित ॥ कुत्राकृष्टवती यमुना
जलकूले ॥ यमुनाजलकूले विधानायाकृष्टवतीति ध्वनितं ॥ अत्रान्यासक्तस्य श्रीकृष्णचंद्रस्य स्वप्रिया ध्यान

॥ केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ॥
॥ मंजुलवंजुलकुंजगतं विचकर्ष करेण दुकूले ॥७॥

सक्तस्य वा ॥ वस्त्राकर्षणादस्या अधीरत्वं मुग्धत्वं च स्फुटमेव ॥ अनस्त्वाधरामृतपाने न त्वया संजीवनीय
इति मम प्रार्थना ॥ वंजुलो वेतसमृतइति विश्वः ॥ मनोज्ञं मंजुलमित्यमरः ॥ कुतुकं च कुतूहलमपि च ॥ दुकू
लं पट्टवस्त्रे स्यादतिसूक्ष्मांशुकेपि चेति विश्वः ॥ पर्यायोक्तिरलंकारः रसवदलंकारश्च ॥७॥ ॥७॥ ॥

३०

श्रीजयदेवेति ॥ श्रीजयदेवकवेः इदं गीतं शृण्वतां च शुभानि श्रीकृष्णस्य
उत्कलीलावैभव श्रवणफलमाह ॥ श्रीजयदेवेति ॥ श्रीजयदेवकवेः इदं गीतं शृण्वतां च शुभानि श्रीकृष्णस्य
रणात्कल्याणानि वितनोतु विस्तारयतु ॥ कीदृशं ॥ अद्भुतं अद्भुतार्थं अ द्भुतस्यरूपं वा आश्च
र्यकरं वा ॥ केशवस्य श्रीकृष्णचंद्रस्य केलिरहस्य क्रीडाहर्षेः ॥ क्रीडागोप्यं वायुतं ॥ अद्भुतत्वमेतदेव गोपवधू
दाक्षिण्यानुरोधेन क्रीडितं श्रीराधोत्कर्षख्यापनाय अन्यमुग्धत्वनिरूपणायेति ॥ अ थवा ॥ अद्भुतं युगपत्

॥ श्रीजयदेवकवेरिदमद्भुतं केशवकेलिरहस्यं ॥
॥ वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यं ॥८॥

व्रजनारीणां रत्युत्पादनात् ॥ केश्वेशश्च वशो यस्येति केशवः तस्य व्रजांगनावशीकरणं ॥ पुनः कीदृशं ॥ वृंदा
वनतामिवने ललितं नानारसान्वितं वन विहार क्रीडायुक्तं वा ॥ वलेः कामधेनुस्मरणात् ॥ वनविहार व्याजेन
श्रीराधान्वेषणचातुर्यसुत्कमिति भावः ॥ यशसे यत्रासे हितेयशस्करं वा यशः सहितं वा ॥८॥७॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकलश्रृंगाररससकलाभित्तस्य श्रीकृष्णस्य श्रीराधोत्कर्षप्रतिपादनायपूर्वंगीतद्वैवभावाद्युनभिज्ञाभिर्गोपीभि
र्यथलीलेवोक्ताइदानींश्रीकृष्णक्रीडोत्कर्षलदश्रमाह॥ विश्वेषामिति॥हे सखिराधेमधौवसंते हरिर्मनोहरणश्री
लः क्रीडतीत्यन्वयः॥कीदृशः॥त्वहिरहणमूढः॥यद्वामनोहरःत्वदागमनकांक्षयासुंदरः॥किंकुर्वन् विश्वेषांव्रजे
वधूनांसर्वजीवानांचानुरंजनेनानुरागेणानंदसंतापंजनयन्नुल्लासयन्॥पुनः किंकुर्वन्॥इंदीवराणांनीलकमला
य नांश्रेणयःपंक्तयस्तद्वन्नीलैः श्यामलैः कोमलैश्वसुकुमारैः श्रृंगाराणेर्वानंगस्यकामस्योत्सवंदर्पउपनयन्नुत्वापय
विश्वेषामनुरंजनेनजनयन्नानंदमिंदीवरश्रेणी श्यामलकोमलरूपनन्नंगरनेगोत्सवं॥स्वच्छंद व्र य
जसुंदरीभिरभितः प्रत्यंगमालिंगितः श्रृंगारःसखिमूर्तिमानिवम मुग्धाहरिःक्रीडति॥१३॥
भि न्॥कीदृशोहरिः॥स्वच्छंदंस्वेच्छयाव्रजसुंदरीभिरभितःसर्वतोभावेनप्रत्यंगंअंगंप्रतिइतिप्रत्यंगंआलिंगितः॥आ
श्रितःकयाचित्तांबूलस्रक्चंदनाद्युपस्थापनरूपे॥कयाचित्तुसस्मितकटाक्षानुरूपं॥कयाचित्तुरोमांचस्वेदादिरू
पं॥श्रृंगारस्यागमोश्रितइतिभावः॥अतइवमूर्तिमान्सागःश्रृंगाररसइव॥श्रीकृष्णस्यश्यामांगत्वेनश्रृंगार
रससाम्यं॥श्यामोभवतिश्रृंगारःश्रृंगार विशेषणान्यप्यलानिपदानि॥१४॥८७॥
शे

संगीते श्रोतृत्वकविराजिपदंददाति॥रासोल्लासेति॥हरिः श्रीकृष्णोवोयुष्मान्पातुरक्षतु॥कीदृशः॥स्मितेन
मनो मनोहारी॥स्मितोहारीवा पाठः॥स्मितेनेषद्धासेन शोकहरः॥हारीहारवान्॥पुनःकीदृशः॥प्रेमांधयासहच
रीवचनप्रेमपूरयाराधयागाढंयथास्यात्तथाउरोवक्षस्थलेआभीरवामभ्रुवांगोपवधूनांअभ्यर्णेप्रेपरि
॥ रासोल्लासभरेणविभ्रमभृतामाभीरवाम॥ सम्भि
रधया ॥ भ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधया ॥
॥साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुति॥
॥व्याजादुद्भटचुंवितःस्मितमनोहारी हरिः पातुवः॥१४॥
रभ्यालिंग्यरासक्रीडायांउल्लासभरेणहर्षातिशयेनगीतस्तुतिव्याजोगानप्रशंसाच्छलेनइतिव्याहृत्योक्तउद्भटं
यथास्यात्तथाचुंवितः॥इतीतिकिं॥साधुत्वद्वदनंसुधामयं॥किंभूतानांश्रृंगारविलासवतीनां॥अत्रानादरेषष्ठी॥ तू
ननुसाकथंत्वंके॥नश्रोक्तं॥प्रेमांधयेति॥ उद्भटचुंवनंकामसर्वस्वोक्तं॥तल्लक्षणं॥कांतंभुजाभ्यामालिंग्यप्रिय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सीप्रणया विना॥सशब्दं तुंबनिसु खंयन दुद्रुट मुच्यते इति सर्गे नटीकाकारोक्तिः॥वंदे युवतियूथस्थं रूत्वे
केलिकलानिधिं॥कालिंदीजलसंसिक्तं सर्वाभरणभूषितं॥१४॥ ॥श्री॥इति श्रीकृष्णचंद्रसेवकोदीच्या
भू वतंसशिवदासात्मज श्रीवनमालिभट्टविरचितायां वनमालिसंजीविन्यां श्रीगीतगोविंदटीकायां व्रज
युवतियूथकेलिवर्णने सामोददामोदरोनाम प्रथमः सर्गः॥१॥७॥

द्वितीये कथ्यते सर्गे श्रीराधाप्रणयोदयः॥सेर्ष्या कुंजांतर गता सखीं राधा समब्रवीत्॥१॥एवं पूर्वं गोपसीमंति=
नीयूथके लिसुत्कर्षमालाक्य विगलित निजोत्कर्षं वश्रीराधा सखीमाह॥विहरतीति॥श्रीराधा रहए कांते गोप्य
मपि वक्ष्यमाणं सखीसुवाचात्क वलीत्यन्वयः॥किं हरौ॥हरौ श्रीरसे वने विहरति क्रीडति सति॥ई ष्यावशे
नासहिष्णुतया अन्य स्मिन्कुंजगता॥पुनः कीदृशी॥क्वचितू कदाचिदपि लता कुंज लताछादिते कुंजे लीनात
द्वनागेनि अालुंगाढांधकारे कुंजमंदिरे निलीय स्थिता॥कुतः विगलित निजोत्कर्षात्॥विशेषेण गतो निजः स्वीय
जो विहारातवनेराधा साधारणप्रणये हरौ विगलित निकटी ष्यावशानगतान्यलेः॥क्व चिदपि लता
कुंजे गुंजन्मधुवलमंडलीमुखरशिखरे लीना दीनाप्युवाच रहः सखीं॥१५॥७॥
उत्कर्षो हरे रहमेव वल्लभा इत्येवं रूपस्तस्मात्॥किं भूते हरौ॥साधारणप्रणये श्रीराधायामन्यगोपीतुल्य स्नेहे॥अ
साधारण प्रणयं वेति छेदः श्रीराधा मत्तानान्यासु गोपीषु प्रीतिस्तस्मिन्॥कीदृशे कुंजे शब्दायमान भ्रमर समू
हत्वात् युक्ताग्रभागे॥अतएव दीना दुःखिनाविप्र लंभोयं विभावनालंकारः॥शिखरं त्वग्रभागे स्यात् माणिक्यप्र
भेरितिव्वेति धरणिः प्रणयः प्रमणि विश्रंभ इत्यमरः॥ईर्ष्यामाहुः समानेषु मानदानाद्यमर्षणमिति भरतः॥१५॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमर्षणेन किमुवाचेत्यतः संचरदित्यादिना श्लोकोक्तमर्थं गीतेनाह॥ गुर्जरीरागेण तिस्रठतालेन॥ रागलक्षणं पूर्वोक्तमेव॥ वृत्तत्रयेण॥ नव्यं॥ कंदर्पप्रतिमंठकइ तितालत्लक्षणं॥ हे सखि मम मनः कृतापराधमपि हरिं इह कुंजमंदिरे स्मरति॥ नन्वथा कृतकौतुसुमभंगः॥ खंड्यमानोपि सेवते॥ दोषाः किं नाम कुर्वं निगुणाय हृतचेत
विलासः सइति॥ कीदृशं॥ रासे रासक्रीडायां विहितः कृतः क्रीडायेन॥ ध्रुवपदं॥ पुनः किंभूतं॥ संचरता नानाप्रकारेण स्फु व
गुर्जरीरागे प्रतिमंठताले॥ ॥संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं॥ चलितदृगंचलचंचल
मौलिकपोलविलोलवतंसं॥ रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासं॥१॥ ध्रुवपदं॥
रताधरसु धाम धुरण ध्वनिना शब्देन मुखरितः शब्दितो मोहनो विश्वमनोहरो वंशो येन तं॥ पुनः किंभूतं चलि
तेनः कस्यचित्सूच्यावशेषेण सा लिक्तरसादयेन वा दृगंचलात् कटाक्षो यस्य चंचलश्चपलो मौलिः शिखंडाग्रभागो
यस्य कपोलयो विलोलश्चंचलावतंसो कर्णभूषणं यस्य तं कर्मधारयः॥ पीयूषममृतं सुधेत्यमरः॥ मौलिः की
रीटं केशाश्च संयतेनी मौलयइति॥ पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरेइत्यमरः॥१॥ ७॥

३३

नन्वेवं भूतः श्रीकृष्णस्तदा व्यासंगादिना न स्मर्त्तव्यः॥ सत्यं बलाद्वितृस्यायाति किं कर्त्तव्यं॥ कीदृशं चंद्रकेन विचि
त्रविन्देन चारूणां मनोहराणां मयूरशिखंडकानां मयूरपिच्छानां मंडलेन समूहेन वलयिता वेष्टिताः केशा येन
॥किंच॥ प्रचुरैः बहुभिः पुरंदरस्य इंद्रस्य धनुर्भिरनुरंजितश्चित्रितो मेदुरः स्निग्धो मुदिरः सानंदो जलदो
मेघस्तद्वत्सुवेशं सुंदरं॥ अत्र नानामणिखचितहारमुकुटकेयूरादीनामिंद्रधनुर्भिः साम्यमिति॥ उपमेये॥
॥ चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं॥ प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं॥२॥

श्रीकृष्णमेघ×स्य× साम्यं॥ शिखंडः पिच्छबर्हे तु नपुंसकइत्यमरः वेष्टितं स्याद्वलयितमित्यपि मुदिरः कामु
केंबुदइति विश्वः॥ वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रकेइति॥ सा मौ चंद्रकमेचकौ इत्यमरः॥ मयूरा व
र्हिणावर्हीत्यपि॥ मंडलं वर्तुले प्रोक्तं समूहे विग्रहेरवेः आवृत्तौ देशभागेपि मंडलं क्षुद्रभूमिकइति वैजयंती॥
भावोत्प्रेक्षा रूपकालंकारः॥२॥ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स व व

ननुश्रीकृष्णस्यानुरागरहितान्याभिः युवतिभिः सह क्रीडेतिकिमर्थंनुस्मरतीतिसत्यंसगुणवांस्तत्राह गोपे
त्यादिना॥पुनःकीदृशं॥गोपकदंबस्याभीरसमूहस्यानितंबवत्यः नार्यस्तासांमुखचुंबनेनलंभितःप्रापितो
लोभोयस्यतं॥अथवानितंबवतीभिःस्वमुखचुंबनेनलंभितो लोभोयेनतं॥तस्यतासुस्वभावउःस्ने
होनास्तिपरंतुबलात्कारेणताभिश्चुंबनेलोभःकारितइति॥किंबंधुजीवंतद्बंधूकपुष्पवत्मधुरमनोहरोयोधरप

गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं॥बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं॥३॥

ल्लवःपल्लवाकृतिरधरश्रेष्ठोयस्यतं॥यद्वा॥बध्नातीतिबंधुःप्रणयःतंजीवयतिसचासौमधुराधरपल्लवोयस्यतं
॥पुनःकीदृशं॥उल्लसितेनदेदीप्यमानेनस्मितेनेषद्धास्येनशोभायस्यतं॥यद्विबंधूकपुष्परागेणमधुराधरपल्ल
वाधररागेरंजितोभवतिसचस्मितकुंदकलिकयायुतोभवतितदाधरशोभमनुहरेदित्यभूतोपमेयं॥रक्तवस्तु
बंधूकोबंधुजीवकइत्यमरः॥सरसोथमधुःप्रोक्तोमधुराथमनोहरइत्यनेकार्थः॥पल्लवोस्त्रीकिसलयमपि॥

पुनःकीदृशं॥विपुलोविस्तीर्णःपुलकोरोमांचोयत्रताभ्यांभुजपल्लवाभ्यांपल्लववत्कोमलाभ्यांवलयितंवे
ष्टितंवल्लवयुवतीनांगोपवधूनांसहस्रंसमूहोयेनतं॥अत्रवलयितशब्देनावहयालोसांवेष्टनमात्रंनतुगाढा
लिंगनचुंबनादिकमितिभावः॥सस्नेहालिंगनादिकंतुतस्यमय्येवेतितात्पर्यमिति॥किंभूत॥योश्चरणयो
श्चोरसिचमणिगणानांसमूहानांभूषणानांकिरणेरश्मिभिर्भिन्नंविनाशितंतमिस्रंअंधकारोयेनतं

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं॥करचरणोरसिमणिगणभूषणकिरणविभिन्नत
मिस्रं॥४॥

॥अनेनप्रथमाभिसारसंगमेमदीयांगालंकारेणध्वांतनाशेनैवकुंठितमुखींमांदृष्ट्वाबलादानीयतांवेष्टितव
तवान्॥तंक्षणमपिविस्मर्तुमन्मनोनार्हतीतिप्रेमपराकाष्टादर्शिता॥स्वसौभाग्यातिशयोदर्शितइतिभावः
॥करचरणोरसीतिप्राण्यंगत्वादेकत्व... वेष्टितंस्याद्वलयितंवलयालिंगनेपि.वेतिकोशः...प्रदीप॥अं
धकारोस्त्रियांध्वांतमित्यमरः॥किरणोत्रमयूखोंशुरित्यपि॥४॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशं ॥ स्वोत्कर्षमेव प्रथयन् कथयंस्त्याह ॥ जलदेत्यादिना ॥ जलदपटलं मेघसमूहस्तद्वल्लसतो राजमानस्य इ
वलदिति पाठे वलन् ॥ स्फुरन् इंदो श्चंद्रस्य विनिंदकः स्वच्छो भासुरो यश्चंदनतिलकश्चंद्राकृति तिलकः ललाटे यस्य
तं ॥ पुनः कीदृशं ॥ गोपवधूनां पीनौ पीवरौ तीक्ष्णौ पयोधरौ स्तनौ तयोः परिसरस्य पर्यंतभागस्य प्रसरणशीलस्य वा
मर्द्दनेन निर्द्दयं दयारहितं हृदयमेव कपाटं कपाटवद्विस्तीर्णं हृदयं यस्य ॥ कपाटपदस्यायं भावः ॥ कपाटं प्रियधन

जलदपटलवलदिंदुविनिंदकचंदनतिलकललाटं ॥ पीनपयोधरपरिसरमर्द्दननिर्द्दयहृदयकपाटं ॥ ५ ॥

रक्षार्थमप्रियनिवारणार्थं दीयते ॥ अत्र श्रीकृष्णचंद्रस्य प्रियधने श्रीराधैव तच्च हृदये तिष्ठतीति तद्रक्षार्थं हृदयं क
पाटपदेन गृहीतमिति अर्थांतरन्यासोपमालंकारः ॥ उत्प्रेक्षारूपकं त्वेकं ॥ कपाटमररंतुल्यइत्यमरः ॥ पर्यंतभूः ट
परिसरइत्यपि कपाटं कुंचिका मतेघाति भवति यथा तथा मां विना तद्धृदयालिंगने सरइतिसूचितं ॥ मद्यातिः नाव
रिक्तानां कस्तु खं पाटयतीति वा कपाटशब्दार्थः ॥ ५ ॥ ७ ॥ ९ ॥ ३५
उद्घाटनं

पुनः स्वोत्कर्षप्राधान्यमेव वर्णयंत्याह ॥ मणिमयेत्यादिना ॥ पुनः कीदृशं ॥ मणिमये मणिखचिते मकर वन्
मनोहरे मणिमय मकरेण रत्नमयमत्स्येन वा मनोहरा भ्यां कुंडलाभ्यां मंडितौ भूषितौ गंडौ कपोलौ यस्य तं ॥
कीदृशं उदारं स्वलावण्यौदार्ययुक्तं ॥ तल्लक्षणं दशरूपके ॥ दानमभ्युपपत्तिश्च तथा च प्रियभाषणं ॥ स्वजने
च परे चापि तदौदार्यमुदाहृतमिति ॥ उदारपदेनेति ॥ यन्मया चिंतितं तत्सर्वं क्षणमवश्यं दास्यतीति सकथंचि

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं ॥ पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं ॥ ६ ॥

स्मर्त्तव्यः ॥ पुनः कीदृशं ॥ पीतं वसनं यस्य पीतवसनं वा अनुगता आश्रिता मुनयः शुकादयः मनुजाः परी
क्षिदादयः सुराः ब्रह्मादयः असुराः प्रह्लादादयस्त एव वराः श्रेष्ठाः वरा वृंदावननिवासिनो वा गोपीजनाः
परिवाराः सेवका यस्य तं ॥ अथवा सर्ववरः श्रीगोपीजनलक्षणः श्रीराधारूपो वा परिवारः सेवको यस्य तं
॥ स्वभावोक्तिरलंकारः रसवदलंकारश्च ॥ ६ ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः श्रीराधास्वातंत्र्यमेवाह॥ विशदेति॥ पुनः कीदृशं॥ विशदस्य स्वच्छस्य कदंबस्य तलस्तेः मूले मिलितं संत
गनंमदर्थमिदं कुक्षयागए वकदंबस्यतले मूले गत्वाम यासह क्रीडार्थं वा निलीय स्थितमितिभावः पुनः कलेः प्र
णयकलहस्य कलियुगस्य वा कलुषं यं साधारण व्रजवधूजनं तत्स्तमात्तिं शमयंतं नान्यथागत्यैव मम
प्रीतिर्नान्यासु इत्यादि प्रेमवाक्यैरित्यर्थः॥ पुनः कीदृशं॥ किमप्यनिर्वचनीयं तरं गडुरुच्छदनंगः कामो यत्र तया दृ
शादृश्या मनसा हृदयेन च मामपि रमयंतं॥ अतएव सकलकलत्रभिन्नं हरिं मे मनः स्मरतीति सूचितं॥ कलिः स्यात्
विशदकदंबतले मिलितं कलिकलुषभयं शमयंतं॥ मामपि किमपि तरंगदनंगदृशा मनसा रमयंतं॥७॥
श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं॥ हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपं॥८॥
लहेश्वरकलिरत्ययुगेष्वपीति विश्वः कलुषं चाविलं नसारिगितिच विभावनालंकारः॥७॥ गीतालंकसंग्रहेणाहश्रीजय
देवेति॥ श्रीजयदेवकवेः भणितं गीतं संप्रति सर्वदैव पुण्यवतां श्रीराधासदृशपुण्यजनानां हरिचरणस्मरणं प्रति
अनुरूपं योग्यं तल्लभ्यमित्यर्थः॥ नचैतदन्यैर्लभ्यमिति भावः॥ अतिसुंदरमोहनं व्रजवधूमोहकारि च॥ मधुरि
पोः दैत्यस्य... विसंतश्रीकृष्णस्य रूपं यत्र॥ कलौ बहूनां रागिणां शृंगारादिप्रवृत्तानां मनो यासैनेव

नन्वयं त्वां विहायान्यवधूभिर्विहरतीति नं किमिति त्वं वारंवारं स्मरसि॥ सत्यं गुणवान् विलासी चेत्याह॥ गणयतीत्यादिना॥ हे सखि मम मनः पुनरपि वारं कं कामम् अभिलाषं करोतीत्यन्वयः॥ अनेन मानशैथिल्यं अनुग्रहश्लो
कः॥ कीदृशं श्रीकृष्णं॥ युवतिषु व्रजवल्लवीषु चलं नीवर्धमाना तृष्णा अभिलाषा यस्य॥ अतएव मां विना विहारिणे॥

॥०॥ गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परितोषः दोषं विमुंचति दूरतः॥ युव
॥ तिषु वलतृष्णे कृष्णे विहारिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किं॥१५॥

क्रीडाशीले॥ यद्वा पूर्वं विहारिणि नेदानीं महद्दुःखमिति॥ कीदृशं मनः॥ वामं प्रतिकूलं॥ विरक्तानुरागित्वात्
॥ वामत्वं हेत्वंतरमाह॥ गणयतीत्यादि॥ तस्य सौंदर्यादीनां ग्रामं समूहं गणयति परिसंख्याति॥ न तु दोषलेशमपि
पश्यतीति तद्गुणस्वभावोऽयं वामत्वं पश्यत्यर्थः॥ भ्रामं क्रोधः भ्रमाद्धि भ्रमादपि नेहते न गच्छति किं तु प्रतिदोषं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टुं चेष्टां करोतीत्यर्थः॥ एतेन श्रीकृष्णगुणसमूहगानेप्यभावस्तन्मूलो मनश्चाग्लानिरिति ध्वनितं॥ तत्र कारणमा
ह॥ तादृशोपरि तोषं संतोषं वहति किंतु तद्दोषं मो मृतेन्यनायिकाक्रीडासंजातं हरिः सः दूरादपि मुंचतीत्यजति।
किंतु तद्गुणानेव पश्यतीत्यर्थः॥ तद्यथा॥ अरतिरिव समुपैति मानननिद्रा गणयति तस्य मनोरमणान्नदोषान्॥
विगलितरजनीनसंगमाशाव्रजलिततनुस्तनतां नवानुराग इति॥ श्यामस्वरे संवत्सरे च स्थिरे दंशकादिरूपके
इति विश्वः॥ श्यामः कोधरवांद्दीमवितिच॥ वामं सव्यप्रतीपके इति च॥ कामस्मरे भिलाषपीतिच॥ १५॥ ७॥

३८

एकतालीतालेमालवरागे॥ एकताली त्रिधा प्रोक्ता गीतशास्त्रविशारदैः॥ रामा च चंद्रिका नाव हिपुलेत्यर्थलक्षणं
॥ द्रुतमेकं भवेद्यत्र स तालः खंडसंज्ञितः॥ रामा तेन एकताली तु कीर्त्यते गायकोत्तमैः॥ रागलक्षणं पूर्ववदेव इदानीं ≡
विरहोत्कंठिता राधा सखीं प्रत्याह॥ निभृतेत्यादिना॥ उत्कंठितालक्षणं॥ उद्दाममन्मथमहाज्वरवेपमाना रोमांच
कंटकितमंगकमुद्वहंती॥ सस्वेदवेपथुघनालकलिकाकुलांगी सोत्कंठितां वदति तां भरतो मुनींद्र इति॥ गीतार्थस्तु॥

एकतालीतालेमालवरागे निभृतनिकुंजगृहं गतया निशि रहसि निलीय वसंतं॥ चकितविलोकितसकलदिशा
रतिरभसरसेन हसंतं॥ सखि हे केशिमथनमुदारं॥ रमय मया सह मदनमनोरथभावितया सविकारं॥ १॥ ध्रु॥

हे सखि मया सह केशिमथनं प्रशस्ताः केशा यस्य स केशी कामः॥ तस्मात्तु सौंदर्येण मथ्नाति क्षोभयतीति केशी त
स्य मथनः श्रीकृष्णस्तमिति। अथवा नायकसामर्थ्यख्यापनाय केशिमथनपदोपादानं॥ तं केशिमथनं मत्स्रममथनं
श्रीकृष्णं रमय क्रीडां कारय॥ कीदृश्या मया॥ निभृतनिकुंजगृहं गतया॥ एकांतनिबिडलताच्छादितमंदिरं प्रा

Dr. Urmila Sharma Collection, Varanasi

गी०री०
३८

सि

मया॥कीदृशं निशिरात्रौ रहसि एकांते निलीय तिरोभूय वसंतं निष्ठंतं तदवलोकनार्थं कुंजमंदिरगतामां दृष्ट्वा
ण साराधामामपश्यतुइतिकुर्वंमत्तस्ताडणायरहःस्थितमितिभावः॥सचकितं सभयं यथास्यात्तथा विलोकिता
दृष्टाः सर्वाः समस्तादिशोययाथायनवानयानेच्च॥श्रीकृष्णाभिसरंतीं मां कृष्णामार्गे मा पश्यत्विति सभयं सर्वदिक्षु दर्शः
नयतीतिभावः॥किंच॥रतिउत्साहरूभसोवेगःरसःशृंगाराख्यस्तेनहसंतं॥सुरतकालसमर्थ्यमग्रस्थितमपि ना
मोमियं पश्यतीतिहसंतमिति भावः॥ननु मयार्थितः॥श्रीकृष्णो नायोस्यतीत्यत्राह॥उदारं उदारस्वभावं॥ज
लएवत्वदंश्छितमवश्यंदास्यतीतिभावः॥कीदृश्या मदनस्य कंदर्पस्य मनोरथइच्छातद्युक्तयेतिभावः॥रत्याख्य
स्तज्ज्ञानयाथा मयावा॥तारकादित्वादितच्॥कीदृशं॥सविकारं मदनजनितविकारः संतापस्तेन सहितं॥
पदृष्टेनानेन परस्परानुरागजनितः शृंगाररसः पुष्टो भवतीति भावः॥आविताप्रासेनप्रासइतिविश्वः॥निभृ
तं संभृतं गुप्तइतियादवः॥रभसोवेगउत्साहइत्यमरः॥विभावनाविशेषालंकारः॥१॥७॥७॥७॥

३८

पुनः कीदृश्या॥प्रथमसमागमलज्जितया प्रथमसंगवज्ज्ञानलज्जया॥एतेनानयोर्माधुर्यातिशयः प्रत्यक्षकृत
नलंवनायिकालज्जादिगुणोपिसूचितः॥एनमुद्दिश्यागता कथमस्याग्रेयास्यामीतिलज्जा॥क्षणे क्षणे यत्नवेता
नि मुपैतितदेवरूपं रमणीयतायाइतिमाघः॥कीदृशं॥पटुनापिकायहरूपाणि यानिचाटुशतानि मधुरप्रियवचनशता
नितैरनुकूलमनुग्रहकारकमनुनयपरं वा॥नेयं चतुरेतिविज्ञाय चैरानुनयः कर्तव्यइतिभावः॥पुनः कीदृश्या॥मृ तु
दुकोमलं मधुरं कर्णामृतं स्मितमीषद्धास्ययुक्तं भाषितं येयस्यास्तया॥कीदृशं॥स्मितवचनादिनाशिथिलमापादि
प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं॥मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं॥श॥
तंजघनस्थितं दुकूलं पटवस्त्रं येन॥एतेन नायकचुडामणिःश्रीकृष्णस्तेनादेवहठं बध्वानीवीं स्वयमेव स्वलिताम्बर
वलंबितवाससे नेपिगृहीतमितिसूचितं॥उक्तं भारते॥कांतेतल्पमुपागते शिथिलितानिवी स्वयं बंधनाद्धिति॥उ
कंचरतिरहस्ये॥ओष्ठाग्रेस्फुरतोक्षिणिर्नलतःकुपादेरमत्स्यबद्धमिलः कुसुमाकुलेविगलितः श्रामोतिबंधपु
नः॥प्रच्छन्नोज्ज्वलस्तनौप्रकटतांश्रोणीतटंदृश्यते नीवीच स्वलतिस्थितापिसुदृढं कामेगितं योषितामिति॥ज
घनं कट्यग्रो भागइतिहारावली॥चाटुनरप्रियोक्तिः स्यादितिरत्नमाला॥रसवदलंकारोपि भावना॥२॥७॥

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृश्या किसलयशयनेन नवपल्लवरचिततल्पे सख्या श्रीकृष्णेन वा निवेशितया ॥ कीदृशं ॥ चिरममैवो
सि रःशयानं सुप्तं ॥ शयनमिति बहुकालालिंगनोपलक्षोक्तिति भावः ॥ पुनः कीदृश्या कृतेपरिरंभणचुंबनयया ॥ एतेन
जघनोपश्लेषणमोष्ठचुंबनंच श्रीकृष्णस्यनयाकृतमिति भावः ॥ तद्यथा पंचशायके जघनकलितकोलश्रोणि
रंगोपरिष्टात् ॥ व्रजति यदि नारी सा स्तके शोत्तरीयेति चुंबनमप्युक्तं ॥ ओष्ठेन कांतस्य मुखे युग्मं ×प× निनी

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं ॥ कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं ॥ ३ ॥

यजिह्वा विततास्तु भागमिति पुनः कीदृशं ॥ परिरभ्यालिंग्य कृतं मदीयाधरपानं येन ॥ एतेन स्त्रीत्वादिक्रमा=
लिंगनादिक्रमप्युक्तं ॥ यथा अन्योन्यसंसक्तं मुखं कपोलं नेत्रे ललाटं हृदयं च बाहू ॥ सानंदभावस्तमनीति
नासंलालाटिकं तत्वविदो वदंति ॥ कृताधरपानमिति सुरतप्रेमादिदाने नाप्याथनं ज्ञेयं ॥ ३ ॥ ७ ॥ ७ ॥ ७ ॥

कीदृश्या अलसे आलस्ययुक्ते निमीलिते मुद्रिते लोचने यस्याः सा तया ॥ एतेनांगिकः कामोत्सवः कथितः ॥ यथा
यत्र मूर्धानमारभ्य पादपर्यंतिकी क्रिया ॥ अंगेन विहिता यस्मात्तस्मादांगिकमुच्यते ॥ कीदृशं पुलकावलिरो
नो मांचो भावेनापि अयालक्षितो मनोहरः कपोलो यस्य तं ॥ एतेन सात्विकभावादयेन श्रृंगाररसस्यास्थिरता
कथिता ॥ भरतोक्तः ॥ स्मरणसंगमेनैव प्रियस्यालोकनेन तथा ॥ स्वेदः कंपो थ रोमांचस्वरभंगोथवेपथुः ॥ वैव

अलसनिमीलितलोचनया पुलकावलिललितकपोलं ॥ श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलं ॥
॥ ४ ॥

र्ण्यमश्रुप्रलयावित्यष्टौ सात्विका मताः ॥ कीदृश्या ॥ श्रमजलेन सुरतानंदस्वेदजलेन सिक्तं युक्तं पूर्णं वा कले
वरं शरीरं यस्याः सा तया एतेन सुरतानंदपूर्तिरुक्ता ॥ कीदृशं श्रीहरिं वरमदनमदादतिलोलं ॥ उत्कृष्टकामग
र्वादतिलोलं ॥ चंचलं सतृष्णं वा ॥ प्रवरश्रेष्ठथो वरिष्ठ इति विश्वः ॥ काष्ठकलेवरमित्यपि ॥ रसवदलंकार ॥ ४ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृश्या ॥ कोकिलस्य कलरवो ऽव्यक्तमधुरशब्दस्तद्वत्कूजितं शब्दितं यस्यास्तया ॥ कोकिलपुंस्त्वं पुरुषायितमभि
प्रायदर्शितं ॥ अनेन कूजितादयं बाह्यरतमुक्तं ॥ तदुक्तं पञ्चसायके ॥ पिकशिखिकलहंसप्रायपक्षिव्रजानां स्तनित
मनुकरोति श्लिष्टांगना मन्मथार्ता ॥ कीदृशं ॥ जितो ज्ञातो उल्लंघितो वा मनसिजस्य कामस्य तन्त्रा णां वात्स्यायनादयुक्त
कामशास्त्राणां विचारः सिद्धान्तो येन तं ॥ तन्त्रे वाक्यं ॥ आश्लेषं प्रथमं कुर्यात् द्वितीयं चुंबनं तथा ॥ तृतीयं नखदानं च दं
ष्ट्राघातं चतुर्थकं ॥ पञ्चमं संभ्रमं प्रोक्तं षष्ठं प्रहरणं तथा ॥ सप्तमं कंठशब्दस्य बंधनं वाप्यनंतरमिति ॥ तत्सर्वं विपरी

कोकिलकलरववचनजितया जितमनसिजतन्त्रविचारं ॥ श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारं ॥
॥५॥
तं जातं इति भावः ॥ उक्तं च ॥ रतान्ते प्रवृत्तस्यैव शास्त्रं न चक्रमइति ॥ पुनः कीदृश्या मया ॥ श्लथाः शिथिलाः कु
सुमैराकुला व्याप्ताः कुंतलाः केशा यस्याः ॥ कीदृशं श्रीकृष्णं ॥ नखैर्लिखितः क्षतो घनो निबिडः स्तनभारो येन ॥
अत्र लिखितपदोपादानात् पंकजपत्राख्यनखक्षतमुक्तं ॥ यथा अन्यूर्ध्वमुक्तस्फुरितोर्ध्वरेखं प्राहुः क्षतं पंकजप
त्रसंज्ञमिति ॥ तन्त्रप्रधानशास्त्रयोरिति विश्वः ॥ चिकुरः कुन्तलो वालः कचः केशः शिरोरुहइत्यमरः ॥ भारो भारेच ॥
सिद्धान्ते भारः स्थूलेपि वस्तुनि इति ॥ वैजयन्ती ॥५॥ ७॥ ७॥ ७॥

एवं सप्तधालिंगनादिकं बाह्यरतं चोक्त्वा इदानीं बंधांतरमाह ॥ चरणेत्यादिना ॥ कीदृश्या ॥ चरणयो रणितौ शब्द्य
मानौ मणिखचितौ नूपुरौ यस्याः ॥ एतेन भ्रमरिकानामविपरीतरतौ नायिका रतबंधविशेषो दर्शितः ॥ प्रो
क्तं पञ्चसायके ॥ चक्रवत् भ्रमति कुंचिताङ्घ्रिका भामकर्तृजघनं समुद्धिलइति ॥ कीदृशं ॥ परिपूरितो निष्पूर्णतां
नीतः सुरतवितानं रतिविस्तारो येन तं ॥ एतेन भ्रामरिकनायककर्तृको बंध उक्तः ॥ पुनः कीदृश्या ॥ मुखरा
शब्द्यमाना पश्चाद् विशृंखला त्रुटितमणिगुणा शिथिला च मेखला क्षुद्रघंटिका यस्यास्तया ॥ एतेन प्रेंखोलि

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं ॥ मुखरविशृंखलमेखलया सकचग्रहचुंबनदानं ॥
॥६॥
तं नामकं विपरीतरतमुक्तं ॥ स्वजघनमेव दोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलनाम ॥ कीदृशं ॥ सकचग्रहचुं
बनदानं ॥ केशग्रहणसहितं रतं चुंबनदानं येन यस्मै तिवा ॥ इदमपि विपरीतरतमेव ॥ तथोक्तं ॥ शृंगारे चुंबनं
कार्यं मुखालिंगनपूर्वकं विपरीतरते नार्या सकचग्रहचुंबनमिति ॥ शृंखला कुमुदे काञ्च्यवरोधे चक्रबंध
नइति विश्वः ॥ मेखला रशनाबंधे स्यात् काञ्च्यैशे लनितंबयोरिति ॥६॥ ७॥ ७॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंस्वोत्कर्षमुक्त्वाऽन्यनिलरताधिक्यमाह रतिसुखेत्यादिना॥ पुनः कीदृश्या॥ रतिसुखसमये सुरतकाले रत
सुखसमये रसालसा सानुरागा॥ सुरतश्रमेण निद्रारूपा वा उद्भट श्रृंगाररूपा वा तेनालसया सुतरां मंथरया वा॥ कीदृशं
॥ ईषन्मुद्रितं ईषदुद्घाटितं मंथरं नेत्रकमलं यस्य तं॥ अनेनो भयोः सुरतानंदो व्यज्यत इति ध्वनिः॥ तदुक्तं रति
ऊ रहस्ये॥ मूर्छनामीलनं चाक्ष्णोर निष्कलस्य लक्षणमिति॥ कीदृश्या॥ निःसहा रसमर्था किसलयपुष्पशय्यायां तेन नि
पतितानन्तुल नाशरीर लता यस्यास्तया॥ एतेन वसुर लांतविरतिरुक्ता॥ यथा भरते॥ अंगस्वेदः श्लथत्वं च क्लेश

मु रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं॥ निःसहनिपतिततनुलतया मधुसूदनमुदितमनो

जं॥ ७॥

वस्त्रादिसंवृत्तिः ज्ञातिर तिसुखनार्या विरामच्छा च जायत इति॥ पुनः कीदृशं॥ मधुसूदनमम माधरपानकर्तरि दे
आ त्यसूदने वा मुदितानंदं प्रापितो मनोजः कंदर्पो येन॥ उक्तं रतिरहस्ये॥ अवसानेष्विव धीतिरूपवैरूपस्सुता
सुविश्रंभकथा योगे रतिजनयतेपरां इति॥ किंच॥ षुञ् अभिषव इति धातुः अत्राभिषवः क्षीरोधाधरामृत
खंडनमिति लक्ष्यं॥ मधुसूदनपदं दैत्यपरं प्रसिद्धं॥ रसवदलंकारः॥ ७॥ ७॥ ७॥ ७॥ ४१

इदं जयदेवेन कविना भणितं शृण्वतां सुखं वितनोतु विस्तारयतु॥ अतिशयेन मधुरिपुनिधुवनं शीलं श्रीकृष्ण
सुरतक्रीडास्वभावो यत्र॥ कीदृशं॥ सुखेनोत्कंठितया गोपवध्वा श्रीराध याकथितं भाषितं॥ कीदृशं॥ श्री=

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुव
नशीलं॥ सुखमुत्कंठितगोपवधूकथितं वितनोतुस
लीलं॥ ८॥ ७॥

लक्ष्मं सलीलं श्रृंगारविलासलीलासहितं॥ अनेन व्रजवधूकदंबेरनास्वादितं श्रीराधासुरतमिति भावः॥
॥ ८॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णोत्कंठया सख्यानीतया राधयानया॥ उत्सारितनवधूर्वंदोहष्टः कृष्णो गतिर्मम॥ इदानीं सख्यानीय
मानाराधा सुवतिगणवृतं श्रीकृष्णं दृष्ट्वा परावृत्य स्वगतं सखीमाह हस्तेति॥ हे सखि अहं गोविंदं कानने
न्य पश्यामि दृष्ट्वा हर्षं करोमि॥ कीदृशं॥ व्रजसुंदरीगणवृतं न त्वं स्त्रीगणदृगं दृष्ट्वा कथं गेहमेष्यति आह॥ मा
मुद्वीक्ष्य दृष्ट्वा विलज्जितं अन्यगोपीगणवृतो हमनया दृष्ट इति संजातलज्जं॥ अथवा लज्जासहितेय

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिवद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं॥ मामुद्वी
क्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च॥१६॥ श्री

स्मितं लेदेवसुधामलमुज्वलत्वात् स्पृहणीयत्वाह्लादत्वात्तथा मुग्धं सुंदरमाननं मुखं॥ ललाटं त्रिवलीरत्वायु
तितं भंगमाह॥ तादृगाननं पश्यंत्याः कस्या मंदभाग्याया नानंदो भवेदिति भावः॥ किंच॥ युवतिगणवृतो
प्यात्मानं सापराधमिव मन्यमानो मत्तो विभेतीति मे हर्ष इति भावः॥ पुनः कीदृशं॥ हस्तान्मद्दर्शनेनस्र ४२

येन वा स्रस्तः स्खलितो विलासवंशः क्रीडावेणुर्यस्य तं॥ अधरामृतपानाय वंशो पि मद्भयात्स्खलित इति ध्वनिः
॥ पुनः कीदृशं॥ अनृजुः कुटिला भ्रूर्लता यासां व्रजवल्लवीनां गोपस्त्रीणां वृंदमुत्सारयत्यपसारयति॥ त
दृगंतं नेत्रप्रांतं वीक्षितमवलोकितं यस्य तं॥ मा मागतां दृष्ट्वा मद्भयाद्दृगंतचेष्टया गोपीरपसारयतीत्य
र्थः॥ पुनः कीदृशं॥ अतिशयेन स्वेदेनार्द्रं गंडस्थलं यस्य तं अनेन मद्दर्शनादेवांगे सानंदो जात इति ध्व
निः॥ सानुकूलश्च नायकः॥ प्रेंखो नामायमलंकारः॥ तल्लक्षणं॥ प्रतिप्रकाशनं यत्र तत्प्रेंखमभिधी
यत इति दंडी॥ लज्जित इति भावोक्तः॥ मामुद्वीक्ष्येति सर्वत्र॥१६॥७॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सखि धैर्यमावह मिलिष्यत्येव श्रीकृष्ण इत्याश्वासयंतीं सखीं प्रत्याह ॥ दुरालोक इति ॥ हे सखि ॥ दुरालोको दुःखेन आलोकयितुं शक्यः स्वभावेनापि स्तोकोल्पः स्तबकः गुच्छो यस्याः सा नवकानवा शोककारणत्वात् स्या विकाराः प्रकाराः ॥ किंच ॥ कासारः सरसी तदुपवनं च तयोः पवनोपि कमलाकरस्य रो वायुरपि व्यथयति पीडां करोति मामिति शेषः कासारोपवनाभ्यां शैत्यसौगंध्यमांद्यानीति ध्वनिः ॥ किंचैषु कूतानामाम्राणां श्रीगो

दुरालोकस्तोकस्तबकनवकाशोकलतिका विकाराः कासारोपवनपवनोपि व्यथयति ॥ अपि भ्राम्य

द्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥१७॥ ॥ ॥

वर्द्धन गिरौ स्थितानां मुकुलप्रसूतिः कुड्मलोपि न सुखयति न सुखं करोति ॥ किंप्रकाशाद्दशायां करिष्य तीति न वेद्मि ॥ कीदृशी ॥ शिखरे मौलौ वर्त्तमाना दूरादेव दुःसहेत्यर्थः ॥ पुनः कीदृशी ॥ भ्राम्यंतीनां भृंगीनां भ्रमरीणां रणितैर्गुंजितैः रमणीया मनोहरा स्तोकोल्पकइति विश्वः ॥ गुच्छस्तबक इत्यमरः ॥ का सारः सरसी सर इत्यपि ॥ स्त्रीरत्नमल्लिकायां शिखरिणीति ॥ आम्रश्चूतो रसाल इत्यमरः ॥ कुड्मलो मुकुले

सगंति श्रोतृन्प्रति कविराशिषमाशास्ते साकूत इत्यादिना ॥ केशवो हरिर्वो युष्माकं क्लेशं दुःखं हरतु ॥ ॥ कीदृशः ॥ नवस्तरुणोद्भूतनावा ॥ नाना माधुर्यादि भावत् ॥ पुनः मुग्धमनोहरः ॥ सुंदरसुंदरः ॥ मुग्धायाः राधायाः मनोहरणक्षम इति वा ॥ पुनः कीदृशः ॥ गमिता कां क्षः गमिताती श्रीराधायां कांक्षा अभि

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजामू

लार्द्धस्तनं ॥ गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनो

क्लेशानवः हरो हरतु वः केशवः ॥१९॥ इति श्रीगीतगोविंदे क्लेशाकेशवो नाम द्वितीयः सर्गः ॥२॥

लाषो येन ॥ किं कुर्वाणः किं कुर्वन् ॥ गोपीनां निभृतं गुप्तमभिप्रायं निरीक्ष्य कां क्षिदल्लभामंतर्मनसि चिरं चिंतयन् ॥ कीदृशं निभृतं साकूतं साभिप्रायं स्मितमीषद्धास्यं यत्र ॥ आकुलाकुलो लोलव्यस्तः गलद्धम्मिल्लः केशपाशो यत्र तदुल्लासितं भ्रूवल्लीकं ॥ जृंभमाणव्याजेनेत्यर्थः ॥ अलीकेनापि मिषेण दर्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिना गुंजा मूल्यार्धबाला र्धइति पाठः हस्ताः स्तनायत्र भुजा श्च हस्ताश्च स्तना श्चेति द्वंद्वः ॥ साकूतंसमये
प्रोक्तं साकूतं भाववीक्षणइतिमेदिनीकरः ॥ निभृतं तु रहस्ये स्यां निभृतं गुप्तमुच्यतइति धरणिः अली
कंकपटे प्रोक्तमलीकं सुमभावकं ॥ अलीकं निमित्तं × म × चवृथा भाषण कइति हलायुधः ॥ धम्मिल्लः
केशपाशे स्यादिति वैजयंती ॥ रसवदलंकारः ॥ १८ ॥ श्रीराधादर्शनादेव गतक्लेशो थमानसं ॥ पु
लकोल्लसरुचिरः क्लेशांहरतु केशवः ॥ वंदेव्रजजयति देवं माधवं वल्लवी प्रिय यमुनातीर कुंजेषु दृषभा
नुसुता रतं ॥ ॥ इति श्रीमत्कृष्णचंद्र सेवकादीन्यावतंस श्री शिवदासात्मज श्रीवनमालिना विरचि
तायां श्रीवनमालिसंजीविन्यां गीतगोविंदटीकायां क्लेशकेशवोनाम द्वितीयः सर्गः षष्ठः प्रबंधः ॥
॥ ६ ॥ ७ ॥

एवं सर्गद्वयेनोक्त्वा श्रीराधाक्लिष्टहरोपरा ॥ तृतीयेत थकृष्णेन तस्यां गुर्वी निरू प्यते ॥ १ ॥ श्रीराधायाः
श्रीकृष्णस्यापि श्रीराधायां गुर्वी रतिमाह ॥ कंसारीत्यादिना ॥ सुखं विषयजं न्यमपसारयति निजा
नंदप्रदानेन निजस्वरूपप्रदर्शनेन वा सकंसारिः श्रीकृष्णः संसारजन्यसकल विस्मारक इत्यर्थः
॥ ईदृशोपि श्रीराधाहृदये आधायारोप्य व्रजंती ति व्रजायुवतिसमूहास्तएव सुंदरीः सौंदर्यवतीर
पि तत्याज त्यक्तवान् ॥ कीदृशं संसरतीति संसारः कारागृहरूपत्तस्य वासनाबंधाय शृंखलामिव शृं

कंसारिरपि संसारवासनाबंधशृंखलां ॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः ॥ १९ ॥

खलां ॥ यथा कश्चिदवरुद्धः कारागृहराधां सिद्धिं प्राप्य हृदये तामाधाय तद्बलेन शृंखलां निगडं त्यजतित
द्वत् ॥ अथवा संसारवासनो भोगसंस्कार रूपा तस्याबंधस्तस्य कामपूर्तिकर्त्री मिव बहिः कश्चिद्दासस्य पू
र्वाभिलाषं करोति ॥ अथवा सम्यक् सारं संसारः प्रणयरसः ॥ श्रीकृष्णो वा तस्मिन् ॥ वासनाबंधाय शृंख
लावेणीव ॥ परमानंद अदत्वान् ॥ शृंखलांपुंस्कटीवस्त्रबंधेपि निगडे वेति विश्वः ॥ संसारः स्यात्तु जगति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्रजसुंदरीस्तत्याजेतितदुक्तं तं देवश्रीरुक्मचेष्टितसंतापमाह॥इतस्ततइति॥समाधवो मधुप्रियः क
लिंदनंदिन्याः यमुनायाः तटांतकुंजनीरसमीपलतापिहितोदरमंदिर विषसाद क्लेशभरेण तत्प्राण
यभरेण वा विषण्णो बभूव॥ किंकृत्वा॥इतस्ततस्तत्र कुंजेषु तां श्रीराधामनुसृत्यान्विष्य॥ तत्र हेतुः॥=

इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः॥ कृतानुतापः स कलिंदनंदिनी
तटांतकुंजे विषसाद माधवः॥ २०॥ गुर्जरीरागे मंठताले॥ हरिहरिहतादरतया गता सा कुपिते
व॥ ध्रुपदं॥ मामियं चलिता विलोक्य वृतं वधूनिचयेन॥ सापराधतया मयापि न वारिताति
भयेन॥ १॥ ७

अनंगस्य कामस्य बाणाः संमोहनादयस्तेषां व्रणैः क्षतैर्विपन्नं विषादयुक्तं मानसं यस्य सः॥ कीदृशः॥ कृतो
नुतापः कथं मया पूर्वमेव न स्तुतं त्यक्त्वा पश्चात्तापो येन सः॥ श्लोकद्वये नानुनोभयोस्तुल्योनुरागः प्रद
र्शित इति॥ कंदर्पो दर्पकोऽनंग इत्यमरः॥ भेरवस्य भावोक्तिरलंकारः॥ २०॥ श्रीरुक्मानुतापमेव गीतेन द

र्शयति॥ मामिति॥ गुर्जरीरागे मंठताले॥ ध्रुपदमिति॥ तल्लक्षणं पूर्ववत्॥ हरि हरीति मद्दुष्टं सा राधा हृ
तादरतया अनादरेण कुपितेव गता॥ ननु कुपितेव गतेति त्वया कथं ज्ञातमित्यत आह॥ वधूनिचयेन॥
गोपस्त्रीसमूहेन वृतं चेष्टितं मां विलोक्य दृष्ट्वा इयं चलिता॥ ननु सा गच्छंतीति किमिति त्वया
न निवारिता॥ सापराधतया अपराधो राधां विहायान्यवधूक्रीडारूपस्तद्युक्ततया मया अतिभ
येनातिशय भीत्या न निवारिता॥ मात्रा श्रुतिरलंकारः हरिहरिकष्टं दुतचेतियादवः॥ १॥ ७॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ सा राधा चिरं चिरकालं विरहेण वियोगेन किं करिष्यति॥ किं वदिष्यति मम दोषमदोषं वा वदिष्यति॥
नन्वन्यगोपवधूनिकरं विहाय कोयं तस्या माग्रह इत्याह॥ किं जनेनेति॥ श्रीराधां विना मम गोपवधूनिचये
नान्यजनसमूहेन वापि जनेन किं लग्निहरेण धनेन नन्दजो नित विचित्र भोगाभरणादिना वा किं॥ ननु धनमं
तरा गृहसौख्यं न स्यात्तत्राह॥ गृहेण किं मम गृहेण किं तदृयोगे सर्वमग्रह मित्यर्थः॥ ननु गृहं विना सुखं कथं
किं करिष्यति किं वदिष्यति सा चिरं विरहेण॥ किं जनेन धनेन किं मम किं गृहेण सुखेन॥ २॥ चिंतया
मिनदाननं कुटिलभ्रूरोषभरेण॥ शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण॥ ३॥ ७॥ ७॥ ७॥
तत्राह॥ नहि रहेष्ट हृतसुखेन किं सेवम मसुखस्ये ति भावः॥ इयं स्मृत्यारव्यावस्थोक्ता॥ २॥ एवं तां विना धनादी
नं दुःसह भद् त्वसुकाइदानीं तु पिनाया स्तस्या आनन चिंतनं मे जीवन मितिदर्शयति चिंतया भीति॥ अहं
गदाननं चिंतया मिस्मेरामि॥ कीदृक्॥ रोपभरेण कोपातिशयेन कुटिलवक्रे भ्रुवौ यत्र किमिव॥ उपरिभ्र
मता संचरता भ्रमरेणाकुलं शोणप ह्ममिवारक्तकमलमिव॥ अनेन कोपारक्तं मुखं प्रसादयितुं भ्रुवोः

क

तामेव माधुर्येणाह अहं तां राधां मनसि वारं वारं भृशं मनसि चिरायेन रमयामि क्रीडयामि॥ कीदृशीं॥
हृदये संगतां संनिहितां॥ किं मिह वने तु सरामि तस्या अनुसरणं करोमि॥ इह वने वा किं वृथा
विलपामि किं मिति वृथा विलापं करोमि॥ हृदयसंनिहितत्वात्॥ नहि गृहे नष्टं वने मृग्यते॥ ६॥
तां रुदितेक्ष्य स्वापराधं क्षमयति॥ तन्वीति॥ हेतन्वि विरहपरां गीं॥ तव हृदयमसूयया म
तामहं हृदि संगतामनिशं भृशं रमयामि॥ किं वनेनुसरामि तामिह किं वृथा विलपामि॥ ४॥ त
न्वि खिन्नमसूयया हृदयं तवा क   लयामि॥ तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि॥ ५॥
दोषारोपेण खिन्नमाकलयामि जानामि॥ सहजापराधभयं मयि किमेतत् खेदमित्युद्वेगावस्थो
क्ता॥ यथा यस्मिन्नर स्यं अरस्यं वा स्यान्न हर्षाय किं तु नेत्युद्वेग इति॥ किंच॥ सापराधेन मया त
वप्रार्थना युक्ता तन्न वेद्मीति॥ त्वं कुतो हृदया न्निर्गता सि नैतद्वेद्मि तेन हेतुना तेनुभ्यं नानुनया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संप्रति नावनूयात्तु हीअत्यगो नत्याह ॥ दृश्यसइ निपुर तो धगता गतं यातायात मेव विदधासीति
दृश्यसे हे सुंदर धुरे वपूर्व मिव मे मम संभ्रमं सादरं परिरंभणं आलिंगनं किमिति नददासि पुरा अ
थ ॥ अयं भावः ॥ अंतर्बहिर्वर्तमानाना रसद सेवाह दृश्यात्कथं मे वदति ॥ ६ ॥ पुनश्च ध्यानेन प्राप्तामि
व तात्क्षमापयति ॥ मवेह शं विप्रि येंकृतायिकदा ॥ चिदपिन शरोमिनकरिष्यामीति अ
मे दृश्यसे पुरतो गतागत मेव विदधासि ॥ किं पुरे वरसंभ्रमं परिरंभणं ददासि ॥ ६ ॥ क्षम्य न
तामपरं कदापितत्त्व दृश्यं न करो मि ॥ देहि सुंदरि दर्शनं मम मन्मथेन दुनो मि ॥ ७ ॥ वर्णि
तं जयदेवकेन हरेरिदं प्रणतेन ॥ किंदुबिल्वसमुद्र संभव रोहिणीरमणेन ॥ ८ ॥ ७ ॥
परमपराधं क्षम्यतो क्षमस्व ॥ इयमुन्मादावस्थोक्ता ॥ पुनरति विवेकः कथयति मम दर्शनं देहि
यतो हं मन्मथेनकामेन दुनो मि संतप्तो भवामि ॥ अपराधबहुत्व मन्म मतिपष्ट ॥ अथवा ॥

मन्मथो मामेवदहतु न तु त्व मिति ॥ त्वदर्थमेव जीवन मिति स्नेह परा काष्ठा दर्शिता ॥ अत्रो त्सुदान्
स्वोक्ता अत्र स्मिंस्त दिनिष्यां निउन्मादाविरहोद्भवति ॥ नवमो नालंकारः ॥ संभ्रमः स्नेहहर्ष
योरितिविश्वः ॥ ७ ॥ गीतार्थ संग्रहेणाह ॥ वर्णितमिति ॥ स्वार्थिकः ॥ जयदेवकेन इदं हरेश्चरितं
वर्णितं ॥ कीदृशेन ॥ प्रणतेन हरि परायणेन ॥ किंदुबिल्वं नाम जयदेव गोत्रं ग्रामो वा स एव समु
द्रस्तत्र संभवो यस्य तादृशेन रोहिण्याः पद्मावत्याः रमणेन चंद्रेणेव ॥ यथा समुद्राद्रुत्पन्नः रोहि
णीरमणश्चंद्रस्तथा किंदु बिल्वोत्पन्नो जयदेव इति ॥ चंद्र पक्षे रोहिणीप्रसिद्धा ॥ सुंदरी रोहिणी
प्रोक्ता चंद्र भार्या च रोहिणी ॥ रोहिणी नंद भार्या च व सुदेवांगने तिवेति विश्वप्रकाशः ॥ उत्प्रेक्षा
रूपालंकारः ॥ ८ ॥ ७ ॥ ७ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधांस्वापराधं कुकामदनं प्रत्याह हृदीत्यादिना हे अनंग अंगरहित गगन भिन्न॥ हरभ्रांत्या श्रीरुद्र
भ्रमेण मस्मिन प्रहर माप्रहारं कुरु॥ किंच॥ क्रुधा क्रोधेन किमिति धावसि॥ क्व हृते मयि॥ प्रियारहि
ते॥ श्रीराधाविरहिते॥ यद्दिरहात् ग्राह सतनः त्वन्नामारणादि मिति कराघी ति भावः॥ हरभ्रमोपिन॥
सप्रियासहिताहं प्रियारहितइति॥ भ्रमबीजमपि निरस्यति॥ हृदयं बिस लतायामृणालस्य हा

हा हृदि बिसलताहारो नायं भुजंगमनायकः॥ कुवलयदलश्रेणी कंठे न सा गरलद्युतिः॥ मल
यजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंगक्रुधा किमु धावसि॥ २१॥

रः हृदि रहः स्थाने धृतो न भुजंगमनायकः सर्पराजो वासुकिः किंचायं कुवलयदला नां नीलकमल
पत्राणां श्रेणिः स्तापशांत्ये धृता सा गरलद्युति विषकालिमा॥ किंच इदं मलयरजश्चंदनरेणु नेदं भस्म
विभूतिः न हिरहवशात्॥ सर्वथा वैपरीत्यं आत्मिति भावः॥ भ्रांति नामाय मलंकारः॥ सएवायमि

पुनः कामो मां ताडयिष्यतीति भयेन कुसुमविशिष्य पिधेयं दैन्यं करोति॥ पाणा विति हे मनसिज मदन अ
मुं चूतसायकं आम्रमंजरी पाणो मा कुरु किंच॥ चापं धनुर्मा आरोपय॥ क्रीडया नितरां जितं विश्वं ये
न तत्संबुद्धिः॥ मूर्छिता जनानां घातेन मारणेन किं पौरुषं पुरुषार्थः॥ कुत्सितं वा पौरुषमपि
तुन॥ तस्या एव मृगीदृशः हरिणीदृशः प्रेंखतः प्रसरं गायेन कटाक्षा एव आशुगा बाणास्तेषां श्रेणीभिः

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरु
षं॥ तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितं मनो मनागपि मनो नाद्यापि संधु
क्षते॥ २२॥

पंक्तिभिर्जर्जरितं खंडितं मम मनो द्यापि मनागीषदपि न संधुक्षते न स्वच्छं भवति॥ किंच॥ पिष्ट
पेषवन्मनसिजस्यैतदनुचितमिति भावः॥ किंच॥ लीलया विश्वं जितं ये न तत्स्वजनेषु प्रहरणं
यशो हानिर्न च पुरुषार्थ इति ध्वनिः सायकः शरः खड्गयोरिति विश्वः॥ अथा स्थियो धनुश्चापानि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु श्रीराधाकटाक्षादिस्मरणादेव तव दुःखं को वै कामस्यापराधः तत्राह ॥ भ्रूपल्लवमिति ॥ किमित्य
व्ययं संदेह आक्षे- पे वा ॥ तस्यां श्रीराधायां स्मरेण कामेन त्वत्प्राणघातार्थमिति तर्कयामि ॥ किंभूत्य
र्धमर्पिता नितत्कटाक्षैरेव जगज्जितं इति ध्वनिः ॥ कीदृशानि जितानि जगंति येस्तानि ॥ किंच ॥ तैरे
वास्त्रैर्जगत्त्रयं जित्वा तस्यामेव न्यस्तानि इति भावः ॥ किमित्यन्यत्र न स्थापितानि इत्याह ॥ अनंगेति ॥ अ

भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण ॥
तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि
॥२३॥

नंगस्य कामस्य जयाय गमनशीलदेवतायां तद्रूपीकरणाधिष्ठात्र्यामिति सूचितं ॥ तानि का- नीत्य
पेक्षायामाह ॥ भ्रूपल्लवमेव धनुः नीलस्निग्धत्वात् ॥ अपांगतरंगितानि अपांगतरलकटाक्षा बाणाः
श्रवणपालिः कर्णप्रांत एव गुणः प्रत्यंचा इति ॥ रूपकोयमलंकारः ॥२३॥ ६७॥

इदानीं श्रीराधांगविलासस्मरबाणरूपाणि मां व्यथयंति ॥ कामस्तु निमित्तमात्रमेव तमपि विहाय भा
वनयात्रैव स्थितमेव त्वां श्रीराधां संबोध्याह भ्रूचापइति ॥ हे तन्वि रूढांगि ॥ तव भ्रूचापरूपे
धनुषि निहितो र्पितः कटाक्षविशिखः कटाक्षरूपो बाणो मम मर्मव्यथां मर्मपीडां तावत् प्रथमं नि
श्चितं करोतु ॥ बाणस्य प्राणापहरणमेव वृत्तमिति भावः ॥ किंच ॥ कबरीभारोपि वेणीसंचयोपि

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां श्यामात्मा कुटिलः करोतु कबरीभारोपि मारोद्यमं
॥ मोहं तावदयं च तन्वि तनुतां बिंबाधरो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति ॥२४॥

दर्पनिवासत्वान्मारोद्यमं वियोगिनां मारणाय कामस्य उद्यमं उद्योगं मत्प्राणहरणेन करोतु ॥ तत्र हे
तुः ॥ श्यामात्मा कुटिलश्च ॥ यो अंतर्मलिनः कुटिलश्च भवति सोन्यवधार्थं प्रवर्तत इत्युचितमेवायं व्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

याजनकलात्॥ किंच॥ अयं बिंबाधरो बिंबफलद्युतिरधरोपि मोहं मूर्छां तनुतां विस्तारयतु बिंबायाः
क्षुधिहरं त्वं न सिद्धमेव॥ सद्योक्षुधिहरा बिंबेति॥ एतद् पि युक्तं॥ तत्रा प्ययं रागवान्॥ रागआरक्त
मो तादृह रागवानहान्॥ योरागवानस परप्रतारणाय हं करोत्येव॥ किंच॥ सद्वृत्तः साधुवर्तुलः॥ स्त
नमंडलः कुचायोमम प्राणैः कथं क्रिमिति क्रीडति प्राणनाशं करोति॥ सद्वृत्तस्य परप्राणपीडन मु
नुचितमिति॥ विरोधनामायं अलंकारः॥ विशिखस्तोमरेशरा इति विश्वः॥ श्यामं निंदितरूस्मयो
रितिधरणिः॥ आत्मादहम नोब्रह्मस्वभावबुधिर्दृ तिष्वि तिविश्वप्रकाशः॥ कबरीकेशपाशाइत्य
मरः॥ मारोसतो विषनं गैपिच॥ बिंबफलेच बिंबायाः प्रतिबिंबेच मंडलइतिच॥ रागोनुरक्तोमात्स
र्येइतिच॥ वरिते वर्तुलेवृत्तमितित्रिकांडशेषः॥२४॥७॥७॥७॥

५०

इदानीं तस्याः स्मरस्य न कोप्यपराधस्तदंगसंगाभावान्मे चेतसि दुःखमिति भावेन याऽ स्थितां दृष्ट्वाताभाह॥
गानीति॥ स्पर्शसुखानि तदंगस्पर्शसंभवानि तानि पूर्वमनुभूतान्येव॥ एतेन त्वगिंद्रियसुखमुक्तं॥ किंच॥ दृशः
ग्र चक्षुषो विभ्रमविलासास्तरलाश्चंचलाः स्निग्धाः प्रेमग ताः स्तएवमया नायिकायामनुभूताः॥ पूर्वये॥
एतेन चक्षुर्विषयसुखमप्युक्तं॥ किंच॥ तस्याव क्त्रांबुजसौरभं मुखपद्मामृतसौगंध्यं तदेव यत्पूर्वमनुभू
तं॥ एतेन घ्राणलाभ उक्तः॥ किंच॥ गिरां वचसां वक्रो भावः॥ सुख॥ कीदृशः॥ सुधास्यंदी अमृतइव कः यु
तानि स्पर्शसुखानि तरलाः स्निग्धादृशो विभ्रमाः स हक्त्रांबुजसौरभं सच सुधास्यंदी गिरां वक्रिमा॥
सा बिंबाधरमाधुरी तिविषयासंगे पिचेन्मानसं तस्यां लग्नसमाधि हंतविरहव्याधिः कथं वर्द्धते॥२५॥७॥
पि एतेन नायिकायाः शब्दमाधुर्यमुक्तं॥ किंच॥ सा बिंबाधरमाधुरी बिंबसदृशस्योष्ठस्य माधुरी मधुरता सेवया
पूर्वमनुभूता तस्याः एतेन लावण्यमाधुर्यमुक्तं॥ इत्येवंप्रकारेण स्पर्शादि पंचानां विषयासंगेपि सा निश्चयपि
तस्यां श्रीराधायां मानसं मम मनः लग्नं समाधिमालेकायं वेत्तथापि हे लरवे दम हल्कष्टं वा॥ विरहव्याधिर्वि
योगरोगः कथं किमिति वर्धते॥ भ्रमश्चायं अलंकारः॥ रूपरसगंधस्पर्शशब्दाश्च विषयाइत्यमरः॥२५॥७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संप्रत्याशिषमाशास्तेतिर्यक्कंठे ति॥ मधुसूदनस्यदैत्यनाशकस्यमधुपानकर्त्तुर्वाकटाक्षोर्मयः कटा
क्ष सिंधुतरंगा वोयुष्माकं क्षेम मभीष्टंददतु श्रयेछंतु॥ कीदृशाः॥ राधामुखेंदोराधामुखचंद्र समुद्रेदुग्ध
नृस्यंदं चलनं वे संभ्रमणा वकंदलिताः प्रवृत्ताः॥ कीदृशाः॥ राधामुखेंदोराधामुखचंद्र समुद्रे दुग्धनृस्यं

तिर्यक्कंठविलोलमौलितरलोत्तंसस्यवंशोच्चरद्दीप्तिस्थानस्खलावधानललनालक्ष
ल क्षै रसंलक्षिताः॥ संमुग्धंमधुसूदनस्यमधुरेराधामुखेंदोम्रदुस्यंदंकं
दलिताश्चिरंददतुवः क्षेमंकटाक्षोर्मयः॥२६॥इ०गी० गो० मुग्धमधुसूदनोनाम टि

दंचलनंनेत्रभ्रमणावकंदलिताः प्रवृत्ताः॥ कीदृशे संमुग्धंमधुरे सुष्ठुमुग्धंतन्मधुरंयत्र॥ कीदृशाः वंशा
दुच्चलत्सुवर्णो निर्गछत्सुगीतिस्थानसुगानपदेषूत्कावधानेर्द त्ते ता भिर्ललनालक्षै र्गोपवधूसमू
हैर्नसंलक्षिताः नाज्ञाताः दृष्टाः॥ कीदृशस्य॥ तिर्यक् त्रिभंगललितः कंठोयस्यविशेषेण लोलश्चपलः

मौलिः शिखिशिखासमूहो मुकुटोवलोयत्र॥ नरलोचंचलोउत्तंसोयस्य॥ कर्मधारयः॥ रूपकालं
का --- रः॥ गीतिर्गानसुभेसेमइत्यमरः॥ उत्तंसः कर्णपूरेपिसुंदरेनायिकेपिवेतिधरणिः॥ कंदलंतुन
वांकुरः॥ ऊर्म्मिः पीडालवोत्कंठेतिच॥ २६॥ श्रीराधिकावियोगाधिव्याकुलंव्रजमोहनं॥ भजामिप
रमानंदं बल्लवीगणसंवृतं॥ ॥इतिश्रीमत्कृष्णपदसेवकोदीच्यावतंसश्रीनिवासात्मजवनमा
लिभट्टविरचितायांवनमालीसंजीविन्यांश्रीगीतगोविंदटीकायांमुग्धमधुसूदनोनाम तृतीयः
सर्गः सप्तमः प्रबंधः॥७॥७॥७॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयेविरहावस्थालक्ष्मस्यो क्रा प्रियांप्रति॥ चतुर्थे विरहावस्थां तस्यास्तत्र निवर्ण्यते॥१॥र हः कामोघि कोयस्यास्वाराधिकातलसखीवासंती श्रीमाधवश्रीकृष्णंप्रत्याहवक्ष्यमाणसूत्रे॥कीदृ शी॥प्रेमभरेणप्रेमाधिक्ये नोद्धांते चेष्टाशून्यंतद्ध्यान निष्ठ वाउद्विग्नं वा॥ एते नोद्वेगावस्था अन्य क्रियामंदचेष्टा चसानुरागता चोक्ता कीदृशं यमुनायाः नीरवा नीरकुंजे वेत्रलतागृहे मंदं

यमुनातीरवानीरकुंजे॥निमंदमास्थितं॥प्राहप्रेमभरो द्धांतंमाधवंराधिकासखी ॥१॥

स्वैरं अमंदं सवेगं वा आसीनं॥कथंमदनुग्रहं करिष्यतीतिभावः॥यमुनातीर वानीर निकुंजपदैः कृतांतम गिनीदाहाधिकान्वेषणकामाधिकेनाक्रमेणसूचिता॥मंदखलेमंदगतेमूर्खद्दतिवि श्वः॥वानीरं वेतसे प्रोक्तं जंबुकद्दतिशाश्वतः॥रसवदलंकारः॥ प्रशंसाश्लोकः॥१॥७॥७॥

कर्णाटकरागेएकतालीताले॥रागलक्षणं॥कृपाणपाणिर्गजदंतपत्रमेकंवहन्दक्षिणकर्णपूरे॥सं स्तूयमाणैः सुरचारणौघैः कर्णाटकरागः शिखिकंठनीलः॥तालक्षणंपूर्वमेवोक्तं॥ अत्रचनायि कालक्षणं॥वासकसज्जाव्यासमुत्कंठा स्वाधीनभर्तृकातथा॥कलहांतरिताताचापि विप्रलब्धाभिसा

कर्णाटकरागेएकतालीताले॥ ॥निंदतिचंदनमिंदुकिरणमनुविंद ति खेदमधीरं॥व्यालनिलयमिलनेनगरलमिवकलयतिमलयसमी रं॥साविरहेतवदीना माधवमनसिजविशिखभयादिवभावनयात्व यिलीना॥१॥ध्रुप०॥

रिका॥खंडिताप्रोषितावापिनाम्नाह्यष्टसंमता॥तत्रसमुत्कंठितालक्षणंभरते॥यस्याःसमुचि तेप्यन्हिप्रवासीनैववल्लभः॥सा स्मरानलसंतप्ताविरहोत्कंठितामतेति॥सखीपुनरंगीकृत्येनदर्शय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ति॥ निंदतीत्यादिना॥ हेमाधव मधुप्रियसा राधा विरहे वि श्लेषे दीना दुःखिता अतएव दाहकत्वात् चंदनं इंदु किरणं च निंदति॥ अधीरं बहु खेदकष्टं यथा तथा विंदति प्राप्नोति॥ त्वं हर हेदाहकोपि दाहकत्वेन जानाति इति ध्वनिः॥ किंच॥ चंदनपवनवायुसर्पनिवासस्य संसर्गेण सविष मिव कलयति मन्यते कीदृशी॥ कामबाण भयात् आसलइव भावं च प्रियं प्रति नयनीति भावना ध्यानं तेन त्वयि लीना लग्ना कामबाणा मामवद हंतुं नेम त्रिय मिति ध्यानं कुर्वन्त्वेन करोती ति भावः॥ शंबरारिर्मनसि

ति जइत्यमरः॥ धीरसु कुसुमे स्व त्स्वेनु धैर्यवती विश्वः॥ग रलं नु विषपाने गरलं तु त्रिमूलकइत्यपि॥ व्यालो भुजंगमे क्रूरश्वापदे दंतिनीति विश्वः॥ उत्प्रेक्षोपमालंकृती॥७॥ ८॥ ७॥

५३

हेलया भवतो रक्षणाय जलसहितं कमलिनीपत्रसमूहं स्वस्य हृदयरूपे मर्मस्थाने विन्यासं वि

लं स्तीर्णं वर्म कवचं करोति॥ कस्मादिव॥ अविरं निरंतरं योनिपतितो मदन शरः कामबाणस्तस्मादिव पूर्वं त्वयि लीना प्यशांति मलभमाना हृदयं त्वद्रक्षणार्थं कवचं करोतीति भावः॥ अनेन स्नेहाधिक्यं

अविरलनिपतितमदनशरादिव भवदवनाय विशालं॥ स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं॥२॥ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं॥ व्रतमिव तव परिरंभसुखाय करोति कुसुमशयनीयं॥३॥ वहति च चलितविलोचनजलधर माननकमलमुदारं॥ विधुमिव विकट विधुंतुददंतदलनगलितामृतधारं॥४॥

दौत्यनिपुणता चोक्ता॥ उत्प्रेक्षालंकारः॥ अवनं रक्षणे प्रीता विति विश्वः॥२॥ किंच कुसुमशय्यां तव परिरंभसुखाय आलिंगनाय व्रतमिव करोति॥ कीदृशं कुसुमवि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञिरवस्यकामस्यवाराणां तल्पमास्तरणं यत्र॥ अनल्पविलासचक्रला मिलद्रुतरक्रीडाभिः कमनीयं सुंदरं॥ व्रतफलपरिपाटिः तल्पं तुरावनीयं स्यात्तल्पं मनेद कलत्रयोरिति विश्वः॥ नियमो व्रतमस्त्रियामित्यमरः॥ दीपकालंकारः॥ ३॥ व्रतमुपेदानीमतिसाहसमाचरन्तीति कथयति॥ वहतीत्यादिना॥ साउदारं सुखकमलं वहति धारयति॥ प्रेमाश्रुणा सहजं करतलेन च॥ कीदृशं॥ चलितेन तन्मुखावलोकनाय प्रसारितेन लोचनेन एवं जलधरो यत्र॥ एतेनेर्ष्यादयो मृदुलत्वं च सूचितं॥ किमिव विधुं चंद्रमिव॥ कीदृशं चंद्रं विकटैः करालैर्विधुंतुदस्य राहोर्दंतैर्दलनेन खंडनेन गलिता प्रच्युतामृतस्य धारा यत्र॥ अत्र सुखं विधुना नेत्रजलममृतधारया सहोपमा॥ अत्र विधुंतुद एव काम इ× मः क्षीणबलः दंतैस्तन्मुखं दलतीति ध्वनिः॥ निकटः सुंदर प्रांशो विशालविकरालयो इति विश्वः॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुद इत्यमरः॥ ४॥ ८॥ ८॥

५४

किंच हे स्मसाराधारहसे कांते कुरंगमदेन कस्तूर्य्या भवंतं विलिखति॥ एतेनानुरागमालिन्यमुक्तं॥ कीदृशं॥ कामरूपं किंच॥ लवकरशरं धृत्वा धामकर मत्स्यं कंदर्पवाहनं विनिधाय प्रणमति नमस्करोति॥ कीदृशं नवचूतं नूतनोमांकुरं॥ नव पूजनं स्ला त्वामेव याचत इति भावः॥ यथा देवतापूजनं कुर्याद्यथा हलिभुजेव लिलिखितोनप्रलिष्ठे पाठ्येशुकसारिका मितिवचनं॥ अथवा॥ कोपएव प्रणामः श्रीरूपएव प्रणामं करो

विलिखति रहसि कुरंगमदेन भवंतमसमशरभूतं॥ प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं॥ ५॥ प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं॥ ६॥

ति हारावली॥ ५॥ किंच॥ उन्मादावस्थामेवाह॥ प्रतिपदमिति॥ सा प्रतिपदं प्रतिचरणं क्षणं च इदं निगदति अति शयेन विलपति॥ हे माधव मधुप्रिय तव चरणे हं पतिता त्वामेव नमस्करोमीत्यर्थः॥ किंच॥ इति सुधानिधिश्चंद्रोपि त्वयि विमुखे परा ... ङ्मुखे सति मयि सपदि शीघ्रं तनुदाहं शरीरतापं तनुते विस्तारयति॥ त्वितिनं प्रेरयतीति भावः॥ मृगनाभिर्मृगमदः कस्तूरीगंधश्चोपरइ विरोधालंकारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ उन्मादावस्थामुक्ता किल किंचेतेनाह॥ ध्यानेत्यादिना॥ ध्यानलयेन चिंतनपरत्वेन भवंतमतीवदु
रापं अतिद्रायं नदुःप्रायं पुरोग्रे परिकल्प्य कृत्वा शोकेन विलपति॥ प्रेम्णा हसति स्नेहाधिक्येन विषीद
ति॥ रोदिति विरहेण॥ क्वचित् निगच्छति त्वदन्वेषणाय॥ अनुरंजनेन तापं दुःखं मुंचति त्यजति॥ शोक

ध्यानलयेन पुरः परिकल्प्य भवंत मतीवदुरापं॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापं
॥७॥ श्रीजयदेव भणितमिदमधिकं यदि मनसा नटनीयं॥ हरिविरहाकुलवल्लवयुवतिसखीवचनं
पठनीयं॥८॥७॥

रोपा ध्रुवपदैः संकरः॥ किल किंचित मिति॥ दीपकालंकारः॥७॥ गीतार्थसंग्रहे णाह॥ श्रीजयदेवे
ति॥ श्रीजयदेवभणितं कथितमिदमधिकं मतिशयेन यदि यदा मनसा चिंतनेन नटनीयं पठितव्यं तदा
हरिविरहेण॥ श्रीरत्न विरहेण व्याकुला वल्लवयुवतिर्गोपयुवतिः श्रीराधा तत्सखीवचनं पठनीयं॥

गीतगोविंदटीकासहितमूलपाठः॥

एवं सा त्वं विना कुत्रापि नानंदं लभतइति प्रलपति॥ आवासेति हे कृष्ण त्वद्विरहेण आवासो गृहं
विपिनायते अरण्यमिवाचरति॥ किंच॥ प्रियसखीमालावल्लभसहचरीसमूहोपि जालवद्बंधने
लेन म[ ]नीयते॥ तापोपि विरहाद्भवसंतापो॥ श्वसितेन श्वासेन दावदहनज्वालावली वाचरति॥
किंच॥ हंतकष्ट त्वद्विरहेण सापि हरिणीरूपायते कामशार्दूलकृतान्मृगीवाचरति परिभ्रमति॥
आवासो विपिनायते प्रियसखीमालापि जालायते तापोपि श्वसितेन दावदहनज्वालाकुलायते॥ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन शार्दूलवि
हा कष्ट कथं वा कंदर्पोपि कामोपि यमायते त्वद्विरहेण कृतांतवदाचरति॥ एतेन कामस्य संतापकर्तृ
स्य त्वमुक्तं॥ किं कुर्वन्॥ शार्दूलस्य व्याघ्रविक्रीडितं क्रीडां विरचयन् कुर्वन्॥ मृगीमरणं व्याघ्रादेव भ
वति तद्वदत्रापि॥ एतेनोद्वेगावस्थोक्ता॥ तल्लक्षणं॥ अभीष्टसंगमाभावाद्व्याधिः संतापलक्ष
णः॥ शार्दूलोरास्वसेन्याघ्रेप्युभेदेऽतिचिम्बः॥२७॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नेदेवगीतेनाह॥देशाखरागेएकतालीतालेन॥रागलक्षणं॥आस्फोटनाद्विः स्तरोमहर्षो निपुणद्विसं
बद्धचित्रालबाहुः॥मांशुभवंडपुनिरिंदुगौरोदेशाखरागः किलमल्लमूर्तिरिति॥तालेलक्षणंउ
क्तमेव॥ध्रुपदं॥ हेकेशवसारा धिक्कालवविरहसलिलशानतुरितिकेतोस्तनविनिहितं स्तनध
तमपिउदारं मनोहरं सुंदरमपिवयादलमपिहारंभारंमनुते॥ तद्दूरगरसमर्थत्वात्त्वयाकर्तव्यमिति
देशाखरागेएकतालीताले॥स्तनविनिहितमपिहारमुदारं॥सामनुतेरुशतनुरतिभारं॥रा
धिकाविरहेतवकेशव॥ध्रुपदं॥१॥सरसमसृणमपिमलजयपंकं॥पश्यतिविषमिववपु
विसंकं॥२॥
भावः॥विरहजनितव्याधिमाह॥सरसमिति॥मलयजपंकंचंदनलेपंसरसमसृणं आर्द्रं चिक्कण
मपिकर्पूरादिसहितंवादेहेसंशोकःसहितं विषमिवगरलमिवपश्यति॥एतेनजीवितानामनिसा
हसकरातीतिध्वनिः॥मसृणः कर्कशः स्निग्धइतिमेदिनीकरः॥ पंकः कर्दमयापयोरितिविश्वः॥२॥

किंच॥सातवविरहेश्वसितपवनं श्वासवायुंमदनमिवकामाग्निमिववहतिधारयतिविरह
वायोरग्निदाहकत्वात्॥कीदृशं॥अनुपमपरिणाहं उपमारहितःपरिणाहोदैर्घ्यंयत्र॥कीदृ
शं॥सदाहंदाहसहितंपदहनदाहः श्येश्वासाधिक्यंचसूचितं॥३॥ किंच॥दिशिसानय
ननलिननैत्रजमवादिशिदिशिजलरागमनकोशया विकिरतिक्षिपति॥कीदृशं अश्रुसमूहंस
श्वसितपवनमनुपमपरिणाहं॥मदनदहनमिववहतिसदाहं॥३॥ दिशिदिशि
विकिरतिसजलकणजालं॥नयननलिनमिवविगलितनालं॥४॥७॥७॥
हितं॥कीदृशं विगलितनालमिवगलितदंडमिव॥तापबाहुल्यात् अश्रुसंभाषणाभावः॥सू
चितइति॥किंचभवदागमने च यानयनपद्मेर्दिग्मंडनं करोतीतिभावः॥विरोधालंकारः॥
उद्वेगावस्थेयं॥४॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥नयनविषयमपिनेत्रगोचरमपिकिसलयतल्पं पल्लवदलाभ्यां विरचिततल्पं ग्निसं देहं कलयतिस्पर्शेनजानातीत्यर्थः॥ एतेनहृष्टस्पृष्टवस्तुस्वनिशरीरितं दूरेहेसासुखप्रदं नजाना तीतिध्वनिः॥उद्वेगावस्था विराधालंकारश्च॥५॥ किंच॥ सासाधरंत्यैवासमयकरतलेनकपोल गंडस्थलंनत्यजति॥ कीदृशं॥ अलोलं निश्चलं॥ दिन सलुमहता कष्टेननीतःरात्रिः युगस तोप

नयनविषयमपि किसलयतल्पं कलयतिविहितहुताशविकल्पं॥५॥ त्यजतिनपाणितलेन

हरिरिति कपोलं॥ बालशशिनमिवसायमलोलं॥६॥ हरिरितिजपतिसकामं॥ विरहविहितमरणे न

वनिकामं॥७॥

माकथंनेतव्येतिभावः॥ कमिवप्रतिपच्चंद्रमिव॥ अर्द्धकरतलाछादनेनमुखस्यबालचंद्रसाम्यंसूचि तं॥सायमित्यत्र॥जडतावस्थेयं॥यत्रध्यायतिनिःसंगंजडतासाप्रकीर्तितेति॥६॥ किंच॥सापि कामममितिशयेनसकामंसातिशयंहरिरितिवारंजपत्यावर्त्तयति॥ननुत्वांहरिमत्वो मे स्मरति किंतुत्वां

वारं

गीतार्थसंग्रहेणाह॥श्रीजयदेवेत्यादि॥इत्यनेनप्रकारेणश्रीजयदेवेनभणितं××मुक्तं॥श्रीराधासखीगीतंश्रो तृन्केशवपदंप्रतिसुखयतु॥केशवपदंवैकुंठंश्रीवृंदावनंवाप्रत्युपनीतंप्रापितमुपनीयमानं॥केशवप दंवक्षस्थलंवास्थानंनिकुंजगृहंवा॥पदंस्थानेपदंवाक्येपिसंनिधिव्यवसाययोरितिविश्वः॥८॥इदानींविरह

श्रीजयदेवभणितमितिगीतं॥सुखयतुकेशवपदमुपनीतं॥८॥ सारोमांचतिसीत्करोति

विलपतिकंपतेताम्यतिध्यायत्युद्भ्रमतिप्रमीलतिपतत्युद्यातिमूर्छत्यपि एतावत्यत

नुज्वरेवरतनुर्जीवेन्नकिंतेरसात्स्वर्वैद्यप्रतिमप्रसीदसित्वक्तेत्यकोन्यथाहरुकः॥२९॥

रहव्याधिसंतप्ताधवंमरिष्यतीतिसूचयन्नाहसेतिसाराधारोमांचितदेहाभवति॥सीत्करोतिसीत्कारंकरो ति॥विलपतिविलापंकरोति॥उत्कंपतेसकंपाभवति॥ताम्यतिग्लानियुक्ताभवति॥ध्यायतिध्यानंकरोति॥ उद्भ्रमतिभ्रांतिंप्राप्नोति॥प्रमीलतिनेत्रप्रमीलनंकृत्वासुखमनुभवति॥पततिशय्यायांगच्छति॥उद्याति

Dr. Urmila Sharma Collection, Varanasi

गी॰टी॰
५८

अभ्युदयमनंकरोति॥ नस्त्रीति म्लं शोभा भाति॥ एतैः क्रियावेदेरपि अपदुःखगुणकीर्तनवियोगग्ला
निम्लानि समागमाभ्युपगमनउद्वेगमूर्छा क्रमेण ज्ञाः॥ हस्ववैद्य प्रति मञ्जु भिन्नी सुकुमारतुल्यरता
वस्थितान्मात्रे अनङ्गज्वरे कामयादिलवरतनुः सुकुमारांगः प्रसीद सिद्ध सत्नो भव सिंचत्त हिंतव सा॥
द्वा रसोल्लस्यंगाररसात् औषधा ध्रु किं न जीवति अपितु जीवेदेव॥ अन्यथा प्रकारांतरेण लस्याह स्तकः
वैद्या नौरूपा विरोध्यः त्यक्तः न जीवदेव यथात्यक्तरूपा विरोधि रोगिणां लक्त स्तथा स्यास्त्व मित्यर्थः ह
स्तकः वृत्यन्तत्य योरीति विजयंती॥ हेतु कि रलंकारः॥ २८॥ ७॥

५८

[illegible] संप्रति शिथिल भयं लिसुनयंती स्मरेत्याह हे देवूतं वैद्यदेववैद्य मनोहर॥ त्वं स्मरातुरां काम संतसां राधां वि [illegible]
[illegible] मुक्त बाधां त्यक्त पीडां न कुरुषे न करोषि यदा न दा पद्द वज्ज्राद पिक ठोनासि॥ यथेंद्रो वज्रेण वृत्रहतवान्त [illegible]
[illegible] बालवल्लभामिति ध्वनिः॥ ननु औषधाद्या धनदानादि पिव्याधीनां प्रतीकारः कर्तव्यः॥ किमये त्याह॥ हे [illegible]
[illegible] धसुदर त्वदंग संगए वास्त तंजीवनोपाय सौनसा ध्याप्रणिकार्या॥ हृद्यामुभयत्र॥ हृद्यमनोहरस्तके हृद्ये [illegible]
स्मरातुरां देव नवैद्य कृद्यत्वदंगसंगामृतमान्सा ध्या॥ विमुक्त बाधां कुरुषे न राधा मुपेद्र वज्जादपिदा
रुणासि॥ २९॥ कंदर्प ज्वर संज्वर तुरतनः राश्वर्यमस्या श्विरं श्वेतश्चंदन तुद्रमाः कमलिनी चिंता
सुसताम्यति॥ किंतु क्लांते रसनशीनत्लतनुं त्वामकमेव थियं ध्यायंती रहसि स्थिता क्षणमपि क्षी
णाक्षणं प्राणिति॥ ३०॥ वहृदयप्रियं इति॥ २९॥ नन्वन्यैः शीतलोपचारैः कामशांतिः कर्तव्या किंम
[illegible] दत्युपहेणत त्रावे परीत्यं कंदर्पेति॥ आश्चर्य महाश्चर्य श्वेतश्चित्ते चिरं चिरकालं वदनादीनां चिन्तारुज्म
[illegible] रणप्युपि किं पुनहे रूपसुंला म्यति ग्लानिं तापं वा प्राप्नोति॥ लब्द्रूरहुआदाइ कदाहकजमतो युलड्इति भाव
[illegible] मन्वीदृशा सा कथं जीवति कीदृशी रहस्य वांत क्षणमपि स्थिता॥ कीदृशी क्षीणा क्षीणांगी कीदृशा ला [illegible]

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वेतावन्तं कालं जीवितासि अपि न मरिष्यति किं महत्त्वं मरणे तित्राह ॥ क्षणमितिपूर्वं श्रीराधया पुरा संगदशायां रहसि एकांतेनैव न विरहः क्षणमपि न सहनं सोढः ॥ कीदृश्या ॥ नेत्रनिमेषमात्रविरहखिन्नया अधुना दुःखया असावेवं गता श्रीराधा रसालशाखासु पुष्पितासु पुष्पितशिखरां विलोक्य चिरं विरहेण नि

क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते ॥ श्वसिति क
थमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ ३॥ ७॥ ७॥

रकालवियोगेन कथं केन प्रकारेण श्वसिति जीवति ॥ श्वासमात्रेण जीवनं न तु वयवादिप्रचलनमि ति भावः ॥ पुष्पितायामितिवसंतागमन उद्दीपनहेतुः कामोद्योतत्वं चिरिति ध्वनिः ॥ श्वसिती ति परमसाहसा चरणमिति सूचितं ॥ विरोधालंकारः ॥ ३॥ ७॥ ७॥

५९

संप्रति श्रीराधावलंबनाय भक्तावलंबनाय वा कविवाक्येन सखी श्रीकृष्णबाहुं स्तौति ॥ वृष्टीति गोपत नोः श्रीकृष्णस्य बाहुर्भवतः श्रीराधालक्षणस्य च ॥ शुश्रुषाः सखीवृन्दे श्रेयांसि विरहव्याधिनाशका नि कल्याणानि तनोतु विस्तारयतु ॥ कीदृशस्य ॥ कंसद्विषः दैत्यवैरिणः ॥ सखीपक्षे ॥ श्रीराधाविरहे
वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोवर्धनं बिभ्रद्वल्लववल्लभाभिरधिकानंद
धरोञ्चुंबितः ॥ दर्पेणैव नदर्पिताधरतटीसिंदूरमुद्रांकितो बाहुर्गोपतनोस्तनोतु
भवतः श्रेयांसि कंसद्विषः ॥ इति श्रीगीतगोविंदे स्निग्धमधुसूदनो नाम चतुर्थः
॥ ३२॥ सर्गः ॥ ४॥

ण सुखवैरिण इति ॥ वा ॥ बाहुपदं श्रीराधालिंगनार्थमिति भावः ॥ कीदृशः ॥ दृष्ट्वा व्याकुलस्य दुःखितस्य गोकुलस्य गोसमूहस्य अवनं पालनं स एव रसः रागः ॥ वीर्यं वा तस्मात् गोवर्द्धनपर्वतमुद्धृत्य चिरं सप्ताहं बिभ्रन् दधत् ॥ कीदृशो बाहुः वल्लववल्लभाभिर्गोपसुंदरीभिरधिकानंदात् हर्षात् धरः शासरसादोगो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वईनो धरणसमयेवानुंबितः॥ पुनः कीदृशः॥ दर्प्पेण कंदर्पगर्वेणेवताभिरर्प्पितादत्ताअधरतद्रए
वसिंदूरस्यमुद्रा सिंदूरस्यचिन्हानितैरंकितः॥ अधरलोहितत्वात्संभोगचिन्हांकितइत्यर्थः॥ तयाश्रीरा
धयानुरागनेति 'निहितइतिवासरवीपक्षे॥ ३२॥ तंवंदे परमानंदंमाधवं भक्तवल्लभं॥ श्रीराधासरवी
वाक्येनप्रेम्णावपरिपूरितं॥ १॥ ॥इतिश्रीमत्रूपनचंद्रसेवकोदीच्यावतंसश्री शिवदासात्मजवन
मालिभट्ट विरचितायां श्रीवनमालिसंजीविन्यांगीतगोविंदटीकायांस्नि ग्धमधुसूदनोनामच
तुर्थःसर्गः॥ ४॥ छ॥ छ॥ छ॥

पंचमेप्रेमजनितं तद्विश्लेषविचेष्टितं॥ निशाम्यप्रेषया मासवत्सरवींचतदंतिकं॥ १॥ संप्रतिश्री
कृष्णनियुक्तासरवीराधामाह॥ अहमितिइत्येवंमधुरिपुणा श्रीकृष्णेननियुक्ता प्रेरितासरवीपुनः
श्रीराधांस्वयमेवगत्वाइदंवक्ष्यमाणं जगादोवाचइतीतिकिं॥ हेसरिव त्वंयाहिगच्छ॥ इहकुंजेदुः
अहमिह निवसामियाहिराधामनुनयमद्वचनेनचानयेथाः॥ इति
मधुरिपुणासरवीनियुक्तास्वयमिदमेत्यपुनर्जगादराधां॥ ३३॥ छ
रवस्रवणात्तुगंतुमशक्तोहं निवसामितवप्रतीक्षांकरिष्यामि॥ ननुसामानवतीस्वयमेवगत्वा
प्रार्थितांकृतापराधेनमयासमक्षंवक्तुंनशक्यते॥ अतएवत्वंमद्वचनेनानुनयशांतमत्स
मीपंचानयेथाः॥ आनयस्व॥ विनावनालंकारः॥ ३३॥ छ॥
भा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वराडीरागेरूपकताले॥ध्रुपदं॥अत्राभिसारिकेयं॥तस्याः लक्षणं॥लज्जां हित्वा समाकृष्य यैव
नेनू मदनवा॥अभिसारयते कांतं कीर्तितासाभिसारिकाइति॥रागलक्षणं॥विनोदयंती दयि
तं सुकेशी सुकंकणश्चामरचालनेन॥कर्णे दधाना सुरपुष्पगुच्छं वरांगनेयं कथिता वराडीति॥ता ना
वराडीरागेरूपकताले॥वहति मलयसमीरे मदनमुपनिधाय॥स्फुटति कुसुमनिकरे वि
रहिहृदयदलनाय तव विरहे वनमाली सखि सीदति॥ध्रुपदं॥१॥दहति शिशिरमयूखे
मरणमनुकरोति॥पतति मदनविशिखे विलपति विकलतरोति॥२॥ध्वनति मधुपस
मूहे श्रवणमपि दधाति॥मनसि चलितविरहे निशि निशि रुजमुपयाति॥३॥छ
ललक्षणं आगे बोल्के॥श्रीकृष्णस्य विरहाद्रुक्माह॥वहतीत्यादि॥हे सखि राधे तव विरहे वियोगे वन
माली सीदति दुःखं ते॥भवति वनस्य जलस्य वा माला लालीति अनेन त्वां विना हे गावस्थेति ध्वनिः
॥कस्मिन्सति॥मदनं कामं उपनिधाय समीपवर्तिनं कृत्वा मलयसमीरे मलयानिले वहति स ६१

ति॥किंच॥विरहिणां वियोगिनां हृदयदलनाय मर्मपीडनाय कुसुमनिकरे पुष्पसमूहे स्फुटति
विकसति सति॥त्वया धरामृतेन संजीवनीयइति मम प्रार्थना॥१॥नंदकिशोरस्यावस्थांतरं स
खी राधां प्रत्याह॥दहतीत्यादि॥हे राधे श्रीकृष्णः शिशिरमयूखे चंद्रे दहति सति मरणमनुकरोति
मरणवद्दुःखमनुभवति॥अनुमरणमपि तु छीकरोतिइतिवा॥किंच॥मदनविशिखे कामबा
णे पतति सति॥अतिशयेन विकलतरो व्याकुलोऽपि विलपति विलापं करोति त्वं हि दूरे कामोऽपि
तस्य बाणैः प्रहरतीति ध्वनिः॥२॥किंच॥मधुपसमूहे भ्रमरनिकरे ध्वनति गुंजति सति॥श्र
वणमपि दधाति॥हस्ताभ्यां कर्णौ वा छादयति॥एतेन श्रवणायाति धैर्यं करोति॥किंच॥चलित
विरहसंदीप्त वियोगाग्नौ निशि निशि रात्रौ रात्रौ मनसि हृदये रुजं ततु हृतापीडामुपयाति प्राप्नो
ति दिवससुतत्वन्मार्गावलोकनेन कथं चिन्नीता रात्रिर्नैवगच्छतीति दीर्घपीडा ध्वनिता॥३॥छ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ विपिनविताने वनविस्तारे समूहे वा वसति तिष्ठति॥ ललितं सुंदरं धाम गृहं त्यजति॥ नेत्वादृ
शस्य त्वामंतरा सुखलेशोऽपि नेति भावः॥ धामशब्दवाच्यान् सर्वान् त्यजतीति ध्वनिः॥ किंच॥ शय्यादंक
विहाय धरणिशयनेन भूमिनिलेपं लुठति॥ वारं वारं तव नामावर्तयतिच॥ त्वच्चरणालंकृतभूमौ सर्वां
गे श्लेष्टलइति भावः॥ धामेदं हृदयवरं स्त्रीवेति विश्वः॥४॥ कविजयदेवे विरहिणी वियोगिनो विलसि
वसति विपिनविताने त्यजति ललितधाम॥ लुठति धरणिशयने बहु विलपति तव नाम॥४॥
भणति कविजयदेवे विरहिविलसितेन॥ मनसि रभसविभवे हरिरुदयतु सुकृतेन॥५॥
तेन विलासेन एवंभणतीसति॥ हरिः श्रोतॄणां मनस्युदयतु हृदये प्राप्नोतु॥ कीदृशे मनसि॥
सुकृतेन पुण्यनिचयेन सुष्ठुकृतेन गीतेन वा रभसहर्षस्य विभवे पूरे॥ उत्साह वर्गयोः प्रोक्तो रभ
सइति हलायुधः॥ स्वभावोक्तिरलंकारः॥ परमप्रेष्ठ दुःखश्रवणासहिष्णुतया व्याकुलचित्ता श्रीरा

किंच॥ त्वत्प्राप्ये तस्योत्कंठामाह॥ पूर्वमिति॥ हे सखि राधे माधवः श्रीहरिरस्मिन्नेव वनिकुंजमन्मथ
महातीर्थे निकुंजवरकामतीर्थे भूयो वारं त्वत्कुचकुंभयोः परिरंभोगा ढालिंगनामृतं वांछति॥ कुंभपदं
रतिजलधितरणायेति भावः॥ किं कुर्वन्पुनस्त्वामेव नान्यां इहतीर्थे ध्यायन् अनिशं निरंतरं तवआ
लापा एव मंत्राः॥ परमसिद्धिप्रदा मंत्रास्तेषामावलीं परंपरां जपन्नावर्तयन् त्वामिष्टदेवत्वेनावर्तय
पूर्वं यत्र लमं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः॥ ध्या
यंस्त्वामनिशं जपन्निहतवैवालापमंत्रावलीं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं वांछति॥३६॥९
ति न्निति स्नेहाशयः सूचितः॥ तीर्थप्रभावमाह॥ यत्र निकुंजसिद्धतीर्थे पूर्वं प्रथमं साधं रतिपतेः कामस्य
सिद्धयः कामसुखानि त्वया आसादिताः प्राप्ताः॥ एकनात्र संगो कामदृष्टप्रयत्नेन सेव्यत इति ध्वनिः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंस्वानुरागश्रवणप्रसन्नांतां श्रीकृष्णः प्रतिसखीमेरयति॥ रतिसुखेत्यादिना॥ गीतस्य गुर्जरीरागः॥ रूपककतालश्च॥ अयोर्लक्षणंपूर्वमेवोक्तं॥ ध्रुपदस्यापि॥ हेनितंबे॥ निष्टुनितंबयुक्ते॥ तस्या उत्कर्षप्रदर्शनाय नितंबवती ध्वनिः॥ हृदयंगतवल्लभयानुवर्तिनं त्वं श्रीकृष्णं अनुसर अनुगच्छ॥ गमनाअभिसारार्थविलंबनं न कुरु माकुरु॥ यावत्त्वं मालीयमुनातीरे वने निष्टति तावद् वानुसर॥ कीदृशी
गुर्जरीरागएकतालीताले॥ रतिसुखसारेगतमभिसारेमदनमनोहरवेशं॥ नकुरुनितं
बिनिगमनविलंबनमनुसरतंहृदयेशं॥ धीरसमीरेयमुनातीरेवसतिवनेवनमा
ली॥ गोपीपीनपयोधरमर्दनचंचलकरयुगशाली॥१॥ ध्रुपदं॥ ७॥ श्रीवासुदेव॥
रतिसुखसाररतिसुखसुरतसुखसारोयत्र॥ तदागतनके॥ क्षया भिसारेतिष्ठति॥ कीदृशंतं॥ मदनमनोहरवेशं कामस्यमनोहरवपुः शरीराकारोयत्र॥ कीदृशः॥ धीरोमंदः समीरोवायुर्यत्र॥ तदूरदृनिवारणाय धृतावनमालेतिध्वनिः॥ यमुनातीरेण॥ धीरसमीरान्योन्यं॥ .... सोगंध्या...........ति॥ धीरोमंदगतधीरइत्यादव॥ प्रेंसोनामालंकारः॥ कीदृशः वनमाली॥ गोपीनांपीनपयोधराणांवर्तुलस्तनाः

मृदुवेणुंमृदुशब्दयुक्तंवेणुंवादयते॥ कीदृशं॥ नामसमेतंहेराधेहेवल्लभेहेप्राणेश्वरि इतिप्रतलंनामसंयुक्तं॥ चाद्यमावाह्णोस्तन्नामेवविमेवती तिभावः॥ रामकरी असावरी धनाश्री इति नामरागत्रयंनद्युक्तंवा॥ कीदृशं नाम॥ कृतः संकेतोयत्रतादृशं॥ यहितन्नामसमेतंवेणुर्वादयेतमयात्रैवमदागतव्यमिति सूचितं॥ किंच॥ हेतनु अत्रार्थनयोर्दृस्वः॥ तलवतनुसंगतपवनचलितमपि रेणुंबहुमनुतेअत्यादरेणधत्तेबहुश्लाघ्यमात्मानंमन्तुतेमन्यतेवा॥ यदावायुनानीतंरेणुमपि॥ धृत्वाधन्योहमितिमन्यमानस्तदात्वदंगसंग

नामसमेतंकृतसंकेतंवादयतेमृदुवेणुं॥ बहुमनुतेननुतेतनुसंगतपवनचलितमपिरेणुं॥२॥ पेतति
पतत्रेविचलितपत्रेशंकितभवदुपयानं॥ रचयतिशयनंसचकितनयनंपश्यतितवपंथानं॥३॥ ७
मेनानंदोभवितेतिकिंवक्तव्यमितिभावः॥२॥ किंच॥ सर्वकरणहृतिरपितव्यर्पितास्तो॥ नामवादः॥ पततीति॥ पतत्रेपक्षिणिपततिवृक्षाद्वृक्षांतरंगच्छतिसति॥ किंच॥ वृक्षात्तत्रेविचलति कंपमाने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सति॥ स श्रीकृष्णः शयनं शय्यां रचयति त्वत्सुरतसंभोगार्थं निर्मीतीत्यर्थः॥ तव पंथानं मार्गं विवलि
तनयनं कदागमीष्यतीति सभयं नेत्रं यथा स्यात्तथा दिशः पश्यति॥ कीदृशं॥ पंथानं त्वं किं
भवदुपयानं॥ त्वं किं भवत्या उपयानं समीपागमने यत्र गाढ त्वं॥ सर्वनाम्न इति पुंवद्भाव इति लिंगे
खगर्भितो अमालंकारः॥३॥ ७॥

सुभरसन्नामालक्ष्याह॥ मुखरं इत्यादि हे सखि राधे मंजीरं नुपूरं त्यज॥ कीदृशं॥ मुखरं शब्दयुक्तं॥ अ
धीरं च गमनसूचकमित्यर्थः॥ कीदृशं॥ केलिषु सुरतक्रीडासु लोलं चंचलं॥ कमिव रिपुमिव॥ किंच॥ कुं
जं कुंजमंदिरं चल गच्छ॥ कीदृशं॥ सतिमिरपुंजं अंधकारसमूहयुक्तं॥ सहसा मालक्ष्य गमनायो

मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसु लोलं॥ चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलं॥४॥
उरसि मुरारेरुपहितहारे घन इव तरलबलाके॥ तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके॥५॥ ७॥

पायमाह॥ नीलनिचोलं॥ नीलवस्त्रं शीलय परिधेहि॥ एवं महता शिक्षितः शब्देन सर्वा राधा मञ्ज़िसि
यदिति भावः॥ मंजीरो नुपुरो स्त्रियामित्यमरः॥ निचोलः प्रच्छदपट इत्यनि॥४॥ ननु अलंकारत्यागेन
शोभानस्यादित्याशंक्याह लौकिकशोभा संपन्निना ह॥ उरसीत्यादि॥ हे पीतेदाहे लीर्णकनकगौरांगे॥ हेसु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतविपाके॥ पूर्वजन्मार्जितपुण्यकाले॥ मुरारेः श्रीकृष्णस्योरसि वक्षसि राजसि राजस्यसि॥ वर्त्त
मानसमीपे इति वर्त्त॥ उदारमिदं शिलेपुरुषा यितनाग्विकार निकालेसुरतो तेन॥ कीदृशे उरसि॥ उ
पहितहारस समर्पितमुक्ताहारे॥ आलिंगनावानसारित हारे वा॥ पुनः कीदृशे उरसि घने इव॥ मेघस
दृशे घने॥ तरला श्चंचलाः बलाकाः॥ अन्नपंक्ती यत्र॥ केनदडिदिव॥ यथानानावर्णविचित्रचर
मत्कारवती तडित् घनस्योपर्यधः स्फुरंती राजते तथानर्घ्यत्वमपीति ध्वनिः॥ तत्र हारो रसराधा
नो बलाका मेघतडित्ताम तुक्रमेण साम्यं॥ बलाका बकपंक्तौ स्याद्बलाका विसकंठिकाइति विश्वः
॥ पाकः कीर्त्यते स्वादे च परिणामे च वर्जने विनिविश्वः॥ पीतागौरो हरिद्राइत्यमरः॥५॥ ७॥
वि
भ

६५

एवं नायकार्पितरतोत्कंठां कारयित्वा पुनस्तस्या उत्कंठां जनयितुमाह॥ विगलितेत्यादि॥ हे पंकजनय
ने कमल॥ किशलयशयने नवपल्लवतल्पे जघनं घटय आरोपय॥ कीदृशं॥ विशेषरसा विशेषानुग
लितं स्वलितं वसनं नीलवस्त्रं यत्र॥ पुनः कीदृशं परिहृताद्दूरीकृतात् रशना क्षुद्रघंटिका यत्र॥ नीलांबु
रा सुंदरमीनरशिकिशोरवर्णेन स्वलितवसनर रशनमिति ध्वनिः॥ अनर्घं वापिधाने आवरणं शून्यं॥ किं॥
विगलितवसनं परिहृतरशनं घटय जघनमपिधानं॥ किशलयशयने पंकजनयने निधिमिव हर्ष
नि निधानं॥ ६॥ हरिरभिमानी रजनिरिदानीमियमपि याति विरामं॥ कुरु मम वचनं सत्वरर चनं पूरय मधु
रिपुकामं॥ ७॥ श्रीजयदेवभणितमिदमतिशय मधु रिपुनिधुवनशीलं॥ सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलं
हर्षनिधानं परमानंदस्थानकमिव॥ निधिमिव नायकस्याभीष्टं निधिमिव॥ यथा निधिरदृष्टः सुखाय भव
नितहत्॥ जघनं कटेरधोभाग इति हारावली॥ निधानं निधिगृहं वारितिहेम॥ ६॥ एवं विधिले प्रयत्नो राधाम
भिमानी॥ यतस्त्वमेव निशायन॥ अभिमानवान् जनः मधुरसंत्यरिपुः क्षोभकत्वेन यस्य तस्य मधुपाः
र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामंकामाभित्तापंपूरयपूर्णंका रसरिसुपीडितः प्रियेनवशीकृतोभविष्यतीतिभावः॥ किंच॥ संप्रती
यंरजनीरात्रिर्विरामभवसानंयातियास्यति॥ अपियावद्यातिभावन्मम वचनं सत्वरर चनंत्वराशीघ्रग
मनसहितंकुरु॥ रतिमानीतिश्लक्ष्णविस्मावः॥ तदा श्रीराधारतिपूर्णः॥ अत्राभिसारिकानायिकालक्षण
णं॥ मदनानलसंतप्ता ... याभिसारयतिप्रियमिति॥ एवंसुरतसमयेसमुपस्थितेगमन विलंबन
मयुक्तमितिभावः॥ रसवदलंकारः॥ ७॥ गीतार्थसंग्रहं मंगलत्वेनयोजयति॥ श्रीइत्यादिहेहरिभक्ताः
॥ श्रीजयदेवपरम ... रमणीयंनिरुपमं मनोहरंभणतिकथयतितंगीतहरिं नमतनमस्कुरुत॥ कीदृशं॥ य
त्नाहरिसेवाचिंतनादिरूपायेन॥ कीदृशंहरिं॥ प्रमुदितंप्रकर्षेण नंदितंहृदयंयस्यतं॥ पुनः ॰ अति
शयेनभक्तेषुदयायुक्तं॥ पुनः कीदृशंसुकृतेः॥ पुण्यराशिभिः कवि ॰ सु ॰ भिर्वाप्रार्थनीयंसुंदरं वा॥
प्रस्तुतोक्तिरलंकारः॥ ८॥ ७॥ ७॥ ७॥

६६

कांतेवल्लभे॥ तवप्रियोवल्लभः श्रीकृष्णोमदनस्यत्वद्विरहेणकदनंपीडनं तेनक्लांतः संतप्तोवर्त्तते॥ संतप्तमेवे
वाहमुहुर्वारंवारंत्वदागमनचिंतयाश्वासान्संतापनिःश्वासान्विकिरतिविक्षिपतिमुहुःपुरोग्रेआशा
दिशाईक्षतेपश्यति॥ केनापिमार्गेणकुंजंगत्वागमीष्यतीतिमुहुःकुंजलतामंदिरंप्रविश ति॥ कीदृशं॥
विकिरतिमुहुः श्वासानाशापुरोमुहुरीक्षतेप्रविशतिमुहुःकुंजंगुंजन्मुहुःपरितम्यति॥ रचयति
मुहुःशय्यांपर्यंकतलंमुहुरीक्षतेमदनकदनक्लांतः कांतेप्रियस्तववर्त्तते॥ ३५॥ त्वद्वाम्येनसमंस
मग्रमधुनातिग्मांशुरस्तंगतोगोविंदस्यमनोरथेनचसमंप्राप्तंतमःसांद्रतां॥ कोकानांकरुणस्वनेन
सदृशीदीर्घामदभ्यर्थनातन्मुग्धेविफलंविलंबनमसौरम्योभिसारक्षणः॥ ३६॥ ७॥ ७॥ ७॥
कुंजेकुंजेलीनभ्रमरांमन्नतलगुंजत॥ तत्राप्यलब्ध्वा मानोमुहुस्ताम्यतिग्लानिंसंतप्तोभवति॥ इत्येवंवि
धोपितवहालिंगनायशय्यां विविधकिशलयपुष्पतल्पंरचयतितल्पंरचयित्वानागतेयमितिविश्वासेत्वदाग
मनायमुहुः परितआकुलंव्याकुलमीक्षते॥ एतेनत्वय्यनुरागातिशयः प्रोक्तः दीपकालंकारः॥ ३५॥ हे

ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुग्धे स्वकार्यो वेदिनि अधुना संप्रति त्वद्वाक्येन समं साकं तिग्मांशुः सूर्यः समग्रं समस्तेन अस्तं गतः अ
दर्शनं प्राप्तः ॥ अथवा समग्रमधुना खिलमधुहेनेतिवाक्येन ॥ किं ॥ गोविंदस्य श्रीकृष्णस्य मनोरथेन
श्रीराधा गमिष्यतीति वांछया समं साकं तमः ॥ अंधकारः सांद्रतां स्निग्धतां प्राप्तं ॥ निबिडांधकारोऽभि
सरणयोग्यमित्यर्थः ॥ एषा दीर्घा मदभ्यर्थनाऽनुरोधेन गम्यतामिति मदीया प्रार्थना कीदृशी कोकानां चक्र
वाकानां करुणस्वनेन करुणरसाश्रयविरहकूजितेन सदृशी यथा चक्रवाकानां करुणस्वनो नानाप्रका
या रः श्रूयते तथा मदीयं युक्तमुक्तवाक्यं भवतीत्यर्थं वैदग्ध्यमिति भावः ॥ तत्रापि विलंबनेन गमनाय विफलेह
त्सुगतं सौख्यप्रतिबंधकमित्यर्थः ॥ अतोऽसावभिसारक्षणः समयो रम्यो गमनाय नेमं हर ॥ साहसे
त्यरलंकारः ॥ यथा सहृदीर्घा मम प्रश्वासेरिमाः संत्यनिरागानयेतिरिंद्रे ॥ ३६ ॥ ७ ॥ ७ ॥ ७ ॥

६७

अभिसाररम्यत्वमेव संख्याह ॥ इह निविडे तमसि दंपत्योर्जायापत्योर्व्रीडाविमिश्रोल्लासमन्वितः ॥
कोऽनकोऽनरसः शृंगाररसोऽभिसाररम्यतां प्रथयति ॥ अपितु सर्वोपरि सो भवत्येव ॥ कीदृशयोः ॥ सुरत
न्या मुद्दिश्यार्थं व्याजेन सुरतं प्रतिगतयोः ॥ कीदृशोऽसौ ॥ भ्रमात् भ्रामतः परिभ्रमणतो वा सांद्रे तमसि भि
अभ्रेत्य पादलग्नं चुंबनादनु नखोल्लेखादनु स्वांतः प्रोक्षोधादनु संभ्रमात् सुरतारंभादनु प्रीत
ये ॥ अन्यार्थं गतयोः प्रेमा भिमिलितयोः संभायेण जनितो दंपत्योरिह कोऽनको नर्मसु व्रीडावि
मिश्रो रसः ॥ ३७ ॥ सभयचकितं विन्यस्यंतीं दृशौ तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदपदानि तं
वितन्वतीं कथमपि रहः प्राप्ता मंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थ
तांजयोः संगतयोः ॥ परस्परोल्लासैः स्वरसंगमलापैर्वा सुरतादिभिप्रायं जानतोः ॥ कीदृशयोः ॥ आलिं
गनचुंबननखक्षतकामोद्दीपकामादिकरसुरतारंभैः क्रमादुत्तरत्तु पश्चात्प्रीतयोः लब्धानंदयोः उपर्युपरि
त्ययः ॥ आश्लेषादिक्रमविनन्दितयोरितिवा ॥ ३७ ॥ पुनरपि तां त्वरयितुं दृश्योत्कंठमाह ॥ सभयचकितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुमुखिसुंदरिसुभगः॥सुंदरावधिः सश्रीकृष्णः॥यांपश्यन्कृतार्थतां जन्मसफलत्वं समुपैतिप्राप्नोतु
॥कीदृशीत्वां॥तिमिरंधकारसहितपथिमार्गेसभयचकितंभयसहितं चकितंयथातथा शृंगाररसेरसं
भ्रमेणदृशोःनेत्रे विन्यस्यंती क्षिपंती॥ अनेनदृशोर लौकिकसौंदर्यमुक्तं॥ कीदृशीं मुहुर्वारं वारंमृति
तरुप्रतिवृक्षंस्थिता॥वृक्षव्याजेनप्रियागमनंसमीक्षमाणापदोनिमंदंशनैः वितन्वतींदधातींपु
नः कीदृशीं कामतरंगैः कथमपि महताकष्टेन अंगैः रहःएकांतमुपप्राप्तां॥सुमुखीत्यंधकारेप्रकाश
बहुलत्वमुक्तं॥ रसवदलंकारः॥ ३८॥ ७॥ ७॥ ७॥

इदानींकविराशिःसमाशास्ते॥राधेति॥देवकीनंदनश्चिरं चिरकालं त्वामवतु रक्षतु॥देवकीतियशो
दा. दानामतद्यथा॥द्वेनाम्नीनंदभार्यायाःयशोदादेवकी [illegible] तथेतिपद्मपुराणे॥कीदृशः॥राधामुग्धमु
खारविंदस्यमधुपस्तद्धरामृतपानकर्ता॥पुनः कीदृशः त्रैलोक्यस्यमौलिस्थलीमुकुटस्थानं

राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्नमवनीभारावतारांतकः॥स्व
च्छंदंव्रजसुंदरीजनमनस्तोषप्रदोषश्चिरंकंसध्वंसनधूमकेतुरवतुत्वांदेवकीनंदनः॥३९॥इतिश्रीगी
तगोविंदेसाकांक्षपुंडरीकाक्षोनामपंचमःसर्गः॥५॥७॥श्रीवासुदेवायनमः॥७॥७॥७॥७

दावनंतस्यनेपथ्योचितमलंकारयोग्यं॥नीलरत्नंइंद्रनीलमिवश्यामरूपं॥अथवा त्रैलोक्यमौलिस्थ
लीश्रीराधातदलंकरणमिति॥कीदृशः भूभारावतारांतकः समर्थः॥अवनीधराननद्धारायानतारायं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजानस्तेषामंतकोनाशकइतिवा॥ कीदृशः स्वछंदं स्वाधीनांव्रजसुंदरीजना नां मनसोपि वित्तशीनो
प्रदोषोरात्रिसुखं व्रजवधूमनोरंजकश्चंद्रः रात्रिसुखे नार्थः प्रहृष्टाभवंति॥ पुनः कीदृशः कंसस्य ध्वंस
नेमारणे धूमकेतुः पिसुनग्रहः॥ कंसंमुखं ध्वंसयति स्वसोदर्यादिना सकंसध्वंसनएवधूमकेतुरिति
वा॥ अन नेनायकवीराद्ययोगुणाः कथिताः॥ कंसोरसुरध्वंसनकोसुखकारकयोरपीतियादवधूम
६ केतुः स्मृतोवन्हेः॥ विनाशस्यापिसूचकइतिलायुधः॥ अलंकारेपिनेपथ्यं नटाचरणेकपि वेनित्रिलो
चनः॥ मुग्धं सुंदरमूढयोरित्यमरः॥ ३९॥ श्रांतासित्वंकमल नयनेदूरमभ्यागतासि स्निग्धछायं कल
यं सुभगे माधवीमंडनीनिकुंजं॥ इत्थं राधां मधुरवचनैः श्रोत्रपीयूषपूरैः राधास्यार्थे चिरपरिधृतं माप
वान्नंदसूनुरिति॥ ॥ इति श्रीमल्लक्ष्मणचंद्रसवकोटीच्याबलंसश्री शिवदासात्मजवनमालिभट्टवि
रचितायां वनमालिसंजीवन्यां गीतगोविंदटीकायां साकांक्षपुंडरीकाक्षो नाम पंचमः सर्गः॥ ५॥ ७

षष्ठकामत्वर आसखिन्नां राधां विलोक्यतां॥ न्यवेदयत्सहचरी श्रीकृष्णं गमनाक्षम मं॥ एवं कृष्णा
भिसरणं निरूप्यतां लतामंदिरे स्थापयित्वा कृष्णचरितं हसन्नित्याह॥ अथेति॥ अथतदनंतरं मंगलेवा
॥ सखीगोविंदे विषयीकृत्य तच्चरितं श्रीराधाचरितं प्राह॥ तं च॥ किंभूतां लतामंदिरे चिरकालमनुरक्ता
अथतांगतुमशक्ता चिरमनुरक्तां लतागृहेदृष्ट्वा॥ तच्चरितं गोविंदे मनसिजमंदे सखीप्राह॥
॥ ६० ॥ गुणकरीरागे रूपकताले॥ पश्यतिदिशिदिशि रहसि भवंतं तदधरमधुरमधूनि पिबंतं
नाथ हरे सीदति राधा वासगृहे॥ ध्रुवपदं॥ १॥ त्वदभिसरणरभसेन वलंती पतति पदानि कियंति
मशक्तां तां दृष्ट्वा॥ कीदृशी॥ अनंगेन गंतुमशक्तां चलितुमसमर्थां॥ कीदृशेन मनसिजेन कामेन मंदे
व्यथितहृदये॥ मनसिजोमंदस्तु अयस्मादितिना॥ मंदः खलेमंदगतेः मूर्खे स्वैरात्मरागिणोरितिवि
श्वः॥ हेत्वर्थिक लंकारः॥ ६०॥ सखसुखं गीतेन प्रथयन्निति पश्यतीत्यादिना॥ गुणकरीरागे रूपकताले॥ रा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गलक्षणं॥ रतौ सुखं कांतरूताप्रतीक्षामालाल्लयंनीमृदु गुप्तन ल्लां॥ इत्यरूतः अरिताद्दृष्टिमा श्रांगुणांद्र
दीतांमुनयोवदंति॥ तालल्लक्षणंपूर्ववत्॥ ध्रुवस्यापिवासकशय्येयं॥ वासवेश्मनिसुकल्मिलनलेया
समागमविधिर्विधानं॥ वसति प्रियसमागमलब्ध॥ तामिहाकालयवासकशय्यामिति॥ हेनाथहेहरे
राधावासगृहे निकुंजमंदिरे त्वद्दिरहमूसीदति दुःखिताभवति॥ दुःखमेवाह॥ सारहस्येका लेभवंतंत्वा
मेवदिशिदिशि सर्वदिशा॥ सुपश्यतिविलोकयति॥ कीदृशंलं॥ तत्तस्याः योधरस्तदेवमधुरंस्वादुः
मधून्यमृतानि पिबंतं धन्योहमितिसादरेणपानंकुर्वंतं॥ एतेनान्याधरमधुपानं अमधुरत्वादपान
मेवइतिभावः॥ त्वदधरइतिपाठेत्वछब्दोन्यवाकेवः॥१॥ ननुसायकुतोनायातित्यत आह॥ त्वदभिसरण
रभसेनरसोत्मादवेगेनचलंती कियद्गंतव्यमितिवारंवारं गछंतीपततिमूर्छया अनेनत्वयैवागंतव्य
मितिभावः॥२॥७॥६॥७॥

कीदृशी॥ कियंतिपदानिचलंतीनवदूरंनार्थेनाधिकंगंतुंपारयतीत्यर्थः॥ तर्हिकथंजीवतितत्राह॥
सातवरागात्तुलेश्शेनइहतवगुणानुकथनेनवापरं केवलंजीवति॥ जीवनहेतुरन्योनास्तीत्यर्थः॥ की
दृशी॥ विहिताः कृताविशदाः शुभ्राबिशकिशलयमृणालसूत्रवलयाः कंकणानियया॥ वलयःकंक
विहितविशदबिशकिशलयवलया॥ जीवतिपरमिहतवरतिकलया॥३॥ मुहुरवलोकितमंडनलीला
मधुरिपुरहमितिभावनशीला॥४॥ णेः पीतिकिम्वः॥ पल्लवोस्त्रीकिशलयमित्यमरः॥ मणालं बिश
मित्यपि॥ कलाकेशाकलासुवेतित्रिलोचनः॥३॥ मुहुर्वारंवारं विक्षितोवहवेलंसकुंडलकंकणादीनां
भा मंडनस्यालंकारस्यलीलाशोभया॥ तामेवाह॥ मधुरिपुरहमिति॥ भावनेध्यानेशीलंस्वभावोयस्याः
॥भ्रांतिनामायमलंकारः॥४॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं त्वत्संगं विना नलस्या विरहतापग्लानिरित्याह ॥ हरिः कामतापहरो पि त्वरि ॥ तं शीघ्रमभिसारं सुरत
स्थानं कथं नापैति स्वयमेव कुतो नागच्छति इति सखी अति अनुवारं वदति ॥५॥ अनुलक्षीकृत्य क्रमेण
स्वयमेवाह ॥ हरिरुपगत इति ॥ अन्तःसंगतं तिमिरमंधकारं मेघतुल्यं श्लिष्यत्या लिंगति चुंबति
स्निग्धनीलत्वाच्च श्रीकृष्णसाम्यमिति ॥६॥ किंच ॥ भवति त्वयि विलंबिनि निखिलं कुर्वति सति गतलज्जा
त्वरितमुपैति न कथमभिसारं ॥ हरिरिति वदति सखीमनुवारं ॥५॥ श्लिष्यति चुंबति जलध
रकल्पं ॥ हरिरुपगत इति तिमिरमनल्पं ॥६॥ भवति विलंबिनि विगलितलज्जा ॥ विलपति रो
दिति वासकसज्जा ॥७॥ श्रीजयदेवकवेरिदमुदितं ॥ रसिकजनं तनुतामतिमुदितं ॥८॥ ७
सा विलपति रोदितीति ॥ कीदृशी वासकसज्जा सुरतसंधाना ॥ कल्पं तल्पमूहे सहर्षे श्रेष्टेपि मेदिनीकरः
॥७॥ गीतसंग्रहमाह ॥ श्रीजयदेवकवेरुदितं भणितं गीतं रसिकजनं श्रीराधारहस्यशृंगाररसांतःकर
णं अतिशयेनानंदितं तनुतां विस्तारयतु ॥८॥७॥ ७१

गीतार्थं श्लोकसंग्रहेणाह ॥ विपुलेति ॥ हे कितव धूर्त नवं त्वं केलिसाम् गाक्षी मृगनयनी ध्यानेनात्रालया
शालीनवामंद कंदर्पचिंतां कोटिकामस्मरणं विधाय रुलारस जलनिधौ शृंगाररससागरे मग्ना बभूवेति
शेषः ॥ रससागरनिमग्नचेष्टितमाह ॥ विपुला प्रचुराः पुलका रोमांचास्तेषां पालिः पंक्तिर्यस्याः कीदृशी

विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलं व्याहरंती ॥ तव कितव विधायामं
दकंदर्पचिंतां रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी ॥ ९१ ॥७॥

पुनः स्फीतः समृद्धः सीत्कारो यत्र तं यथा अंतर्मध्ये जनितमुत्पादितं ॥ जडिमा जाड्यमनंगविकारस्तं
यथा काकुव्याकुलं ध्वनिविकारं विशेषण आकुलं यथा तथा व्याहरंती भावनया तव कुरंगी व्युत्पावनात्रा
केवि चार्य निषेधवाक्यं वदंतीत्यर्थः ॥ क्रमोत्क्षेप वालंकृती ॥ ९१ ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यानलग्नामेवदर्शयत्यंगेत्यादि। हे हरे एपावरतनुः सुंदरांगी। आभरणं गीवेलिर्क्षः॥ त्वया विना निशां
रात्रिं न नेष्य तिन गमयिष्यति॥ किंच॥ सायंगेषु करचरणादिषु आभरणं आलंकारं बहुशो वारं वारं वरो
ति॥ पत्रेनिसंचारिणि चलितेसति त्वां आसमागतं परिशंकते वितर्कयति॥ त्वामागतं ज्ञात्वा शय्यां शय

अंगेष्वाभरणं करोति बहुधैः पत्रेपि संचारिणि आसेत्वां परिशंकते विकल्पैतशय्यां चिरं ध्यायति॥
इत्याकल्पविकल्पतल्पर चनैः संकल्पलीलाशतैर्व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति॥४२

नीयं वितनुते रचयति॥ श्रीरत्नसंगमेमयाइदं कर्तव्यमिति ध्यायति चिंतयति॥ इत्यनेन प्रकारेण कल्पो
भूषणं विकल्पस्तर्कः॥ रव्या रचना बहुविलासश तमेतेषु व्यासक्ता प्रसक्तापि तल्प चरशायनेपि स्यात
ल्पमद्विकल्पचरितिविश्वः॥ आकल्प वेषेनेपथ्ये इत्यमरः॥ विकल्पः शंकाचेति॥ संकल्पः कर्ममा

सर्गनिकविः शमाशास्ते॥ किमिति॥ गोविंदस्यगिरो वाण्यो जयंति॥ कीदृशाः॥ संध्याकाले नागतिं थिंत्वा
गतादिसु लिवचनं गमेधुयासंलाः कैचि नंदग्राम स्थाया राधायाः वचनं अध्वगमुखात् श्रुत्वा नंदं निरुपं
प्रामुवंति॥ मुहुर्वारं वारं॥ वचनमेवाह॥ हे भ्रातः पथिक॥ भांडीरभूमिरुहि भांडीर वटे॥ किं विश्राम्य सिवि
श्राममारुथाः॥ विश्रामाभावे हेतुमाह रुष्णस्य भोगिनः भवनसंभोगमंदिरे॥ किंच॥ आनंदसहितेनंद

किं विश्राम्यसि रुष्णभोगिभवने भांडीरभूमिरुहि भ्रातर्यासि न दृष्टिगोचरमितः सानंदनंदा
स्पदं॥ राधाया वचनं तदध्वगमुखान्नंदांतिके गोपतो गोविंदस्य जयंति सायमतिथि प्राशस्त्यग
र्भगिरः॥४३॥ ॥इतिश्रीगीतगोविंदे वासकसज्ज्यावर्णनेनाम षष्ठः सर्गः॥६॥७॥७

यहं किमितिइतो नयासि न दृष्टिगोचरं संनिहितमेव॥ शून्यगृहत्यागे॥ नमहद्भूहाति ध्येन वस्तुतो थेभि
विष्यतीति भावः॥ व्याजोक्तिरलंकारः॥४३॥ यावन्नसाक्षीचुतवांगसंगस्तावद्वृथैवासु थपरिश्रमोस्याः
॥ध्यानेन किं हतमुहुः सरस्यास्स स्नापशाम्यनतु पानसाध्याह्निति॥ इति० गीतगो० वासकशय्यापष्ठः स०६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिसारिकाभिसरणप्रत्यूहमलिनचुलि:॥ ज्योत्स्नाभिसारं कलय त्विंदुरुद्गतसमये॥ १॥ एक्कमु भयोरनुरागं निरूप्य रसांतरं प्रकटयन् चंद्रदर्शनराधाविरहमाह॥ अत्रांतरेइत्यादि अत्रांतरे स्मिन् समये विलंबेइंदुश्चंद्रो मुञ्जालेः॥ किरणसमूहैर्वृंदावनांतरमध्यमदीपयत् प्रकाशितवान् काम दीपितं कारइतिवा॥ कीदृश॥ दिशाएव॥ सुंदर्यो नायिका नामः स्तडुनचंदनस्य बिंदु तिलकः॥ अथवा

अत्रांतरे च कुलटकुलवर्मपातसंजातपातकइवस्फुटलांछनश्रीः॥ वृंदाव नांतरमदीपयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः॥ ४४॥ ७॥ श्री०

दिक्सुंदरी श्रीराधा तस्या वदनचंदनबिंदुः॥ कीदृश॥ स्फुटः व्यक्तोलांछनस्य कलंकस्य श्रीः शोभायस्य॥ कीदृशइव॥ कुलटाकुलस्याभिसारिकासमूहस्य वर्त्मपातेन संकेतमार्गप्रतिरोधेन संजातेसुतन्त्र पातनकृयस्तनादृशइव॥ इंदुः कुमुदबोधवइलनेरः॥ चिन्हलक्ष्मकलांछनमित्यपि॥ किरणोंऽशुमयू खांशुरिति॥ ४४॥ ७॥

एवंविप्रलंभरससमुक्ताविप्रलंभेदैतुप्रपंचयति॥ प्रसरतीत्यादि॥ सा राधा उच्चैरत्यर्थं परितापं॥ श्रीकृष्णानागमन विरहदुःखं चकार॥ कीदृशं॥ विरचितः कृतो विविधो नानाप्रकारो धूर्तशठवंचककासीत्येवं रूपगुणकीर्त

प्रसरति शशधरबिंबे विहितविलंबे च माधवे विधुरा॥ विरचितवि विधविलापं सा परितापं चकारोच्चैः॥ ४५॥ श्रीवासुदेवायनमः॥

नरूपो वा विलापो यत्र॥ कीदृशी॥ नाम्ना तो धूर्तेर विविधुराविह्वला॥ कस्मिन्सति शशधरबिंबे चंद्रमंड ले प्रसरति उद्गच्छति॥ माधवे राधाधव प्रियेवसंत प्रियेवा विहितविलंबे कृतविलंबे वसति॥ ४५॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वं यथा श्रीकृष्णः किंकृते धनेनेनिकुंजवान् श्रीराधापिकुलवनीतिनिरूप्यते॥ किं तेन विलापनेन पदर्शयतिकथि
नेति॥ विफलच्छना पिकेयं॥ यच्छद्भनीः स्वयंगत्वा संकेतनागतः प्रियः यस्मात्तेन विनादुःस्थाविफलव्यातुस्सामेत
ति॥ गौड मालव रागेण गीतमेतत्॥ तस्मिन्समय निर्जनेव॥ केजनेन निशारणयामि॥ कुंजलता प्रविशामि॥
किंविशिष्टाह॥ सखीजनवचनैः श्रीकृष्णः शीघ्रं स्वयमेवागमिष्यतीति वंचिताभवारिवा॥ वंचनामिवाह॥ अहह

वचन गौड मालव रागेण गीतमेतत्॥ ३॥ कथितसमयेपि हरिरहह न ययौ वनं मम विफलमिदममलरूपम
पि यौवनं॥ यामिह कमिह शरणं सखीजनवचनवंचिता॥ १॥ यदनुगमनाय निशिगहनमपि शीलि
तं॥ तेन मम हृदयमिदमसमशरकीलितं॥ २॥
इति खेदद्वारिः कथितसमयेपि निविडान्धकाररूपसंकेताख्यं वनं न ययौ न जगाम॥ तदागमनं विना इदं मम
यौवनममलसुंदररूपस्य रूपमपि विफलं निरर्थकं रूपदं॥ कं पावकमयूरे च सुखरश्मी जले पुयेति विश्वः
॥ शरणं ग्रहरक्षित्रोरित्यमरः॥ विरोधालंकारः॥ १॥ किं यस्य श्रीकृष्णस्यानुगमनाय गहन्याय सुरते
न संतोषयितुं निशि॥ रात्रौ गहनमपि निर्जनं वनमपि मया शीलितं सेवितमनुभूतं वा॥ तेन श्रीकृष्णेन नि

एवं श्रीकृष्णेन वंचिताया मम मरणमेव वरं श्रेष्ठं मरणे विरहानलः भावात् किंच॥ अहं किमिति विषहामि
विरहानलं सहामि॥ कीदृश्यहं॥ अलिविलथकेतना॥ अलिना येन विनथमिथ्या भूतं स्वहं शरीरं वायस्याः
॥ कीदृशी॥ अचेतनात्तानशून्या॥ श्रीकृष्णागमनप्रत्याशारहितत्वात्॥ वितथं तनन्ते व्यर्थे इति हेमः॥
केतनं लाञ्छने शृंगे गात्रे गृहोपमंत्रणे इति विश्वः॥ चेतनं रूपदेशे स्यात्यत्ताशायां चेतनमित्यपि॥ विरो
मम मरणमेव वरमतिवितथकेतना॥ किमिति विषहामि विर
हानलमचेतना॥ ३॥ मामहह विधुरयति मधुरमधुयामिनी॥ कापि हरिमनुभवति कृतसुकृत
धालंकारः॥ ३॥ किंच अहहेत्याश्चर्यं॥ मधुरमधुयामिनी मनोज्ञा वसन्तरात्रिः परमानंदप्रदापि मां वि
धुरयति विज्वलयति॥ कापि कृतसुकृता कामिनी प्रबलपुण्यपुंजा कानाहरिं श्रीकृष्णमनुभवति भुंक्ते भजते
वा॥ अथवा कापि मादृशी सुकृतं श्रीकृष्णालिंगनादिपुण्यं यया सा मादृशी कामिनी॥ इदानीं तनादिविधा
हमिति श्लोकमेवानुभनामीति भावः॥ इयमुत्पादावस्थास भवति॥ ६॥ ७॥ ७॥ श्रीवासुदेवाय नमः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ अहह इति खेदे॥ अहं वलयादि मणिभूषणं कंकणाद्यलंकारं कलयामि धारयामि किं द्रुतं॥ हरि
विरहदहनवहनेन तत्कृतवियोगवह्निधारणेन बहुदूषणं मे निरयपापावारं॥ प्रियदर्शने स्त्रीणां शृंगार
साफल्यमिति भावः॥५॥ बहुदूषणो न्यवाह॥ न केवलं हरिविरहो दहति स्मरशरला स्रगपि मामहह दि

अहह कलयामि वलयादिमणिभूषणं॥ हरिविरहदहनवहनेन बहुदूषणं॥५॥ कुसुमसुकु
मारतनुमतनुशरलीलया॥ स्रगपि हृदि हंति मामतिविषमशीलया॥६॥ श्रीवासुदेव॥

हृतापि अतनुशरलीलया अनंगबाणविलासेन मां हंति॥ कीदृशीं॥ पुष्पवत्कोमलदेहं॥ कीदृश्या॥ अति
शयेन विषमं दारुणं शीलं स्वभावो यस्याः॥ वज्रादप्यतिकठोरयाइति भावः॥ पुष्पं प्रसूनं कुसुमं सुमनः।
मृगजीवनमिति रत्नाकरः॥६॥७॥७॥७॥

इह निकुंजेहं न गणितगमनायन निवसामि किं वस्मयैव तथापि मधुसूदनो मम आधरपानकर्ता मां चेतसा वि
त्तेनापि न स्मरति॥ कीदृश्यहं॥ गणिताः परिसंख्याताः श्रीवृंदावने वेतसा लता यया॥
॥७॥ किंच हरीति॥ हरिचरणशरणं यस्य जयदेवकवेः भारती वाणी सरसांतःकरणानां हृदि वसतु॥

अहमिह निवसामि न गणितवनवेतसा॥ स्मरति मधुसूदनो मामपि न चेत
सा॥७॥ हरिचरणजयदेवकविभारती॥ वसतु हृदि युवतिरिव कोमलकलाव
ती॥८॥७॥ ॥

देवकामिनां युवतिरिव॥ कीदृशी॥ सुकुमारांगी तनुः पक्षे कामकलाकुशला वा भारत्या विशेषणं वा कोम
लकलायुक्ता॥ यथा युवतिः प्रणयकलहादिनात्रापमव॥ भवति तद्वत्त्रापि भारती कोमलसुरवोच्चार
णादिनेति भावः॥८॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं विप्रलब्धा हरेरनागमनं नानाशंकां जनयंती सखीमाह ॥ नादि ॥ नाम ॥ श्रीकृष्णः संकेतस्थलं अभिसारणस्थलं
संपादितः मंजुमनोहरः वंजुलकुंजे वेतसलतामंदिरे यद्यस्मात् क्रीडार्थं नागतः तत्स्मात् ॥ किंवा
कामपि कामिनीं कामुकां कमनीयां वा अभिसृतः सन्मुखं गतः अनुगतो वा किंवा बल्लीकेलिभिर्व्रजसुह
तिहत्स्यादि ॥ क्रीडाभिर्वद्धो यंत्रितः किं वा बंधुभिर्मित्रैः कार्ये नैरपरितः स्वयं विचार्य इत्यंतरमाह ॥ अं
तः किं कामपि कामिनीमभिसृतः किंवा बल्लीकेलिभिर्बद्धो बंधुभिरंधकारिणि वनोपांते किमु
भ्राम्यति ॥ कांतः क्लांतमनाः मनागपि पथि प्रस्थातुमक्षमः संकेतीकृतमंजुवंजुललताकुंजे पि न यन्तः
धकारिणि निविडांधकारे वनोपांते वनसमीपप्रदेशे निकटे वा भ्राम्यति ॥ उपांते वा पाठः ॥ कीदृशः क्लांतं
मद्वियोगेन दुःखितं मनो यस्य ॥ पुनः कीदृशः ॥ मनागल्पमपि ॥ पथि मार्गे प्रस्थातुं मार्गे गंतुमक्षम
असमर्थः ॥ नतो विलंबइति भावः ॥ वितर्कसंशयः क्लेशे किमुसरकीर्त्यते ॥ बुधैरिति धरणि ॥ ७६ ॥ ७

एवं बहुधा वितर्कयंती सखीमाह ॥ अथेति ॥ अथानंतरं इयं राधा दृष्टवत्स्वदूतीमिव ॥ एतद्वक्ष्यमाणं सखीमाह
उक्तवती ॥ किं सत्या माधवमंतरेण श्रीकृष्णं विना गतां विश्रद्धस्वां दूतीं ॥ विषादमूकां दुःखातिशयेनकृतमसम
र्थां ॥ कीदृशीं ॥ जनार्दनं कथयापि ना पिकयारंभितमिति विशंकमानाशंकमाना ॥ जनार्दनः स्वविरहिजनसंता
पकत्वमुचितमिति नि श्रयार्थः ॥ अर्दधातुर्हिंसार्थे जनानर्दयतीति ॥ ८७ ॥ दृष्टार्थे गीतेनाह ॥ स्मरेति वसंतरागे ॥ २
अथागतां माधवमंतरेण सखीमियं वीक्ष्य विषादमूकां ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदे ना
तदाह ॥ ८७ ॥ वसंतरागे एकतालीताले ॥ स्मरसमरोचितविरचितवेषा ॥ गलितकुसुमदरविलुलि
तकेशा ॥ कापि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रुपदं ॥ १ ॥ ७ ॥ श्रीवासुदेवायनमः ॥
कतालीताले ॥ रागलालधुराणांलक्षणमुक्तमेव ॥ हे सखि कापि युवतिर्व्रजवधूः मधुरिपुणा श्रीकृष्णेन सह विल
सति क्रीडति ॥ कीदृशी ॥ अधिकगुणा मत्तोधिकाः नृत्यकुशलसौंदर्यादयो गुणा यस्याः ॥ महिला समंदिरगमनोल्ल
ठिनमापि श्रीकृष्णं स्वगुणैराकृष्यान्यत्र नीतमिति तात्पर्यं ॥ अधिकगुणा इति ॥ कीदृशी स्मरसमरे कामसंग्रामे उचितो यो
ग्यो विरचितः कृतो वेषो अलंकारविधानं नए [illegible] स्मरसंग्रामाय [illegible] ॥ गलितकुसुमैः पतितपुष्पैर्दरं विलु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशी ॥ हरिपरिरंभणेन श्रीकृष्णालिंगनेन वलितो जातो विकारोनंगोद्बोधो यस्याः ॥ कीदृशी ॥ कुचक
लशयोरुपरि तरलितश्चंचलो हारो मुक्ताहारो यस्याः तरलित इत्यनेन लिंगनसूचितं ॥ कलशशब्देनाने गात्म
वायमंगलेस्थलत्वं इति ध्वनिः ॥ २ ॥ कीदृशी विचलद्भिः कंपमानैरलकैश्चूर्णकुंतलैर्ललितो मनोहरो यानन चं
द्रो मुखमेव चंद्रो यस्याः ॥ कीदृशी ॥ तस्य श्रीकृष्णस्याधरपानरभसेन वेगेन कृता तंद्रा सुरतसुखानुभवतरूपा

हरिपरिरंभणवलितविकारा ॥ कुचकलशोपरि तरलितहारा ॥ २ ॥ विचलदलकललिताननचंद्रा त
दधरपानरभसकृततंद्रा ॥ ३ ॥ चंचलकुंडलललितकपोला ॥ मुखरितरशनजघनगतिलोला ॥ ४ ॥

चक्षुर्निमीलनं यया ॥ एतेन तदधरामृतपानेन च मूर्छिता इति ध्वनिः ॥ रभसो वेग उत्साह इत्यमरः ॥ ३ ॥
पुनः कीदृशी ॥ हे धूर्त लुब्धक कृतक शठ कोसि इति कथयन् शिरःकंपनेन क्रीडावशेन वा चंचलाभ्यां चपलाभ्यां कुं
डलाभ्यां ललितौ सुंदरौ कपोलौ यस्याः ॥ कीदृशी ॥ मुखरिता शब्दायमाना रसना क्षुद्रघंटिका यत्र जघ
नेन तस्या गतेन लोला चंचला यस्याः सा इत्यर्थः ॥ पदे सुरत विपरीत वा केलिभावः ॥ ४ ॥ ७ ॥

पुनः कीदृशी ॥ स्वयं पुरुषायितमाचरंत्या अधःस्थितस्य दयितस्य वल्लभस्य निरीक्षणेन तस्य पुरुषायितविस्म
रणेन तदाकारेण वा यद्धसितं तेन लज्जिता संजाता लज्जा ॥ कीदृशी बहुविधं शिखिकुलकलहंसादीनां
नानाप्रकारकूजितं यत्र तादृशात् रतिरभसेन क्रीडारभसेन रसिता संजाता रसा हृष्टेत्यर्थः ॥ एतेन तस्याः रस
निमग्नत्वमिति भावः ॥ रसितं त्वं स्विन्नहृष्टे इति विश्वः ॥ ५ ॥ पुनः कीदृशी ॥ विपुलैः प्रचुरैः पुलकैः रोमांचैः

दयितविलोकितलज्जितहसिता बहुविधकूजितरतिरसरसिता ॥ ५ ॥ ७ ॥ ७ ॥
विपुलपुलकपृथुवेपथुभंगा ॥ श्वसितनिमीलितविकसदनंगा ॥ ६ ॥ ७ ॥ ७ ॥

पृथुर्महान् वेपथुः कंपस्तस्य भंगस्तरंगा यस्याः सा पुलकांचिता रोमांचकंपयुक्ता सा इत्यर्थः कीदृशी ॥
श्वसितैः सुरतायासजनितैर्निश्वासैः ॥ निमीलितपरमानंदजनितैर्नेत्रैस्ताभ्यां विकसन् आविर्भवद
नंगः कामो यस्याः सा अन्योन्य अग्निर्वायुसंसर्गात् प्राप्य विकारो मेनिलहृदयापीति भावः ॥ निमिलितत्व
नेन च्युतिकालः सूचितः ॥ ६ ॥ ७ ॥ ७ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशी॥ सुरतश्रमजलकणभरेण धिक्येन सुभगं मनोज्ञं शरीरं यस्याः साइत्यनेन साधिक गुणो बंधः
सूचितः॥ कीदृशी॥ सुरतश्रमादुत्प्रान्त्या श्रीकृष्ण मालिंग्य रसिवक्षस्थले पतिता॥ निःसहत्वं चातुर्येण वादि
तमिति भावः॥ कीदृशी॥ रतिरणे सुरतसंग्रामे धीरा चतुरा॥ त्रान्ता॥ स्थिरा संदाजापतिता रसी निहंसलि
लं तां वधस्थले पतित॥ नारी बदहथे दत्ता कांतस्यारुयोगोपरि॥ कंदिमां दालयेदासु बंधो यं हंसलीलकं इति श्री

श्रमजलकणभरसुभगशरीरा॥ परिपतितोरसि रतिरणधीरा॥७॥ श्रीजयदेवभ
णितहरिरमितं॥ कलिकलुषं जनयतु परिशमितं॥८॥७॥

रः पंडितमदयोगिते विम्बः॥ सुभगः सुंदरध्वनि॥ लवलीनाक गणवइत्यर्थः॥७॥ श्रीराधा वर्णितं हरिर
मितं सर्वजनपावनत्वेन निरूपकजन प्रार्थयते॥ श्रीजयदेवेति॥ श्रियायुक्तेन जयदेवेन भणितं कथितं यद्
रेः रमितं विपरीतरतौ क्रीडितं कलिकलुषं कलौ पदारादिरूपं वा भवेत्त गराय रूपं वा पापं परिशमि
तं सर्वशः॥ तिजनयतु करोतु॥ अन्य औपचारिकं रमणं॥ श्रीराधायाः पारमार्थिकमिति भावः॥८॥७७

चंद्रदर्शनक्लेशेन सरिसंज्ञनिर्वृते॥ विरहेति॥ अयइति खेदे॥ अयं विधुश्चंद्रो ममहृदयसुरदेव श्रीकृष्ण
इव अतिमदनव्यथां तनोति यतिकामपीडां विस्तारयति॥ कीदृशः॥ मनोभुवः कामस्य सुहृन्मित्रं॥
अथवा मदनस्य बाध्यां करोति ममका वार्तेति भावः॥ कीदृशः॥ विरहेन वियोगेन पांडुमुरारिमुखं

विरहपांडुमुरारिमुखांबुजद्युतिरयं तिरयन्नपि वेदनां॥ विधुरतीव तनोति
मनोभुवः सुहृदयेहृदये मदनव्यथाः॥१७॥ ॥२॥ ॥६२॥

बुजसदृशः द्युतिः समानकांतिः॥ कीदृशः॥ वेदनां ज्ञानं तिरयन्नपि॥ वेदना ज्ञानदुःखयोरिति वि
श्वः॥ अयं क्रोधे विषादे च संबुद्धौ स्मरणे चेति विश्वः॥ तिरोतत्रौ तिर्यगर्थे इति वा विधुः सुधांशुरि
त्यमरः॥ पीडा बाधा व्यथा दुःखमित्यमरः॥१७॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्वोक्तागीतेनकस्याश्चिद्विपरीतरतमुक्तासखीतस्याएवनायकक्रतां क्रीडामाह॥ समुदितेति॥ ध्रुवराग
तालाराागलक्षणमुक्त' मेव॥ स्वाधीनभर्तृके॥ तस्याः लक्षणं॥ यस्यारतिगुणाकृष्टः पतिःपार्श्वंनमुंचति
॥ विचित्रविभ्रमासक्तास्वाधीनंभर्तृकायथति॥ हसरिवअधुना अस्मिन्निवासरे यापूर्वंमधुरिपु

गुर्जरीरागेएकतालीताले॥ समुदितमदनेरमणीवदनेचुंबनवलिताधरे॥ मृगमदतिलकंलिखति
सपुलकंमृगमिवरजनीकरे॥ रमतेयमुनापुलिनवने विजयीमुरारिरधुना॥ ध्रुपदं॥१॥८॥ ॥८

णारमिता॥ यामेवविजयीव्रजयुवतियूथजयेनानंगजयेन वासकलसौंदर्यातिगुणजयेनवा निःशं
क उक्तलक्षणेमुरारिः श्रीकृष्णोयमुनापुलिनवनेयमुनातीरवनेरमतइतिविरोधोक्तेः॥ किंरमते
तद्विरहाग्निसंतप्तयमुनातीरवनेसेवतइतिभावः॥ कीदृशेवने॥ सम्यगुदितउपचितोमदनःकाः

मोयत्र॥ कीदृशेवने॥ रमणीयायास्तेनैववदनंमुरारिवादनंयत्र॥ कीदृशावने॥ चुंबनायवलितोनु
कूलीकृतःमुरातेवेवाधरोयत्र॥ तत्रैववनेरमणीवदनेव्रजयुवतिमुखेध्यानप्राप्ते तन्मुखेवासमुल
केरोमांचसहितंयथा मृगमदंतिलकंतवध्यानेनतस्याःसाक्षाद्वालिंग्यलिखति॥ कीदृशेवदने॥
समुदितःसमुदितो चितोमदनःकामोयत्र॥ कीदृशे॥ चुंबनेनवलितश्चिबुकमुद्धृत्यसकोचि
तअधरोयत्र॥ कस्मिन्नकमिवरजनीकरेचंद्रेमृगमिव॥ मुखस्यचंद्रसाम्यंमृगस्यतिलकसा
म्यंवलितंरसेचितेपि स्याश्चुंबनाकुंचनेपिवतिविश्वःकालिंदिरसयलनया यमुनावयमस्वसे
त्यमरः॥१॥८॥८॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपितामेववर्णयति॥घटयतीत्यादि॥कुचयुगगगने स्तनद्वयोत्तुंगे अमलंउज्वलंमणिसरंमुक्ताहारःस्तमेव
तारकपटलंनक्षत्रसमूहंघटयति॥योजयति॥अत्रकान्तास्तनौगोप्यामन्त्रेनम्भोनिर्धाईशोसुधनेनिविडेसमू
चलवापुनःकीदृशेमृगमदरुचिरूपितेकस्तूरीदीप्तिलिप्ते॥कुचयोराकाशस्थन्दगमदस्तिमयोःपयोधरस्त
नमणिसरस्यनक्षत्रसमूहत्वेनसाम्यमित्युत्प्रेक्षारूपकालंकारः॥कीदृशेनखपदंनखक्षतंतदेवशशिकलम्

घटयतिसुघनेकुचयुगगगनेमृगमदरुचिरूषिते॥मणिसरममलंतारकपटलंनखपदशशिभूषिते॥२॥७॥

तेलंकृते॥नखचिन्हस्यार्धेंदुसाम्यं॥तद्यथास्यांकं॥अर्धेंदुसंकाशमिदंरसज्ञेरर्द्धेंदुसंज्ञंकथितंसमासा
दिति॥घनःसांद्रदृढेदाअड्ढो विस्तारेलं।दृसुदृढइतिविश्वः॥अभिषंजेस्पृहायांचगभस्तौवरुच्यःस्त्रियामि
तिधरणिः॥नक्षत्रेवाक्षमध्येवनारकापिचतिविश्वः॥सुघनंनिविडेश्लक्ष्णपित्रालेहृदसारकइतिवैजयंती
हारोमणिसरोमुक्ताकांचनादिविनिर्मितइत्यपिच॥समूहःपटलःपुंजानंदपीतिभोजे॥२॥७॥ ७॥

किंचघनेतिश्रीकृष्णःसंप्रतिध्यानेनतवरामस्येमेवतस्याश्चिकुरेजातावृकचनंकेशेषुकुरबककुसुमंशोभामम्ला
नपुष्पंरचयति॥रचनाविशेषंवाकरोति॥कीदृशेमेघसमूहवत्मनोहरे॥अन्ययारहरमणमांशाक्येत्किमर्थं
खेदंत्रापयसीतिध्वनिः॥कीदृशांतपल्लावलविद्युद्दिवसुषमात्रोभायस्यतत्॥यथामेघविद्युद्दातितथाचि
कुरकुसुमानीतिभावः॥कीदृशेरतपतिःकामःसएवमृगः॥तस्यवनेयथाकानने मृगस्तथाचिकुरेकामस्त
घनचयरुचिरेरचयतिचिकुरेतरलीतितरुणानने॥कुरबककुसुमंचपलासुषमंरतिपतिमृगकानने॥३॥
जितबिसशकलेमृदुभुजयुगलेकरतलनलिनीदले॥मरकतवलयंमधुकरनिचयंवितरतिहिमशीतले॥४॥
स्याःकरचरणादिषुकामःकिमुवक्ष्यमि॥त॥पुनःकीदृशेतरलितानिचंचलानिहलानितरुणानामाननानि
श्रीकृष्णस्यवायेनयस्मिन्वा॥३॥किंच॥जितेति॥श्रीकृष्णस्तस्यामृदुभुजयुगलेकोमलबाहुयुग्मेमरकतव
लयंइन्द्रनीलमणिरचितकंकणमेवभ्रमरसमूहंवितरत्यर्पयति॥एतेनमरकतवलयस्यभ्रमरसमूहत्वेन
भुजयुगलस्यारभाधिक्यंसरसूचितइति॥कीदृशे॥जितमभिभूतंनिजसमर्हेननूर्गौरवलयाबाबिशशकलंमृ
णालसमूहोयेन॥कीदृशे॥हिमादपिशीतले॥विरहसंतापहारित्वात्॥कीदृशे॥करतलमेवकमलदलं

करतलकमलदलमिवकोमलं॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंचरतीति॥ श्रीकृष्णः रतेः सुरतश्रृंगारस्य वागृहे॥ जघनेनानंतं वमणिमयरसनं मणीमणी मेखलां विकिरत्य पूर्यति कीदृशं तोरणस्य वंदनमालिकाया दशनं निंदनं॥ रा ज्ञिसिंहासनोपविष्टे वंदनमालिकाबद्धा लडनिभा वः॥ विपुलापघनं महत्तरसमानतले॥ पुनः कीदृशे॥ कामस्य सुवर्णासने॥ एतेन नगौरवत्वमनिज्ञाय नसूचित मिति॥ कीदृशे॥ रत्नं कामनवासनं निवासं वरकुरुसुगंधावाप्ते॥ अगंपनी कोव्यंवा जघनोथकलेवरं मित्यम
रतिगृहजघने विपुलापघने मनसिजकनकासने॥ मणिमयरसनं तोरणदसनं विकिरनिकृतवासने॥५॥
चरणकिसलयकमलानिलये नखमणिगणपूजिते॥ बहिरपवरणयावकभरणं जनयति हृदि योजिते॥६॥
रःवासनंवसनेवाथस्थानवधूपनरतिविश्वः॥५॥ किंचरणेति॥ श्रीकृष्णः चरणपल्लवे यावकेभरणं अलक्तक पूर्णं जनयति करोति तस्यास्तावत् शोभार्थं॥ कीदृशे हृदि योजिते नंदसूनुना सुभ्रशामनिशायेन प्रेमातिश यायस्वहृदयमा पितहृदि तच्चरणं भूत्वा यावकं रचयतीत्यर्थः॥ कीदृशे हृदि॥ कमलायाः लक्ष्म्याः श्रीराधा यनिलयमंदिरे॥ कीदृशेनस्वाएवमसमूहास्तैः पूजितलक्षणे॥ कीदृशं बहिर्भूतमपवरणमावरणं यस्यस्य

किंवदसखि॥ खलार्थं हलं धारयतीति तस्य सहोदरे भ्रातरि निर्दयत्वं खलत्वकर्तुं सहोदरे सदृशे॥ कामपिनायिकां तादृशीं सुदृशं शोभनोक्षितचरणमतिशायनरमयति स तिइह विटपोदरे धूर्तललानिकुंजे यकलं निःभयो जनं विरसं रसरहितं यथातथा चिरंबहुकालं किं अवसं किमर्थमुषितो सिवदकथय मानंत्यक्त्वातत्संगो पार्थं गमनं प्रतिस्वानुकूलवाक्यं कथयत्यर्थः॥ विटपाद्रोल्लवणे धूर्तेमूर्खकेखदिरेपिचेतिविश्वः॥७॥ गीतफलमा
रमयति सुदृशं कामपि सुदृशं खलहलधरसोदरे॥ किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे॥७॥
इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके॥ कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके॥८॥ ७॥
इहेति॥ इह काव्यकर्तरि कवीनां नृपे कविराजे जयदेवके कलियुगस्य चरितं दुरितं पापं न वसतु न तिष्ठतु॥ कीदृशे रसस्य श्रीराधाकृष्णश्रृंगारस्य भरणनकथनं यत्र॥ कीदृशे॥ कथं हरगुणनसौंदर्यादिपरिसंख्यायन॥ कीदृशे॥ मधुरिपोः श्रीकृष्णस्य चरणसेवके॥ मधुसूदनपदं पंकजसेवके॥८॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमन्यवृजयुवतीरमणोत्कर्षंश्रुत्वा संजातनिर्वेदादूतीमाश्वासयन्नेवाह ॥ नायातइतिहे सखिदूतिदोत्यकर्मकु
र्वाणे ॥ यदिनिर्दयोमद्वयस्यो नायातएवतर्हितेधूर्तः ॥ कुटिलात्कुर ॥ गानिगूढापराधोवानायातः नगतः तर्हिते किंदु
षणं तथा सतत्प्यस ॥ किंच ॥ कापि स्वच्छंदं रमते ॥ अनागमनेहेतुमाह ॥ बहुवल्लभोबह्वीनांवल्लभः प्रियोवह्वी
वल्लभायस्य इतिवा ॥ तदानयनेतेतवकिंदूषणं कोपराधो सामर्थ्यन ॥ ननुगत्वाग्रंथनुमुदितानिवाह ॥ पश्य
नायातः सखि निर्दयो यदि नाव स्त्वंदूति किंदूयसे स्वच्छंदं बहुवल्लभः सरमते किंतत्र ते दूषणं ॥ पश्याद्य
प्रियसंगमाय दयितस्याकृष्यमाणंगुणैरुत्कंठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति ॥ ५८ ॥
द्योतिइदं मद्वचनः प्रियस्य वल्लभस्य श्रीकृष्णस्य संगमाय मिलनायातिगनायवाअद्य शीघ्रं स्वयमेव यायास्य
तीतिपश्य जानीहि ॥ किंदृशं ॥ दयितस्य प्रियस्य गुणैः सौंदर्यादिभिराकृष्यमाणं वशीकृतं ॥ पुनः कीदृशं ॥
उत्कंठया प्रियदर्शनेच्छयायाभिः मनः पीडातस्या भरादाधिक्यादिव स्फुटत्वगूढधाभवनबहिर्भवदिति वा
॥ अपरमपिव स्त्वंतरंकुलेस्थानं स्थितंवस्तुसाकल्यादिदमेव निस्फुटति ॥ अनेकधाभवति ॥ एतेनश्रीकृ
ष्णगुणानां प्राणहारित्वमुक्तं इतिभावः ॥ नातः परं त्वयानंदनयनयासः कर्तव्यइति ॥ ५८ ॥

तत्रगतमपिचेतः संतप्तमितिभविष्यतीत्याह ॥ अनीति ॥ अत्र कीडिनायाःस्तुदुःखं समुचितमेव क्रीडिनायाः के
त्रांपश्यवनेमद्वियोगा ॥ श्रुजलेतन्मालिनाहस्त सखियावनमालिनारमिताग ॥ मेनान्कीडितासाकिशलयशय
नेनमृदुपल्लवतल्पेननतपतिनसंतप्ताभवति अपितुभवत्येव ॥ कुतः संयोगानंतरं विरहशंकयातु भूतरसो
तिदुःखप्रदोभवतीत्यरमे ॥ गोविंदराज्यं आगता ॥ कीदृशेनवनमालिना ॥ अनिलनवासुनातरलं चंचलंय
देनाधरांगरूपत्रनाल ॥ अनिलतरलकुवलयनयनेन ॥ तपतिनसा किशलयशयनेन ॥ सखियार
मिताबनमालिना ॥ ध्रुवं ॥ १ ॥ विकशितसरसिजललितमुखेन ॥ स्फुटतिनसामनसिज विशिखेन
॥ २ ॥
कुवलयंकमलंतद्वं नयनेनेत्रयस्येतेन ॥ अस्मिन्गीते संभोगवियोगोज्ञातव्यो ॥ रागतालादि ध्रुवपदं पूर्ववत्
॥ १ ॥ ५ किंच ॥ विकशिते लियारमितावनमालिनेनि सर्वत्र योज्यं सामनसिज विशिखेन कामबाणेन नस्फुट
ति विद्धा न भवति ॥ अपितु भवत्येवेत्यादि पूर्ववत् सर्वत्र योज्यं कीदृशेन नयन मालिना ॥ विकशितं प्रफुल्लं यत्स

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच ॥ अमृतेति ॥ अमृतादपि मधुराणि मनोज्ञानि मृदुतराणि अतिशयेन कोमलानि वचनानि भाषणानि यस्य तेन रमिता अपि मलयजपवनेन चंदनवायुना न ज्वलति पूर्ववत् ॥ संभोगवियोगे तु ज्वलत्येव ॥ अन्येन नायकस्य प्रियवचनादयो गुणा निरूपिताः ॥ ३ ॥ अपि च स्थलजलरुहाणां स्थलकमलानां जलकमलानां रुचिरिव रुचिर्येषां तादृशाः करचरणा यस्य तेन श्रीकृष्णेन रमिताऽपि साहिमकरकिरणेन चंद्रकिरणसमूहेन न

अमृतमधुरतरमृदुतरवचनेन ॥ ज्वलतिनसामलयजपवनेन ॥ ३ ॥ स्थलजलरुहरुचिकरचरणेन ॥ लुठतिनसाहिमकरकिरणेन ॥ ४ ॥ सजलजलदसमुदयरुचिरेण ॥ दलतिनसाहृदिविरहभरेण ॥ ५ ॥

दहति अपितु दहत्येव ॥ जलरुहं कामस्य बाणत्वेनैव ध्वनितं ॥ ४ ॥ किंच ॥ सजलेति ॥ सजलजलदस्य सोदकमेघस्य समुदयस्तद्वद्रुचिरेण मनोहरेण वनमालिना रमिता साहृदि विरहभरेण न दलति अपितु विदीर्णहृदयाभवत्येव ॥ अनुकूलनायिकायाः कथं तस्य विरहः ॥ तत्राह ॥ विप्रयोगरसमयत्वात् सजलेत्यनेन श्रीराधाविरहाच्छादनस्य कृपा नाइति भावः ॥ ५ ॥

किंच ॥ कनकनिकषस्य सुवर्णतेजेन पाषाणस्य रुचिरिव रुचिर्यस्य तादृशं सुचिर्निर्मलं वसनं वस्त्रं यस्य तेन वनमालिना रमिता सा परिजनहसनेन सखीजनपरिहासवाक्येन न श्वसिति अपितु निश्वासं करोतीति ॥ वसनमिति श्रीराधांगदीप्तिसादृश्यात् पीतांबरधारणं न तु मंडनार्थमिति भावः ॥ तद्यथा ॥ पीतांबरं किमिति नंदसुतो बिभर्त्ति नीलांबरं किमिति भानुसुता बिभर्त्ति ॥ मन्ये दिने पनिजजीवनधारणार्थमालिंगनं कलयतोव सनच्छ

कनकनिकषरुचिशुचिवसनेन ॥ श्वसितिनसापरिजनहसितेन ॥ ६ ॥ सकलभुवनजनवरतरुणेन ॥ वहतिनसारुजमतिकरुणेन ॥ ७ ॥

लेनेति ॥ शृंगारः शुचिरुज्वलइत्यमरः ॥ शुचिः शुधेनुपहतइतिविश्वः ॥ निकषः कषपट्टिकेतिहारावली ॥ ६ ॥ किंच सकलभुवने चतुर्दशलोके ये जनास्तेभ्यो पि वरेण श्रेष्ठेन वा तरुणेन च सकलभुवने यः श्रीराधाख्योजनोवरः श्रेष्ठस्तरुणो वा यस्य तेन वनमालिना या रमिता या सा रुजं पीडां न वहति न धारयति ॥ अपितु धारयत्येव ॥ की दृशेन अतिकरुणेन दयावति कांत ॥ न निर्दयेनेत्यर्थः ॥ किंच श्रीराधा करुणरसेनोपलक्षिता वा ॥ अस्यां संभोग

क्रीडाहितः ॥ कृष्णकलसह
सकलनायकगामकेलि लिखितः ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेव भणितं यद्वचनं गीतरूपं तेन अनेन परिगीते सति हरिः मनोहरः संतापहारी वा अष्टपदी गायतां
श्रीराधाया अपि हृदयं प्रविशतु मुदं यातु ॥८॥ एवं सखीवचनेन विस्मृतप्रियदोषा मलयानिलमुपा
लभते ॥ प्रार्थयते च मनोभवेति ॥ हे मनोभवानंदन प्रसीद चंदनानिलमलयसमीर त्वं प्रसीद प्रसादं कुरु ते

श्रीजयदेवभणितवचनेन प्रविशतु हरिरपि हृदयमनेन ॥८॥ मनोभवानंदन चंदनानिल प्र
सीद रे दक्षिण मुंच वामतां क्षणं जगत्प्राण निधाय माधवं पुरो मम प्राणहरो भविष्यसि
॥४९॥

इत्याक्षेपसंबोधने ॥ दक्षिण वामतां प्रतिकूलं मुंच हे संचारय हे जगत्प्राण विश्वप्राण भूतं माधवं श्रीकृष्णं
कृष्णं क्षणमात्रं क्षणं पुरो अग्रे निधाय कृत्वा मम प्राणहरो भविष्यसि ॥ प्राणोत्क्रमणसमये श्रीकृष्णदर्श
नमतिदुर्लभमिति ॥ जगतां प्राणहं तत्त्वमनुचितं तवेति भावः ॥ वामं सव्य प्रतीपं वद्रविणे चातिसुंदरे इति वि
श्वः ॥४९॥

पूर्वं मलयानिलस्य प्राणहंतृत्वं विज्ञायोपालब्धः संप्रति सर्वानेवोपालभते रिपुरिवेति ॥ अयं सखी
भिः सह सम्यग्वासमवस्थानं रिपुरिव वज्रांकुरिव मम मनो दुनोति संतापयति ॥ किंच ॥ हिमानिलः
स्वभावशीतलोऽपि शिखीवाग्निरिव दुनोति दहति ॥ किंच ॥ सुधारश्मिश्चंद्रोऽपि विषमिव प्राणहर्ता ॥

रिपुरिव सखिसंवासोऽयं शिखीव हिमानिलो विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते ॥ हृदय
मदये तस्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो निकाम निरंकुशः ॥५०॥

नायमेतेषां अपराधः किंतु यस्मिन् श्रीकृष्णे गते दूरं प्रस्थिते सति एतत्तथा विधा जातमिति ॥ एवं त
स्मिन् अदये निर्दये मम हृदयं वेगः बलात् हठात् वलते पुनः पुनः वार्यमाणमपि प्रसरति वलते नापि
निवर्तते इत्यर्थः ॥ तत्र हेतुः ॥ कुवलयदृशां नीलोत्पलमक्षीनां निकामनि निरंकुशः स्वतंत्य अर्थ स्वला
चारी ॥ किंच वामः क्रूरश्च शिखीमयूरः दहने गिरौ स्याद्भूनवारीणि निहलायुधः ॥ ५०॥ ७॥ ७॥ ७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धूर्त्तमलयानिलाः यः शान्तुलेन ज्ञानाः शनैर्नि जनेवाम्भस्त्वेनयान्तौ ॥ या धामिनि ॥ हे मलयानिल त्वं नवा
मोपरमशीतलाऽस्यपूर्णमवाधापीडां विधेहि कुरु ॥ किं ॥ उनस्त्वं विलोक्या ॥ हे पंचबाणः निसंवो
धनं सुकर ॥ हिंसा यमिति हे काम पंचाशः बाणा मम प्राणान् गृहाण ॥ नानेवाह ॥ संमोहनः शोषणश्चदह
नः शोषणस्तथा ॥ उच्चाटने श्च कामस्य बाणाः पंच प्रकीर्त्तिताः ॥ ननु कथं गृहे प्राणनयो सिन स्याह ॥ यथा

वाधांविधेहि मलयानिल पंचबाण प्राणान् गृहाण्पुनरा श्रयिष्ये किल तव तान्
भंगि निक्षमयानरंगे रंगाणि सिंचमम् शाम्यतुदेहदाहः ॥ ५१ ॥ ७ ॥ ७ ॥

पुनर्न यो गृहाण्न श्रयिष्यन यास्यामि ॥ श्रीनंदाल जांवना मलयानिल बाद्यो पि संतापकारकारवेति
भावः ॥ तेभ्यो नी थमधासाह ह्य यावत्तेहं लान भगिनियमुनेतानवृस्यमाण शोल्यः किंभूतस्त्वमभ
गिनीतरंगः कल्लोलैर्ममांगानि सिंचक्षिणत्वात् ॥ सिंचम मेवा यावनर्मिणि ध्वनिः ॥ तेन सिंचनेनममदे
हदाहः विरहाग्निजनितो देहसंबंधी दाहः क्रूरो वा शाम्यतु देहदाहः ॥ सोदुमशक्य अतो मरणं भवत्विल्लो

गी०टी०
८५

सर्गे लेख विराग्निपंकुले ॥ प्रातरित्यादिना सरवेः वचनैः शोनल भमानां श्रीराधां दृष्ट्वा श्रीकृष्णः वजाय
देवापे प्रेरन नान्य इंगितं प्रकटी भृतोनान्यथा कवि अथ प्रत्यक्षा तु भूतमिव वर्णयन् ॥ अयं नंदात्मजो
जगदानंदाया स्तु ॥ कीदृशः ॥ राधा मुख स्मेरणपद्म संतनस्मर सुख बोधि हि मन्दतो कृतिः ॥ किं कृत्वा ॥ श्री

प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंडले ॥
व्रीडाचंचलमंचलं नयनयोराधाय राधानने स्मेरस्मेरमुखोयमस्तु जगदानंदाय नंदात्मजः ॥ ५२ ॥

राधाया श्च कितं विलोक्य दृष्ट्वा ॥ कीदृशं व्रीडया कामोद्भूतया चंचलं चपलं मंचलं वस्त्रप्रदेशं यत्र
॥ व्रीडेनिमा नससंभोगव्यंजकेंगिभावः ॥ पुनश्च किं कृत्वा ॥ नयनयोरंचलमाधाय अंचलेन श्रीरा
धानयनेन वः समाच्छाद्य चलमर्थः ॥ कस्मिन् सति सखीवृंदे हसति सति स्वैरं स्वच्छंदं ॥ किं दृष्ट्वा प्रातः प्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाते अच्युतस्योरोवक्षो॥ नीलनिचोलं निलकं चुकाहृलं संवित पीतं चुकंपरिकलितपीतांबरं च
दृष्ट्वा शंकितान् विलोक्य॥ अथवाराधया सखीनपीतांबरं कृष्णस्य नीलनिचोलं मिलितवस्त्रं विपर्यां
संदृष्टं लियाज्जनो॥ ५१॥ इतिश्रीकृष्णचंद्रसेवकादीच्यावतंस शिवदासात्मजवनमालिभट्ट विरचि
तायां श्रीगीतगोविंदटीकायां वनमालिसंजीविन्यां नागरनारायणो नाम सप्तमः सर्गः॥७॥छ

अष्टमे पादपतितं विलोक्य हृदयेश्वरं॥ उपालंभं करोति राधा प्रेम्णा समब्रवीत्॥ अथशब्दो मं
गलार्थः॥ सा राधा कथमपि कष्टेन यामिनीं निनीय रात्रिं नीत्वा साभ्यसूयं सेर्ष्यं यथा तथा प्रियं श्रीकृष्ण
माह॥ कीदृशी स्मरशरैः कामबाणैर्जर्जरिता विह्वलि॥ कीदृशं प्रियं॥ प्रभाते प्रातः कालेनुनयाय

अथकथमपि यामिनीं निनीय स्मरशरजर्जरितापि सा प्रभाते॥
अनुनयविनयं वदंतमग्रे प्रणतमपि प्रियमाह साभ्यसूयं॥ ५२॥

स्वापराधे क्षमा॥ पनाय विनयं सांजलिं कृतापराध मपि मं क्षमस्वेति पुनरपरवं न करिष्यामि इ
त्यादि वदंतं॥ कीदृशं॥ अग्रे प्रणतमपि पत्र्करेण नतं नम्रं अपि गृहीत चरणमपीत्यर्थः॥ ५२॥ छ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्नरवंडिते येना यिका॥ गल्लु क्षणं उल्लुंघ्य समर्थयत्स्त्वः प्रियो नन्यो भोगवान्॥ भगल्लक्ष्म्यां कितः
भानराग छेत्साहि रवंडिनेति भैरविरागल्लक्षणं॥ सरोवर स्फटिक स्थमंडप सरोरुहेः शंकर मञ्जीयं
ती॥ मालभ्रभेद भ्रतिपन्न गीतागौरी ननुनां गनु भैरवी यमिति॥ गाल्लध्रुवयो ल्लक्षणं पूर्वमेवोक्तं॥ अ

भैर विरागस्य गिताल्हे॥ रज निज निगरुरु जागरराग कषा यित मलस निवेशं॥ वहसि नयन मनुरागमि
वस्फुट मुदितरसाभिनिवेशं॥ याहि माधव याहि केशव मावद कैतव वादं॥ तामनुसर सरसीरुह लोचन
यान वहरति विषादं॥ अपदं॥ १॥
यान
भ्यसूयावचनमेवाह॥ रजनिजनि॥ हरिहरी॥ लिक्षचित्पाठांतरं रवेदे हे माधव मा याया कपट कूपायाः ध
वः स्वामी हे कपट चूडामणे॥ विरहि दुःखदत्वान्माधवे निंदवसंतेति वा॥ याहि नेत्र यथा दिनागच्छ
॥ किंवहकेशव मत्रारूं॥ चितु सुंदर गिरवौम गं प्रियागृहे याहि कोपाव शेन पुनरुक्तिः॥ किं चोपालंभा

नरमाह॥ हे सरसीरुह लोचन कमल नयन यानत विषादं मनस्तापं हरति दूरीकरोति तां प्रियामनुसर
गच्छ कपट वाक्यं मा वद धूर्त वादमेवाह॥ हे श्रीकृष्ण नयने स्फुटं यथा स्यात्तथा नुरागमिव वहसि धारय
सि॥ कीदृशं॥ रजनिज निंदिन गुरुणा गरिष्टेन जागरणस्य रागेण कषायितमातम्रीकृतं॥ कीदृशं॥ अ
लसेनालस्येन निमेषः पक्ष्मवपल यस्य॥ पुनः कीदृशं॥ उदितः कथितः रस स्यान्य नायिका विषय शृं
गार रसस्याभिनिवेशो यस्य तत्॥ अथवा प्रिय विशेषणं॥ कीदृशं प्रियं॥ रजनिजनितो यो गुरुर्जागरो
जागरणं तेन कषायिते ईषद्रक्ते लोचने यस्य तं॥ कीदृशं॥ अलसेन निवेशो यस्य स्वरूपं च यस्य॥ पुनः की
दृशं॥ उदितः प्रकटितः रसेस्य शृंगाररसस्याभिनिवेशो परत्वं लोयन॥ १॥ ८७॥

Dr. Urmila Sharma Collection, Varanasi

पुनः रपि प्रकारांतरेणोपालंभमाह ॥ कज्जलेति ॥ हे कृष्ण तवारुणं रागिनारक्तं दशनस्य वसनम् अधरस्तावो:
शरीरस्यानुरूपं तनोति विस्तारयति ॥ कीदृशं कज्जलेनांजनेन मलिनं यत् श्यामं यद् विलोचनं तस्य चुंबनेन
विरचितः कृतो नीलिमारूपं यस्य ॥ स्वभावमलिनस्य नवमालिन्यकरमिति ध्वनिः ॥२॥ किंच ॥ हे प्रिय तव
वपुः रतिजयलेखं सुरतविजयपत्रम् अनुहरति सदृशीकरोति ॥ कीदृशं ॥ स्मरसंगरे सुरतसंग्रामे खरा याती

कज्जलमलिनविलोचनचुंबनविरचितनीलिमरूपं ॥ दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपं ॥२॥
वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं ॥३॥
चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं ॥ दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारं ॥४॥

तानखानां क्षतैर्जनिता रेखा यत्र ॥ कस्यामिव ॥ मरकतशकलेन नीलमणिखंडेन कलितानि मिलितानि यानि कल
धौतस्य सौवर्णस्य लिपिविन्यासपंक्तिः यस्यास्तस्या इव ॥३॥ किंच ॥ चरणेति ॥ तवेदं हृदयं मदनद्रुमस्य कामवृक्षस्य
हृदयालग्नस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीति उत्प्रेक्ष्यते ॥४॥ कीदृशं ॥ च
रणकमलाद् अन्यस्त्रीपादपद्माद् गलता अलक्तकेन सिक्तं सुसिक्तं ॥ अन्योपि वृक्षः सीत्कृतः सन्न्य

दानीं वैदग्ध्यमवलंब्योपालंभमाह ॥ दशनपदमिति ॥ भवदधरगतं तवाधरे स्थितं दशनपदं ॥ कृष्ण चित्तदलक्षतं मम
चेतसि चित्ते खेदं संतापं जनयति ॥ अन्यस्त्रीकृतदंतव्रणस्तावके वपुषि मां पीडयतीति भावः ॥ ननु आह ॥ त
वाप्यलंहृतमधुना मया सह कथं भेदं कथयसि कथं ॥ एतेन दोषदर्शनेन नायकेन खंडितायाः कथितं ॥५॥ अभेदमु
क्त्वा पुनर्दोषमाह ॥ बहिरिति ॥ हे कृष्ण नूनं निश्चितं तव मनोपि चित्तमपि बहिरिव मलिनतरं मलिनं भविष्यति

दशनपदं भवदधरगतं मम जनयति चेतसि खेदं ॥ कथयति कथमधुनापि मया सह तव वपुरेतदभेदं ॥५॥
बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनं ॥ कथमथ वंचयसे जनमनुगतमसमशरज्वरदूनं ॥६॥

॥ वपुषः श्यामत्वादिति भावः ॥ कथं तत्राह ॥ कथमिति ॥ अथ अन्यस्त्रीमदुग्रं जनमनुगत
मनुरक्तं त्वदेकशरणं लक्ष्मणमिव कथं वंचयसि प्रतारयसि ॥ कीदृशं असमशरज्वरेण दूनं संतप्तं तस्मात्त्वं दुःशील इ
ति भावः ॥६॥

CC0. In Public Domain, Digitizagtion by eGangotri

पुनरपि क्रूरत्वेनोपालंभमाह॥ भ्रमतीति भवान्॥ अबलाजनवधाय युवतीनां प्रसनं धै॥ अबलाजनानुरवायनावने
षु भ्रमति॥ अत्रास्मिन्नर्थे किं चित्रमाश्चर्यं न किमपीत्यर्थः॥ न केवलमनुमाह॥ इत निकटमूलं नेववधूवधदयारहितवा
त्वर्यां अंबालवेष्टितं पृथग्जनिरवापयति॥ न केवलं हननेवान्यारदिलाषि॥ नस्लक्षणोमिद्राक्षायकुलपीडलना
म्नेनैनारीनखवणविक्षेपविशिष्टांग॥ मन्ये सुतोपि गृहमेति भवान् किंतु मे सासा खंडितनिकटस्थितां कविमिः
भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रं॥ प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रं॥ ७॥
श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापं॥ शृणुत सुधामधुरं विबुधा विबुधालयतोपि दुरापं॥ ८॥
पुराणेरितिभरतं॥ बालनलयाकंठनाह बालरुणेन कोमलांगी भासेकिं चित्रमिति भावः॥ ७॥ गीतार्थसुर्दभले
न कथयति श्रीति॥ हे विबुधा॥ हे श्रीकृष्णके ओरस विभाविभावनाचतुराः हे विबुधाः पंडिताः॥ इदं जयदे
वभणितं कथितं रतौ सुरते न वंचिताया खंडितमात्मानं मन्यमाना या युवतिः श्रीराधा तस्या विलापं॥ प्रात
रागमनलक्षणं शिलावलोकनसुरभंगादि मुरिहवनं शृणुत॥ कीदृशं॥ लवलतेमोक्षाद पिब्रह्मानंदा
दपि दुरापं दुःप्राप॥ नेदं सुखं तत्रास्तीति भावः॥ कीदृशं॥ सुधामधुरं अमृतादपि मिष्टं गरिष्टं वा॥ ८॥ ८९

गीतार्थं श्लोकेन संगृह्याह॥ तवेदमिति॥ हे कितव धूर्त लदालोकस्तावदवनतं भरव्या नायुस्तयम मापि श्रवणपथमर
स्यंत्रमालि शब्दस्य भंगेन नानोन शोकाय धृष्टिकि मम्ये निर्वचनीयां लज्जां जनयति॥ बोहत्त्वा मम तवेदर्मीद्दरां
हृदयमन श्वाधरं न प्रियाया पद्मं नाया पादालिनया वक्ष्यनकुरितं मे श्रितं पश्यंत्याः॥ अतएवारुण छायं अरु
तवेदं पश्यंत्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणच्छायहृदयं॥ ममाद्य प्रख्यातः प्र
णयभरभंगेन कितव त्वदालोकः शोकादपि किमपि लज्जां जनयति॥ ५३॥ अंतर्मोहनमौलिधूर्णन
मिलन्मंदारविंसनः स्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां॥ दृप्यद्दानवधूयमानदिविष
दुर्वारदुःखापदां भ्रंसः कंसरिपोर्व्यनयत्वसुबुः श्रेयांसि वंशीरवः॥ ५४॥ इति श्री॰ विलक्षणलक्ष्मीपति
णारक्ता छायादीप्तिर्यस्य ताहृशं॥ उत्प्रेक्षते बहिरिवाद्य प्रसरन्निर्गच्छन्ननुरागमिव रागो यत्र रूपेणानुपर्यन्ते॥ ५३॥ श्लो
केन कविः संगतिमंगमाचरति॥ अंतरिति कंसरिपोः श्रीकृष्णस्य वंशीरवो वो युष्माकं श्रेयांसि कल्याणानि स्य
पोदयतु ददातु॥ कीदृशः॥ कुरंगीदृशां गोपीनां मनमोहनेन नौलिधूर्णनं शिरोधूननं मिलन्मंदारस्य पति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
९०

ज्ञातयुष्यस्मृति ध्वंसनं पातनं यस्मात्सः॥ कीदृशः॥ ध्यानां सौंदर्यादि गुणेर्गर्विष्टानां कामिनस्मात्कर्षणं वशी करणं दृष्टिहर्षणं नेत्रोत्सवं शाकरं तल्वमादि साधनमेवमहामंत्रः यस्य सः॥ कीदृशः॥ हृष्यद्भिर्दृष्ट्युत्कैर्दृत्ये दूयमाना उपेता ध्यमाना दिविषदादेवास्ते पांडुरावारः दुर्वारा दुःखा पदलासांभ्रंशो नाशकः॥ ५२॥ विलक्षण लक्ष्मी। शोभायस्याः सा श्रीराधा तस्याः पतिः श्रीकृष्ण इत्यर्थः॥ इति श्रीमत्सकलवंद्यसेव्यकोदीच्यावतंस श्रीशिवदास लस्कर व नमः सिंभट्टविरचितायां वनमालिसंज्ञी विन्यां श्रीगीतगोविंदटीकायां विलक्षण लक्ष्मीपतिर्नामाष्टमः सर्गः॥ ८॥

निर्व्याजस्नेहसंयुक्ता मोकापिपरमं वनः अनुलमास्वद वरीवा ध्यालुरानवमे भवतु॥ अथेति॥ मंगलमनं तरं वा॥ रहः एकांते तां श्रीराधां सरव्युवा चोक्तवती॥ कीदृशीं॥ मन्मथ खिन्नां कामसंतप्तां॥ कीदृशीं॥ रतिर सभिन्नां सुरत श्रृंगार सेन विदारितां॥ अत एव विषादसंपन्नां उद्वेगयुक्तां॥ कीदृशीं॥ अनुचिंतितध्यानेहरिच रितं कलहं विलासोपचारानां कीदृशी॥ कलहांतरितां प्रीतिकलह नव्यवहितां॥ ५५॥ कलहांतरितेयं॥ पश्चादप
गामथ मन्मथ खिन्नारसिरस भिन्नां विषादसंपन्नां॥ अनुचिंतितहरिचरितां कलहांतरितामुवाच रहः
सखी॥ ५६॥ गुर्जरीरागः रूपकतालः॥ हरिरभिसरति वहति मधुपवने॥ किमपरमधिकसुखं सखि भ
वने॥ माधवेमाकुरु मानिनिमानमयं॥ ध्रुपदं॥ १॥
तितंकालमालनोगुणगर्विता॥ निरस्तनथ्यात पतिकलहांतरितानुरता॥ गुर्जरीरागेरूपकताले॥ रागतालश्च पदलक्षणं पूर्वमेवोक्तं॥ हरिरिति॥ अयं हमानिनि माधवे मधुप्रिये॥ श्रीकृष्ण मानं माकुरु॥ संभोगविलंबनं माकार्षीनित्यर्थः॥ यतो मधुपवन वसंतवायो वहति सति॥ हरिः सकलमनोहरः कामनापहरो वाभिसरति स्वय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधिकसुखमेवत्र पंचयति॥ तालेति हेराधे त्वं कुचकलशं स्तनघटं॥ किमर्थं विफलीकुरुषे निःफलं करोषि॥ = श्रीकृष्णकरसमर्पणाभावादित्यर्थः॥ कीदृशं॥ तालफलादपि तालफलापेक्षया काठिन्यस्थौल्याभ्यां वर्तुलत्वेन चापि गुरुमधिकं॥ कीदृशं॥ अतिसरसमतिरसयुक्तं शृंगाररससहितं वा॥ रतिविरामोपि सरसोत्साहकमित्यर्थः॥ तालफलं भक्षणेन स्वादमिमं त्ववलोकनमात्रेणेति भावः॥ २॥ इदमनिरं साम्प्रतं अनुपदं प्रतिपदं कथितं वा
तालफलादपि गुरुमतिसरसं॥ किमु विफलीकुरुषे कुचकलशं॥ २॥ कतिन कथितमिदमनुपदमचिरं॥
मापरिहर हरिमतिशयरुचिरं॥ ३॥ किमिति विषीदसि रोदिषि विकला॥ विहसति युवतिसभा तव सकला॥ ४॥
रं किं न कथितं॥ हरिं मापरिहर मा त्यज॥ कीदृशं॥ अतिशयेन विरमतं मनोहरं॥ कीदृशं इदं॥ अचिरं विलंबासहं॥ कीदृशं॥ अनुपदं पदे पदे अनुपदमिति वीप्सार्थे अव्ययीभावः। तत इदमनुपदं॥ ३॥ एवं श्रुत्वा अश्रुमुखीमिवाहकिमितीति॥ किमर्थं विषीदसि संतापं प्राप्नोषि॥ विकला विगलत्कला गतकान्तिः विह्वला वा सती रोदिषि॥ सेयं दुःखं रोदनं च तत्र्थमितिसकला सर्वा युवतिसभा तरुणीसमाजस्तव त्वां विहसति॥ विगतकान्तिं त्वामुपहसतीति भावः॥ ४॥

हे सजलेति नलिनीपत्रसहिता निर्जला निर्लेपा शीतला शयने यत्र तत्र यस्मिन् शयनं येन तत्संबुद्धिः॥ अनेन तापाधिक्यं सूचितमिति भावः॥ अथवा हे शायने हरिमागतमवलोकय नयने सफलय सफलीकुरु॥ किमर्थं मानाय हेण विरहसंतापं अनुभवतीति ध्वनिः॥ ५॥ हे राधे त्वं मनसि गुरुखेदं महान्तं किमिति जनयसि उत्पादयसि तस्मान्मम वचनं वक्ष्यमाणं शृणु॥ कीदृशं॥ अनीहिता नाकांक्षिता भेदाः बैरस्यं यत्र॥ यद्वा दिनकरादिगदा
सजलनलिनीदलशीतलशयने॥ हरिमवलोकय सफलय नयने॥ ५॥ जनयसि मनसि किमिति गुरु
खेदं॥ शृणु मम वचनमनीहितभेदं॥ ६॥ हरिरुपयातु वदतु बहुमधुरं॥ ७॥ किमिति करोषि हृदयमति
विधुरं॥ ७॥
वचनमपि नावकल्पयति॥ ६॥ वचनमेवाह॥ हरिरिति॥ हरिर्मनोज्ञ उपयातु तव समीपमागच्छतु॥ किंच॥ मधु बहु
रं मनयानुनयवचनं स्तुतं हृदयं मनो विधुरमति विह्वलं किमिति करोषि मानाग्रहेण॥ तद्यथा सौहृदसारः
सखि वनं दृष्टुं तत्स्य गिरा धःस्पृहया यन्मूर्तिः॥ तस्यां श्वरूपं तत्तमनयानुबंधस्तस्याः भिमानं कथनेनानुमो
नयति॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवेन भणितमनुलक्ष्य हरिचरितं रसिकजनं श्रीराधालक्ष्मणानिभावनाचतुरं सुखयतु आनंदयतु ॥ कीदृशं ॥
अतिललितं शृंगाररसस्निग्धमधुरवाग्विदग्धगुणयुक्तं ॥ शृंगारप्रचुरविदग्धवचन ललितं विलुलितं ॥८॥ गी
तार्थसंग्रहश्लोकेनाह ॥ स्निग्धेत्यादि ॥ हे विपरीतकारिणि विरुद्धविधायिनि तन्नो हे तोस्तव युक्तमेव किं
तत् ॥ श्रीखंडचर्चा चंदनवार्ता पि तव विषमिव गरलमिव दहति ॥ किंच ॥ शीतांशुश्चंद्रस्तपनः सूर्यवत् संताप

श्रीजयदेवभणितमतिललितं ॥ सुखयतु रसिकजनं हरिचरितं ॥८॥ स्निग्धे यत्परुषासि यत्प्रण
मति स्तब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये ॥ युक्तं तद्विपरीत
कारिणि तव श्रीखंडचर्चा विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥५६॥ ७

कोत्मवति ॥ किंच ॥ हिमं शीतलं हुतवहोऽग्निरिव दाहकोऽभवति ॥ किंच ॥ क्रीडामुदः केलिप्रमोदा यातना त्वत्
ब्रवदना यदाः ॥ कुत एतद्विपरीते तस्मिन् प्रियेऽहं प्रणमति नमस्कुर्वति सति यत्त्वं परुषा सिक विनासि
यत्स्तब्धासि ॥ स्निग्धसानुरागे सति ॥ यद्रागिणि सानुरागे प्रिये द्वेषस्थासि असंतुष्टासि यदु
न्मुखे उत्कलिंगनाय सन्मुखे विमुखतां पराङ्मुखतां याता असि ॥५६॥

सर्गांते तद्वृंदस्थाले मंगलमाचरति ॥ सांद्रेति वयं श्रीगोविंदस्य चरणकमलमुत्तमं स्कंदायनमस्कृत्य निबं
धददुरितनाशाय वंदामहे ॥ कीदृशं ॥ स्वच्छं स्वच्छया मकरंदेन सुंदरं च यथा स्यात्तथा गलत्या स्रवंत्या मंदा
किन्या आकाशगंगया मेदुरं स्निग्धं ॥ कीदृशं ॥ सांद्रानंदं निविडानंदाहृदयेऽपि यो तेऽइंद्रादयो दिविषदास्ते

सांद्रानंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संदर्शितेंदिंदिरं स्वच्छंदं मकरंदसुंद
रगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे ॥ इ॰गी॰गो॰ कलहांतरितावर्णने मंदमु
कुंदो नाम नवमः स॰९

यौंदृष्टैः सम्मोहरमंदादरादत्याह रादासमंतात् नम्रैर्नीनियुक्तैः स्नैर्मुकुटेंद्रनीलमणिभिः संदर्शिताइंदिंदिरा
भ्रमरा यत्र तादृशं ॥५७॥ इति श्रीमत्कलानंदसेवकोदीच्यावतंस श्रीशिवदासात्मज वनमालिभट्टविर
चिताया वनमालिसंज्ञिकायां श्रीगीतगोविंदटीकायां कलहांतरितावर्णने मंदमुकुंदो नाम नवमः सर्गः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दशामेलधनिश्वासम्लानबिंबाधरद्युति॥राधासुपेत्यमुपिनाहरिररसुधामुखीं॥११॥ नलकः पद्मांत्य निपुणः
॥स्वदंडस्वसुखमदं॥नृदस्छद्वगो विंदोवहुरूपमकर्णयत सांप्रतं श्रीहृष्णः राधामनुनयन्नाह॥ अत्रेति
अत्रांतरस्मिनवावसरअदोपराचिरवसुमुखींराधामुपेत्य कोपहरस्नापहरोवाहरिः॥ अनंदसंगि
अत्रांतरेमसृणरोषवशामसीमनिःश्वासनिःसहमुखींसमुखीमुपेत्य॥ सव्रीडमीक्षितसखीवदनां
प्रदोषे सानंदगद्गदपदंहरिरित्युवाच॥५८॥ देशवराडीरागेअष्टतालीताले॥ वदसियदि किं
ति चिदपिदंतरुचिकौमुदीहरतिदरतिमिरमतिघोरं॥स्फुरदधररसीधवेतववदनचंद्रमारोचयतिलो
चनचकोरं॥ प्रियेचारुशीलेमुंचमयिमानमनि दानं॥सपदिमदनानलोदहतिममममानसं
मुख देहिमुखकमलमधुपानं॥ध्रुवपदं॥१॥
तानिगद्गदानिरसावरपदंवाचिनिष्यास्यानिधाराणिवक्ष्यमाणमुवाच॥कीदृशींमसृणस्यकर्कशस्यरोष
स्यक्रोधस्यवशामधीनां॥कीदृशीं॥असीमस्यदीर्घस्ययोनिःश्वासस्तेननिःसहविरहदुःखसहनास

मसुखंयस्यस्तां॥कीदृशीं॥सव्रीडंसलज्जितंईक्षितंसखीवदनंयथातां॥५८॥देशवराडीरागेअष्टता
लीताले॥ध्रुपदंरागरूपं॥आरब्धगमनंमुञ्चानिरूपणीयमाननयनयुग्मा॥सुखमयचिजनदेत्यरे
वराडीनेत्तूगेरीति॥लघुद्रुतौलघुश्चैवाष्टतालीप्रकीर्तितेनतालरूपंरूपकंगीतेनाह॥ वदसीति हे प्रि
येवल्लभे॥ किंचिद्यदिवदपिसरोषंप्रसादेवावदसितदातवदंतरुचिकौमुदीदंतद्युतिज्योत्स्नातिघो
रंअतिभीतिदरतिमिरंसाध्वसांधकारंवाहरतिनाशयति॥हरतीत्यनेनमुखंवहास्यप्रार्थितं॥किंचतव
वदनचंद्रमासुखचंद्रःस्फुरदधरसीधवेप्रकाशावहुलाधरामृताय मिलनचकोरंनयनिराश्रयतिनिजपरि
पंकरोति॥अननश्रीराधाधरामृतंप्रार्थितं॥एवंगंभीरामुपेसुत्तावाक्यमाह॥ हे चारुशीले सुंदरस्वभावे
मयिमानमुंचत्य ज॥अनिदानमकारणंअन्ययुवतिभजनकारणरहितंवाचारुशीलत्वाधनेनद्युक्तमितिरुक्त
भिप्रायएकपालमइतिभावः॥कीदृशामयिप्रियेवल्लभेचारुशीलमनोहरस्वभावेतिवा॥मानत्यागेहेतु
माह॥मदनानलःकामाग्निरकालममममानसंदहति॥नाचमानसमयइतिभावः॥अतःसपदिशीघ्रंमुख

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवम प्रसन्नां दृष्ट्वा सानुकूलरसं सुपदेशान्नेवाह॥ सत्यमेवासीति॥ हे सुदति शोभनदशने सत्यमेव यथा
र्थं यदि मयि कोपिनि क्रोधवत्यसि तदा खरनखरशरघातं तीक्ष्णं नखनाराचघातं देहि॥ अनेन नखप्रहार
दानेन सुरतमेव ध्वनितं॥ अयमेव परो दंडः॥ किंच॥ सापराधस्य बंधनमपि तुल्यमेव॥ भुजबंधनमेव घट

सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातं॥
घटय भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं॥२॥७

य कुरु नरद्वयादिना॥ किंच॥ रदखंडनं जनय विरचय॥ एतेन दंडो रागक्षोभः॥ सयथा॥ दयिता बाहुपा
शस्य कुतोयमपरो विधिः॥ जीवयर्पितः कंठे मारयत्यपवर्जितः॥ येनतव सुखसमूहो भवति तद्विधे
हि॥२॥

९६

एवं कृतदंडां प्रत्याह॥ त्वमसीति॥ हे प्रिये त्वं मम जीवनं प्राणोसि त्वां विना मम जीवनमपि दुर्लभमिति भावः॥ त्वं मम
भूषणमलंकारोसि त्वां विना भूषणमप्यभूषणमेवांगभूषणमेव त्वं दृग्॥ एतेनालिंगनविधिः प्रार्थितः॥ किंच॥
भवजलधौ संसारसमुद्रे त्वमेव मम रत्नमसि॥ स्वजन्मरत्नाकरे त्वामेव मया रत्नं लब्धमिति भावः॥ किं बहुक्तेन
यथालक्ष्मीर्हरेः प्रियतमा तथा त्वं महद्रत्नं प्राप्य सुखी भवामीति ॥ इत्युक्त्वा देहजीव
त्वमसि मम जीवनं त्वमसि मम भूषणं त्वमसि मम भवजलधिरत्नं॥ भवतु भवतीह मयि सततम
मम अनुरोधिनि तव हृदयमतिरत्नं॥३॥ नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं कुसु
मशरबाणभावेन यदि रंजयसि कृष्णमिदमेतदनुरूपं॥४॥
नेमयि भवती पूज्या सततं निरंतरमनुरोधिनि अनुकूला भवतु॥ तत्र प्रसादे मम हृदयं मतियत्नमतिशायुय
त्नयुक्तं भवति॥३॥ एवं स्वदंडमुक्त्वा सप्रतिसुरतोत्सवानुकारी लोचनानुरागं वर्णयन्नाह॥ नीलेति॥ हे तन्वि
तवलोचनं नीलनलिनाभं नीलोत्पलसदृशमपि तव लोचनं कोकनदरूपं रक्तकमलसदृशं धारयति॥ मां
प्रतिरोषारुणत्वं धत्ते॥ एतेन सरागावलोकनं प्रार्थितमिति ध्वनिः॥ यदिदं चक्षुः रक्तं श्यामरक्तं वा कुसुम

॥शरस्य कामस्य बाणे भावेन बालस्यावारं
पसि रागयुक्तं करोषि॥ तदेतन्मम चक्षुरनुरूपं योग्यं
भवति॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ स्फुरतित्यादि॥ हेप्रिये मणिमंजरी हारलता कुचकुंभयोरुपरि स्फुरतु तरलत्तु भवतु॥ किंच॥ सा लता
तवहृदयप्रदेशं रंजयतु स्तनमंडलं करोतु॥ एतान् सुरूपायितमवसुरंगत्त्वा थितामेति भावः॥ किंच॥ तवघनज
घनमंडले निविडकटिप्रदेशे रशनाः काच्यपि रसतु शब्दं करोतु॥ शृंगारादिरसस्य दितमन्मथं निदेशं कामाज्ञां
घोषयतु॥ त्वयाजितमिति मत्सराजयं घोषयत्विति ध्वनिः॥ अनेन विपरीतप्रार्थनोपक्रांतोक्ता॥ ५॥ किंच॥
स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु तवहृदयदेशं॥ रसतु रशनापि तवघनजघनमंडले
घोषयतु मन्मथनिदेशं॥ ५॥ स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागं॥ भणम
सृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागं॥ ६॥ स्मरगरलखंडनं मम शिरसि मंडनं
धेहि पदपल्लवमुदारं॥ ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारं॥ ७॥
धतमौनांहे स्वावचनव्यापारं कारयितुं संबोधय॥ नरम्मितापि सा मलयजपवनेन चंदनवायुना न ज्वलतीति
॥ निहे मसृणवाणि स्निग्धवचने भणब्रूहि आज्ञापय वा॥ सरसः सांद्रो गलदलक्तको योगलत् यावकपंको यत्र
तादृशं चरणद्वयं पादयुगलं करवाणि कुर्यां॥ कीदृशं॥ स्थलकमलस्यारुणत्वसुगंधित्वसुकुमारत्वादिगुणैः

स्वकांत्यावागंजनं शोभातिरस्कारकं॥ अतएव मम हृदयरंजनमनुरागप्रदं॥ कीदृशं॥ जनितः उत्पादितः रति
रंगसुरतकौशल्यपरभागः परस्परशोभयेन॥ क्रौंचबंधादौ नह्यदयत्वमालक्तकं सत्परस्परं शोभाप्रदास्य
तीति भावः॥ सयथा॥ क्रौंचवद्यत्र सुरते बाहुपक्षयुगं बुधः॥ संधुनयंती सुरते रमते क्रौंचकस्तस इतिकामस
वेस्वे॥ अनेन चरणग्रहोनुनयः स्तादि तिध्वनिः॥ ६॥ उपक्रांतं चरणप्रसादं प्रार्थयते॥ हेराधे उदारं रतिजनकं
पदपल्लवं चरकिशलयं शिरसि धेहि धारय कीदृशं॥ मम मंडनमलंकरणं मंडनस्यापि मंडनमित्यर्थः॥ कीदृ
शं॥ स्मरगरलखंडनं कामतापनाशनं॥ आवश्यकमेतत्कर्तव्यमिवम पि मदनस्य कामस्य यत्कदनं संतापः
स एवानलोग्निर्ज्वलति संतापयति॥ कीदृशः॥ दारुणः संतापकः॥ अतएव तत्पदपल्लवं तदुपहितविकारं मद
नदत्तोपतापं हरतु॥ चिरं संतापनिवर्तनेन सर्वांगपीडानिवृत्तिरिति वत्॥ मणिरिति पाठे दारुणः प्राणिभ्यो
प्युपसंतापकः॥ पल्लवाच्छादितस्य संतापो न भवतितद्वत्त्वापीति भावः॥ ७॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ फलभूतमर्थमाह॥ इतीति॥ इतीति पूर्वोक्त प्रकारेण मुरवैरिणः॥ श्रीकृष्णस्य राधिकां अधिराधां ल
क्ष्मीवचनजातमपि आधवचनसमूहो जयति उत्कर्षेण वर्तते॥ कीदृशं॥ चटुलं मनोहरं चाटु प्रेमयुक्तं पटु चतु
रं चारु सुकुमारं॥ कीदृशं॥ जयदेवस्य कवेर्भारत्या वाण्या भूषितमलंकृतं॥ कीदृशं॥ मानिनीजनसमूहस्य श्री

इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातं॥ जयतु जयदेवकविभारतीभूषितं
मानिनीजनजनितशांतं॥ ८॥ परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनया क्रांतपरानव
काशिनि॥ विशति वितनोरन्यो धन्यो न को पि ममांतरं प्रणयिनि परीरंभारंभे विधेहि विधेयतां
॥ ६०॥ मुग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपीडनानि॥ चंडि त्वमेव मुदमंच
हि पंचबाणचांडालकांडदलनादसवः प्रयांतु॥ ६१॥ ७॥

राधाख्यस्य वाजिनत्मुत्पादितं शांतं सुखं येन तत्॥ ८॥ प्रसन्नां दृष्ट्वात्मनः संपन्नतां निरूपयति॥ परिहरे
ति॥ हे कृतातंके कृतकामकोपे॥ अन्यवधूजनसंतापशंकां परिहर त्यज॥ यतो मम स्वांते हृदये अंतरं अभ्यं

तरं वितनोः कामादन्यः कोपि धन्यः सौभाग्यः॥ स्त्रीलक्षणेनापि न विशति प्रविशति॥ एतेनान्यनायिकापरिहार उ
क्तः॥ कीदृशे स्वांते॥ त्वया सततं सर्वदा क्रांते व्याप्ते॥ कीदृश्या॥ घनस्तनजघनया॥ घने निबिडे नवकासे कठिने वा
स्तनजघने यस्याः तया॥ पुनः कीदृशे॥ परानवकाशिनि॥ अन्यस्यावकाशशून्ये॥ कीदृशे॥ प्रणयिनि तत्प्रण
यपूर्णे॥ कीदृशे॥ परीरंभारंभे सत्यालिंगनाद्यंगे॥ तां विधेयतां सुरतकर्तव्यतां विधेहि कुरु॥ विधेहीत्यनेन कल्प
कुशलत्वं नायिकायाउक्तं॥ आतंकः कोपः शंका यस्य इति निधरणि॥ ६०॥ यद्यालिंगनेनैन मानवरसं न तत्परिहाराय
ममानुरूपं दंडमाचरेत्याह॥ मुग्धे इति हे मुग्धसुंदरि॥ मयि निर्दयं दयारहितं दंतदंशं दंतेन खंड नं दोर्वल्लिबंधः॥ भु
जलताबंधे घनिबिडगाढस्तनाभ्यां पीडनान्यालिंगनामि च विधेहि कुरु॥ स्वापराधे मयि सर्वदंडाः कर्तव्या मा
ऽशंकां च कार्यः॥ किंच॥ हे चंडि कोपितस्वभावरुरोदृष्टेव॥ ममापराधिनो त्वमेव मुदं अंच आनंदं प्राप्नुहि॥ न
त्वन्यस्या ममानुरागइत्यर्थः॥ नो चेत्संचलाणः पंचबाणः तस्य कांडदलनाद्बाणप्रहरणादसवः प्राणाः प्रयांतु
गच्छंतु॥ अनेन मयि प्रसन्ना भवेति प्रार्थना कृता॥ सुरतारब्द्ध तिमहोदधिः॥ ६१॥ ७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंवहेशशिमुखिचंद्राननेगवभंगुरभ्रूवक्रभ्रूःभातित्वयिभ्रमे।।कीदृशी।।युवजनानांतरुणजनानांसंमोहनायकराल्लाकीपणाःकालसर्पिंशिवाहिवधूः।।अन्याभुजंगीदंशेनजनंविमोहयति।।त्वंतुभ्रूभंगमात्रेणेतिभावः।।किंच।।तदुदितभयभंजना।।तस्याभुवःसकाशाद्दुदितमुत्पन्नंयद्भयंतं जनाचे×स्यफं×नाशायशयूनांतरुणानांमोहयांत्वदधरसीदुत्वयाधरसी।धुर्मदिरासैयसुधामतमेवसिध्मंत्रःसाधितोमंत्रःअभावयुकोवा।।६२।।एवंद्युतमेनानांप्र
शशिमुखितवभातिभंगुरभ्रूर्युवजनमोहकरालकालसर्पी।।१।।तदुदितभयभंजनाययूनांत्वदधरसीधु
सुधैवसिद्धमंत्रः।।६२।।व्यथयतिवृथामौनेनतन्विप्रपंचयपंचमंतरुणिमधुरालापैस्तापंविनोदयदृष्टिभिः
।।सुमुखिविमुखीभावंतावद्विमुंचनमुंचमांस्वयमतिशयस्निग्धेमिप्रियोहमुपस्थितः।।६३।।७।।७
त्याह।।व्यथयतीति।।हेतन्विरुशांगिलवमौनंवृथानिःकारणंव्यथयति।।किंवहेतरुणिकामिनिमधुरालापैःमधुरवचनैःपंचमरागःप्रपंचयविस्तारय।।किंच।।कटाक्षैःकामजंतापसयहशा।।मनवदनेविमुखीभावंदशहष्टलविसंवत्सृज।।सुमुखीसत्वएतद्दुचितमितिभावः।।अतएवमांत्वंमुंच मांसज।।हेमुग्धेसुंदरिमूढेवा।।अहंप्रियःस्वयमचानाहूतउचस्थितःसमागतः।।कीदृशोहं।।अतिशयस्निग्धः।।संपूर्णस्नेहामहावत्सलोवालावम्

संप्रतिमानिनाअंगानिस्पर्शायन्प्रियंब्रूते।।बंधूकेतिहेचंडिकोपनशीलेसुरनोदृष्टेवा।।तवाधरोबंधूकस्यद्युतिःकांतिस्तस्यांबांधवोमित्रसदृशश्चकास्तिशोभते।।किंच।।स्निग्धोचिक्कणोगंडःकपोलश्चकास्ति।।कीदृशः।।मधूकपुष्पवत्पांडुःविर्द्दीप्तिर्यस्य।।तथातवलोचनंनीलनलिनश्रियंनीलोत्पलस्यशोभांमोचयतित्याजयती।तिलकुतास्ति।।
बंधूकद्युतिबांधवोयमधरःस्निग्धोमधूकच्छविर्गंडश्चंडिचकास्तिनीलनलिनश्रीमोचनंलोचनं।।नासाभ्येतितिलप्रसूनपदवीं।कुंदाभदंतिप्रियेप्रायस्त्वंन्मुखसेवयाविजयतेविश्वंसपुष्पायुधः।।६४।।
एतेनलोचनस्यमनोहरत्वमुक्तं।।तथातवनासानासिकातिलप्रसूनपदंविशोभाश्रेणींअभ्येतिप्राप्नोति।।हेकुंदाभदंतिकुंदपुष्पसदृशदशने।।इत्यनेनदंताएवउज्वलामनस्तुत्यानितिध्वनिः।।हेप्रियेवद्धभेसपुष्पायुधःकामःप्रायोबाहुल्येनतवमुखवयाविश्वंजगत्विजयतेवशीकरोति।।पुष्पायुधस्यायुधानितवमुखेवर्त्तंतइतिसेवाकारणमुक्तं।।६४।।७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
९८

किंच॥ तव हे श्रीमदालसे अवलोकनाय मंदयत्ने दृष्ट्वा स्वर्गे त्वं केव मदालसा॥ वदनेन वसुखेंदुमत्या चंद्रस्तु ध्यास्पदं त्वन्मुखदर्शनेन सादृश्याच्चंद्रस्तु येन वर्तीत्यर्थः॥ सा त्वं न क्व॥ स्वर्गे त्वं केंदुमति॥ तव गनिर्गमनं जनस्य मोदश्वास्य वा॥ मनोरमा मनोहारिणी सा बहुविधा॥ स्वर्गे त्वं केव मनोरमा॥ नयोरूद्वयं विधूनरंभ निरस्तं तत्कदली कंकदली।

दृष्टोऽलसमदालसे वदनमिंदुमत्यास्पदं गतिर्न मनोरमा विधूनरंभमूरुद्वयं॥ रतिरल
वकलावती रचितचित्रलेखे भ्रुवावहो विविधयौवनं वहसि नन्विह ध्वीगताः॥ ६५॥

नां बहुत्वात्स्यापि बहुत्वं॥ स्वर्गे त्वं केव रंभेति॥ तव रतिः सुरतक्रीडा कलावती नाना कामकला कौशलयुक्ता॥
स्वर्गे त्वं का कला॥ तव भ्रुवौ रचितचित्रलेखे परिरचितसौंदर्याय चित्रलेखे वहे॥ स्वर्गे त्वं केव चित्रलेखा॥ अहो इत्या
श्चर्ये॥ हे तन्वि सुंदरि॥ पृथ्वीगतासती विविधयौवनं नानायुवतीकदंबभावं वहसि धारयसि॥ ६५॥

९८

सर्गे तिकविराशिषमाशास्ते॥ प्रीतिमिति॥ हरिर्मनोहरलापहरो वा वो युष्माकं गायतां शृण्वतां च प्रीति
मनुरागं तनुतां विस्तारयतु॥ कीदृशः॥ राधापीनपयोधरस्मरणकारी॥ कीदृशः॥ कुवलयापीडकुंभेन
कुंभस्थलेन सार्धं॥ रणे संसर्गवान् संभेदवान्॥ कुवलयापीडकुंभसंसर्गेन राधापीनस्तनस्मरणं हृदित्य

प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे राधापीनपयोधरस्मरणकृत्कुंभ
न संसर्गजोन्॥ यत्र स्विद्यति मीलति क्षणमथ क्षिप्ते द्विपे तत्क्षणात्कंसस्याभ
लमभूज्जितं जितमिति व्यामोहकोलाहलः॥ ६६॥ इ० गी० गो० मुग्धमधुसूदनो नाम
द्वादशमसर्गः॥ १०॥

र्थः॥ कुंभशब्दोऽत्र श्रीराधास्तनस्मारक इति॥ यत्र यस्मिन्रणे हरिः स्विद्यति स्वेदयुक्तो भवति॥ अथानंतरं स
ण क्षणमात्रं केनापि सुखेवादयन्मीलति लोचने मुद्रितं करोति॥ तस्मिन् क्षिप्ते द्विपे क्षिप्ते हस्तिनि तत्स

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतत्कंसस्यात्मनि निश्चयेन असूक्ष्मिनंत्यक्तजी विलासांजितं जितमिति निवेगेन व्यामोहकोलाहलो मरणभ
योत्पन्नज्ञाक्षोभूत॥ पक्षेतुहूाभ्यां श्रीराधारसाभ्यां सुरतरसं पिबतिसदर्पः कामः तस्मिन्नसिंहे जिते दुर्पक
सस्यसुरवक्षु जिनेस्यव्यामोहकोलाहलः परमसुखशब्दः किंकिणीनूपुरध्वनिसंघातस्तन्तः॥ जितंजितमि
तिपरस्परंतयोरभूतः॥ कीदृशोहरिः कुवलयं नीलोत्पलं तस्यापीडोमाला शिरः संवेष्टनं येन॥ संमोद
यतितिपाठः॥ शेषंसमानं॥ कंसोसुरस्मरस्तेन जितेनसुरेणापिवे तिकोपचूडामणिः॥६६॥ इतिश्रीम
त्कृष्णचंद्रसेवकोदीच्यावतंसश्रीशिवदासात्मजवनमालिमद्दविरचितायां वनमालिसंज्ञायां श्रीगी
तगोविंदटीकायां मानिनीमानापनोदनेमुग्धमधुसूदनोनामदशमः सर्गः॥१०॥ ॥ ॥

एकादशेनुनयनः प्रसन्नांसंविभाव्यतां॥ उवाचकाचिद्रजनीमुखेराधांसखीवचः॥१॥ एवंबहुधानुनयप्र
सन्नांराधांप्रतिसख्याह॥ सुचिरमिति॥ कापिसखीप्रदोषेरजनिमुखे स्फुरतिदीप्यमाने सतिराधांजगाद
वाचवक्ष्यमाणमितिशेषः॥ कीदृशी प्रदोषे॥ दृष्टिमोषदर्शननाशके॥ कस्मिन् सति॥ केशवेश्रीकृष्णेसुचि
रंबहुकालमनुनयेनमधुरेणप्रीणयित्वाप्रसादयित्वाकुंजशय्यांतलागृहशयनं गतवतिप्राप्ते सति॥ की

सुचिरमनुनयेन प्रीणयित्वामृगाक्षीं गतवति कृतवेषे केशवे कुंजशय्यां॥ रचित
रुचिरभूषां दृष्टिमोषेप्रदोषे स्फुरति निरवसादां कापि राधां जगाद॥६७॥ ९

दृशे केशवे॥ कृतवेषे॥ कृताभिसारोचितवेषे श्रीराधायां स्वस्मिन्पार्श्वे भोगसंपादनाय कृतालंकरणइत्यर्थः॥
कीदृशीं राधां॥ रचिताकृतारुचिरामनोहराभूषालंकारोयया सा तां कृतसख्युक्तस्यावेति॥ परस्परालंकारकार
णेन परस्परं स्नेहः सूचितः॥ पुनः कीदृशीं॥ निरवसादां निर्गतो मानभंगादिरूपवसादस्तज्ज्ञापनोयस्याः तो

[illegible]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उक्तमर्थं गीतेन प्रपंचयति॥ विरचितेति॥ वसं[illegible]रागेरूपककताले॥ वसंतरागेरूपककताले ध्रुवानां स्वरूपं उ
क्तमेव हे मुग्धसुंदरि राधिके मधुजधरामनसखीसखीवाक्यं माधुर्यसौन्दर्यादिगुणेन मम आगतिं क्षमयतीति म
धुमथनः शृंगाररसास्वादनचतुरं त्वमनुसराभिगच्छ॥ ननु नाहं करिनाकथं ब्रजामीति चेत्तत्राह नहि शृंगार
रसास्वादनचतुरं श्रयंत्या लघुमानभंगः किंतु गेहे [illegible] कीदृशं॥ त्वद्गुणैस्त्वामेवानुगतमनुसर॥ तत्र हेतु

वसंतरागेरूपकताले॥ विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं॥ संप्रति मंजुलवंजुलसीमनि
केलिशयनमनुयातं॥ मुग्धे मधुमथनमनुगतमनुसर राधिके॥ ध्रुवपदं॥१॥ ॥७॥ ॥७॥

माह॥ कीदृशं॥ विरचिता रचिता प्राणेश्वरि प्रसीदेत्यादिचाटुप्रियवचनरचना वचनपरंपरा येन तं॥ अनुगतत्वमे
वाह॥ चरणे त्वच्चरणे रचितः कृतः प्रणिपातः प्रणामो येन तं॥ ननु न याचे मच्चरणे पतनं इदं वदिष्यति॥ पुनः की
दृशं॥ संप्रति इदानीं लांघनि मां संप्रेक्ष्य मंजुलो मनोहरो वंजुलस्तस्य सीमनि मर्यादाविधौ निकुंजे यत्केलिशाय
नं क्रीडार्थशय्या तामनुयातं प्राप्तं॥ अतस्त्वया तत्र गंतव्यमिति मम प्रार्थना॥१॥७

१००

घने निविडे जघनस्तने कटिस्तनप्रदेशे यो भाराधिक्यं तस्यालसंबोधनं॥ श्रीकृष्णार्पणं विना जघनस्तनं के
वलं भारमात्रमिति ध्वनिः॥ अतः श्रीकृष्णं मुखरितं रणत्कारं मणिखचितमंजीरं नूपुरं यथा स्यात्तथा उप
हि समीपं गच्छ॥ किंच॥ दरं ईषत् मंथरं मंदगतिं चरणविहारं पादन्यासं यथा स्यात्तथा मरालो ना राजहंसो नां वि
कारं विलासं विधेहि कुरु॥ एवं राजहंसगत्या प्रियं जहि इत्यर्थः॥ अथवा॥ कीदृशं मधुमथनं॥ दरं त्वत्कोपेन मं

घनजघनस्तनभारभरे दरमंथरचरणविहारं॥ मुखरितमणिमंजीरमुपैहि विधेहि मरालविकारं॥
॥२॥

थरा मंदा आचरणयोर्विहारो गमनं यस्य तं॥ अथवा॥ कीदृशं॥ मुखरिता झंकारणत्कारा मणिमय मंजीरा मेखला
यस्य तं॥ पुनः कीदृशं॥ मरालस्य कामस्य विकारो पीडा यस्य तं॥ कामस्य नामांतरं मराल इति मम मनोरंज
नयनत्तु सर्वेषां॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतदनुगतत्वंअपि स्यतदुद्दीपन विभावानाह॥ शृणिवत्यादिना॥ तरुणीजनमोहनस्यमधुरिपोस्तवविरहेण मधुतरन्यनायिकाधरामृतं मधुर्वसंलापरिपुर्वस्यनस्य श्रीकृष्ण स्यरावंमुरलिरणत्कारं तत्र गत्वा शृणु॥ कीदृशं रमणीयतरं अतिशेन मनोहरं॥ किंच॥ पिकनिकरे कोकिलसमूहे भावं श्रीकृष्णसंभोगानुरागं भज

शृणु रमणीयतरं तरुणीजन मोहनमधुरिपुरावं॥ कुसुमशरासन शासनवंदिनि पिकनिकरे भज भावं॥३॥

॥ श्रीकृष्णे अभिप्रायं विधेहीति भाव॥ कीदृशे॥ कुसुमशासनस्यकामस्य शासनमाज्ञा तस्या वंदिनि स्तावके॥ एतेन पिकगणाः कामाज्ञया वृंदावने स्तवाह्वानं कुर्वन्ति॥३॥

किंच॥ हकरभोरु॥ करनिष्ठांतो मणिबंधपर्यंतः करभस्तस्य बहिर्भागस्तद्वन्निम्नोन्नतसुरु तरुणीजनानां मनोहरत्वेन प्रसिद्धं यो स्तत्संबोधन॥ गतिं गमनं प्रति॥ विलंबं सुंच त्यज यतो लतानिकरलतासमूहः निलेनवायुना तरलश्चंचलोयः किशालयनिकरः पल्लवसमूहस्तद्रूपेण करेण प्रेरणमिच त्वया धनमिव करोति

अनिलतरलकिशलयनिकरेण लतानिकुरुंबं॥ प्रेरणमिव करेः भोरुकरोति गतिं प्रति सुंच विलंबं॥४॥

॥ अनेनाचेतनाय पिवृंदावनगत तरुलताः श्रीकृष्णानुरागोदयेत्वां प्रेरयंति त्वम्यनुरागंच बोधयंति॥ किन ... स्माकं चेतनानां सखीनां चीत्रमिति भाव॥ अतस्तेवमहद्भाग्यमिति ध्वनिः॥ मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः निकरं बकदंबक इत्यपि॥ समूहे निकुरंबं स्यात् जिह्वेपि चेति हलायुधः॥ पिकद्यउद्दीपनविभावः॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ हे प्रिये असुंकुचकुंभं प्रियागमनमंगलकलशं पृच्छ सहचरीं सम्यक् वदतीनं वेति पृच्छ कुरु॥ वर्तुलत्वात्पीनत्वाच्च कुंभ स्तनाभ्यां कुचस्य॥ कीदृशं॥ अनंगस्य कामस्य तरंगवशात् विस्फुरितं सकंपं॥ कामोत्पयोधिस्थानीयः कलशस्तरंगनिपतितः स्फुरतीति भावः॥ कीदृशं॥ सूचितहरिपरिरंभं सूचि

स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं॥ पृच्छ मनोहरहारविमलजलधारममुं कुचकुंभं
॥५॥

तोत्तापितो हरेः श्रीकृष्ण सपरिरंभो आलिंगनं येन तं हरिजलनिधेरेव तत्कुचकलशः पूर्णो भविष्यतीति कलशशब्दग्रहणमिति ध्वनिः॥ पुनः कीदृशं॥ मनोहरो यो हारो मुक्ताहारः स एव विमलोजलधारा यत्र तादृशं॥ एतेन स्तनकलशस्य यौवनरसपरिपूर्णत्वं ध्वनितं॥ कंपः सात्विकभावजः प्रियागमनशंसी॥ नित्यं भार्यास्तनकंपः प्रियसंगमसूचकइति भरतः॥५॥

एवं वचनप्रसन्नामालक्ष्य अतिलज्जितां प्रत्याह॥ अधिगतमिति हे चंडि कोपने सुरतोत्कंठेवा॥ इदं नवं वपुरखिलसखीभिरनिशायेन रतिरणे सुरतसंग्रामे सज्जं रक्तालंकरणादि सन्नद्धं वा अधिगतं ज्ञातं॥ तासां बहुधा विज्ञातं येकाल ज्ञेति भावः॥ कीदृशं वपुः॥ रसिता शब्दायमाना रशना क्षुद्रघंटिका सैव

अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं॥ चंडि रसितरशनारवडिंडिममभिसर सरसमलज्जं॥
॥६॥

ध्वनिर्डिंडिमो वाद्यविशेषो यत्र तादृशं॥ हे लमभिसर शीघ्रं गच्छ॥ कीदृशं॥ सरसं शृंगाररससहितं॥ कीदृशं॥ अलज्जं सुरतनिःशंकं॥ अथवा क्रिया विशेषणं वपुर्विशेषणं च पदत्रयं॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०टी०
१०३
श्री

अभिसरणमेवाह॥ इयमिति करेण सखीमवलंब्य सकेलिलीलाशृंगारवेषशाली सा हि तं प्रत्यागत्य वल्गद
॥ कीदृशेन॥ स्मरशरवेन॥ कामबाणवत्सुभगसुंदरान्नायनं॥ अन्यत्रापि संग्रामे शस्त्राणि भवंत्यत्र लतान्न
खाए वत्यन॥ स्मरसहायैवगछतिनिभावः॥ किंवत्वं गता वलयक्वणितैः कंकणझंकारैः हरिमपि मनोदर मपि
अहमागतास्मीति वोधयन्त्रापय॥ अन्योपि वारः प्रतिभटमवहितं हत्वा सूचयतइति ध्वनिः॥ कीदृशं॥ नि
स्मरसरसुभगनखेनसखीमवलंब्यकरेणसलीलं॥ चलवलयक्वणितैरवबोधयहरिमपिनिजगमनी॥ सा
श्रीराम जय — लं॥१७॥ श्रीजयदेवभणितमधरीकृतहारमुदासितवामं॥ हरिविनिहितमनसामधितिष्ठतु कंठतटीमे
जगत्यानिजगमनेनगंतुमागतुशीलंस्वभावोयस्य॥ अथवानिजेआत्मनिगमितो ज्ञानंयस्य स निजगतिः
कामस्तस्मिन् शीलं चित्तं काम्यसमाधिरित्यर्थः॥१७॥ श्रीजयदेवेन भणितं कृतिनिहितमनसां कृतमनिवि
ष्टचित्तानां अविरामं निरंतरं कंठप्रदेशमधितिष्ठतु समीपे वसतु॥ कर्मण्यधिकरणे द्वितीया॥ एतद्धारणमा
त्रेण कंठशोभा भवतीति भावः॥ कीदृशं॥ अधरीकृतः स्वगुणैर्हीनीकृतो हारो येन॥ पुनः कीदृशं॥ उदासि
ताः स्वगुणैः स्वकृताः वामाः सुंदर्यो येन॥ हरिसुरतवर्णनेन जयदेवभणितं मणिहारादिभ्योवाधिकमिति भावः
॥१८॥ — १०३

एवमनभिगच्छंतीं श्रीकृष्णस्य नटुतकं नि(रू)पयति सा मामित्यादिना हे सखि॥ सा राधा मां द्रक्ष्यति आदरेण द्र
क्ष्यति अतो दृष्ट्वा स्मरकथां मनोहरानंगकेलिवार्तां चित्ते निवेदयिष्यति॥ अनंगालापकृत्वा सत्यं गमनेन अ
वयवं प्रत्यालिंगने श्रीनिःस्नेहं प्राप्य निभृतात्मनि शीलासली मयासह रंस्यते क्रीडिष्यति॥ इत्यनेनप्रकारे
ण चिंताकुलश्चिंतायुक्तः सा प्रियो वल्लभः॥ श्रीकृष्णो निकुंजेलतामंदिरे स्फुरतमः पुंजे निबिडांधकारस
सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकुलः
स तां पश्यति वेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमःपुंजे निकुंजे प्रियः॥१९॥
सा हि तां समागत्य पश्यति॥ तद्दर्शनवेपते कंपते॥ एतेन प्रथमसमागमावस्थामनुभवतीति ध्वनिः॥ त
द्विन्हमाह॥ पुलकयत्यंगं निरवा लिंगनानंदविभावव्यतत्स्मरतासुखेन पुलकांगो भवतीति ध्वनिः॥ किंच॥
सुरतकेलिसंभावानंदति सानंदो भवति॥ किंच॥ सुरतसुखाविर्भावस्विद्यति प्रस्वेदयुक्तो भवति॥ किंच
तामागतां पुरतो विभाव्य प्रत्युद्गच्छति प्रत्युत्थानं करोति॥ किंच॥ तामदृष्ट्वा मूर्छति मोहं प्राप्नोति॥ किंच

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धःत्रयोऽस्य ॥ किं ॥ मूर्तिः श्यामसरोजदामनीलोत्पलमाला ॥ किंच ॥ कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्र
गमनकाले योग्यमंधकारं वर्णयति ॥ अस्योरिति ॥ हेसखि राधे ध्वांतं निविडांधकारं विश्वक् निकुंजे
सर्वतः कुंजलतामंडपे सुदृशां सुंदरीणां प्रत्यंगं अवयवं प्रति आलिंगति ॥ तद् दालिंगनव्याजेना
स्मिन् त्वया गंतव्यमिति भावः ॥ कीदृशं ध्वांतं ॥ अक्ष्णोर्नेत्रयोरंजनं कज्जलं निक्षिपत् विन्यस्यत् ॥ श्र
वणयोः कर्णयोस्तापिच्छगुच्छावलीं तमालस्तबकश्रेणीं निक्षिपत् इति सर्वत्र रचना कीदृशं ध्वांतं ॥ नी

अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छावलिं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरि
कापत्रकं ॥ धूर्तानामभिसारसत्वरहृदां विष्वङ्निकुंजे सखि ध्वांतं नीलनिचोलचारु सुदृ
शां प्रत्यंगमालिंगति ॥ ६९ ॥

लनिचोलचारु नीलवस्त्रचारु मनोहरं ॥ कीदृशीनां सुदृशां धूर्तानां परवंचकानां ॥ पुनः कीदृशीनां ॥
अभिसारसत्वरं शीघ्रं हृद् यासां तासां ॥ धूर्तः स्याद्वंचके लोभे वेतिहारावली ॥ तापिच्छस्तु
तमालतरु ॥ ६९ ॥

आस्तां तावदभिसरणं तत्र प्रणयपरिक्षार्थमेतदुच्यते ॥ कास्मिरे निहराधो एतत् मिश्रमंधकार
तत्प्रेम नाइस्वार रिकाणां प्रेमश्री निस्तुल्क्व ॥ हेमसुवर्णतस्य निकषोपलताघर्षणपाषाणतां तनोति
विस्तारयति ॥ ध्वांतलिंगनं यदीदृशं तर्हि सहृत्लिंगनं कीदृक् भविष्यतीत्यनल्पप्रणयः सूचित

काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमंजरीभिः ॥
एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥ ७० ॥

इति ध्वनिः ॥ कीदृशं ॥ तमालपल्लववन्नीलतमं मम तिश्रं तमिस्रं ध्वांतं कीदृशं तत्प्रेम अभिसारिकाणां स्त्री
णामभितः सर्वतः रुचिमंजरीभिः कांतिकिरणैराबद्धा दत्ता रेखा येन ॥ कीदृशीनां ॥ काश्मीरं कुंकुमं तद्
द्गौरं पीतं वपुर्यासां ॥ एतेन सौंदर्यप्रभाव बाहुल्यं चाभिसारिकाणां सूचितमिति ध्वनिः ॥ नादृशे ध

७०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंवहारावलीति अथानंतरं सखीराधांनिजगाद पुनरप्युवाच॥कीदृशीं॥ निकुंजनिलयस्य चोर
मंदिरस्यद्वारे स्थांगदीप्यां धकारेहरिं निरीक्ष्य व्रीडावनीलज्जावनी॥ कीदृशस्य॥हारावल्योमुक्ता
हारश्रेण्यस्तासांतरलोयोमध्यमणिर्मध्यनायकः॥कांचनस्य सुवर्णस्य कांचिदाममेखलादामम

हारावलीतरलकांचनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य॥द्वारे
निकुंजनिलयस्यहरिंनिरीक्ष्यव्रीडावतीमथसखीप्रियमित्युवाच॥७१॥

जीरंनूपुरं कंकणंकरभूषणं एतेषुस्वविलोथमणयस्तेषां द्युतिःदीप्त्यादीपितस्यप्रकाशितस्य॥
निनीयवापाठः॥ प्रियमित्युवाचेतिपाठः॥व्रीडावतीराधामानीयप्रियंहरिमुवाचेतिवायोज्
नातरलोचंचलोरवड्गहारमध्यमणावपीतिविश्वः॥ निलयश्चोरमंदिर इतिहारावली॥७१॥

वराडीरागमंठतालध्रुवपदःनोलक्षणमुक्तमेव॥श्लोकोक्तंगीतेनाह॥मंजुतरेत्यादिनाहेराधे॥इहास्मि
न्मंजुतरंमनोहरतरंयन्निकुंजतलंलतामध्यंतरदेशस्तदेवकेलिसदनंक्रीडामंदिरंतस्मिन्माधवसमी
पंप्रविशगच्छतत्रविलसविहारंकुरु एतेनविहारातिशयउक्तः॥कीदृशेकेलिमंदिरे॥राधेरःकामो
वराडीरागेमंठताले॥मंजुतरकुंजतलकेलिसदने॥प्रविशराधेमाधवसमीपमिहविलसर
तिरभसहसितवदने॥ध्रुपद॥१॥नवभवदशोकदलशयनसारे॥प्रविशराधेमाधवसमी
पविलसकुचकलशतरलहारे॥२॥
धिस्तद्धिकोयत्रतादृशे॥रतिरभसेनसुरतोत्साहेनहसितंवदनंयस्यास्तत्संबुद्धिः॥कीदृशे॥नवंनूत
नंलसच्छोभमानंयदशोकदलंपत्रंतस्मिन्त्वचितन्निर्मितंशयनंशय्यायांसारोरत्नंयत्रतादृशेसंबोधने
धवसमीपमकरणात्तुराधायाःसमीपमिहकुंजसदनेप्रविशविहरेति सर्वत्रयोजनाज्ञातव्या॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥ कुसुमेति॥ कीदृशे इह कुसुमचयेन पुष्पसमूहेन रचितं नूतनं मुनिशृंगाररसं दे गायवास गृहं यत्र
मंदिरमत्र॥ कीदृशे कुसुमवत्सुकुमारा देहा यस्य॥ सिमृदुतले॥ राधाविशेषणं वा॥ अन्यत्सर्वं पूर्ववत्॥ रः श्री
भोतपादनककंपयुक्तोधकंपनगत्यनकार्थः॥ ३॥ रबमनभिगच्छनीत्याह॥ किंच॥ कीदृशे इह॥ चलः संचा
रीयोमलयपवनस्तेन नुवासुरनसुरभोसुगंधसानचरनमिश्रवासुसुगंधसे विनइत्यर्थः॥ कीदृशे॥ रतो
कुसुमचयरचितशुचिवासगेहे॥ विहरति राधा माधवसमीपमिह विलसत्कुसुमसुकुमारदेहे॥ ३॥
चलमलयपवनसुरभिशीते॥ विहरति राधामाधवसमीपमिह विलसदनुबलितललितगीते॥ ४॥
विततबहुवल्लिनवपल्लवघने॥ विहरति राधामाधवसमीपमिह विलसन्सुचिरमलसपीनजघने॥ ५॥
सुरलोबल्लितस्थलनलिनमनोहरं गीतं यत्र राधा संबोधनंवा॥ ललितं स्फुरणं नानाविधमनोहार्यं स्वभाव
विरबहुकाले विलसेलिसंबधः॥ पुनः कीदृशे इह॥ विनते विस्तीर्णे बहुवल्लीनां नानालतानां नवपल्लवैर्घ
नेनिबिडे॥ अलसेसालसपीनस्थूलेजघनेयस्या ललसंबोधनं॥ शयनविशेषणंवा॥ हेमाधवत्वादिदृ

किं॥ मधुमुदितेति॥ कीदृशे इह मधुनावसंतेन पुष्परसेन वा मुदितानि मधुपकुलानि॥ भ्रमरसमूहास्तैः कलितो विरचि
तो रावः शब्दो यत्र तादृशे॥ पुनः कीदृशे॥ मदनस्य कामस्य यो रसः शृंगारस्तत्र योरभसउत्साहस्तेनोपलक्षितो
भावोभिप्रायो यस्मिन्॥ संबोधनं वा॥ अन्यत्पूर्ववत्॥ ६॥ किंच॥ मधुरेति॥ कीदृशे इह॥ मधुलेशायेनमधुरो
यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दस्तेन मुखरे वाचाले॥ श्रीवृषभानुजा संबोधनं वा॥ दशनादंतः
मधुमुदितमधुपकुलकलितरावे॥ विहरति राधा माधवसमीपमिह विलसन्मदनरसरभसभावे॥ ६॥
मधुरतरपिकनिकरनिनदमुखरे॥ विहरति राधा माधवसमीपमिह विलसद्दशनरुचिरशिखरे॥ ७॥
विरहितपद्मावतीसुखसमाजे॥ कुरु मुरारे मंगलशतानि भणति जयदेवकविराजराजे॥ ८॥
स्तद्वि वितरु चिरं मनोहरं माणिक्यदाडिमीबीजानां लाहदीदलकांतिर्यस्या स्तत्संबोधनं॥ पक्वदाडिमबीजा
माणिक्यशिखरं विदुरितिशाश्वतः॥ ७॥ गीतकालीला मंगलत्वं निरूपयति॥ विहितेति हे राधे॥ जयदेवक
विराजराजकविनृपतेऽपमंगलशतानि भणतिसतिकुरु श्रीकृष्ण भणति निगमनमिति शेषः॥ अथवा॥ हे मुरारे
हे कृष्ण त्वं जयदेवकविराजराज भणति सति॥ अन्येषां पाठकानां च मंगलशतानि

॥ कीदृशे॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमप्यप्रसन्नां पुनः प्रसादयन्नाह ॥ त्वामित्यादिना ॥ हे सखि राधे अन्यप्रमदाजनदुरापोऽप्ययं श्रीकृष्ण
स्तव सुलभः ॥ नवसुधारसेन संबाधं सान्द्रं बिम्बाधरपानं यो नन्दसूनुरिच्छति ॥ कीदृशः ॥ त्वां चित्तेन मन
सा चिरं सर्वदा वहन्नतिश्रान्तो निर्दय श्रममनुगतः ॥ किंच ॥ कंदर्पेण कामाग्निना च भृशमनिशं तापयन्नतापि
तोऽदग्धः ॥ अन्योऽपि भाराक्रान्तो मधुरपानादिना स्वामिन्यां च जीव्यत इति भावः ॥ तत्तस्मादेवमनुरक्तस्या

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः कंदर्पेण च पातुमिच्छति सुधासंबाधबिम्बाधरः
॥ अस्याङ्कं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास इवोपसेवितपदाम्भोजे कुतः संभ्रमः
॥ ७२ ॥

स्य तत्तस्यांकमुत्संगं क्षणं क्षणमात्रमलंकुरु भूषय ॥ बहुवक्तुमयं क्षम इति मत्वेहास्मिन्नुत्संगे कुतः संभ्र
मः संदेहः ॥ तत्र हेतुः ॥ दास इव सेवके ॥ कीदृशे ॥ भ्रूक्षेपः कटाक्षपातो मदीयोऽयमिति विलोकनं तस्य याल
क्ष्मीः शोभा नंदवर्धनं तस्य लव अल्पमेल्पनेत्रकोणेन क्रीते गृहीते ॥ पुनः कीदृशे ॥ नैवेवोपसेवितंपदां १०७

एवमनुनयसंतुष्टा निकुंजं प्रविवेशेत्याह ॥ सेति ॥ सा राधा निवेशनं केलिमंदिरं प्रविवेश ॥ किं कुर्वती ॥ मंजु
मंजीरं मनोहरं नूपुरं सिंजाना तिसात्विकं कंपेन चरणस्खलनं ॥ कीदृशी ॥ गोविंदे लोलं चंचलं लोचनं यस्याः

साससाध्वससानंदं गोविंदे लोललोचना ॥ सिंजाना मंजुमंजीरं प्रविवेश निवे
शनं ॥ ७३ ॥

सा ॥ सिंजानेवाहयंती ससाध्वसं सुरतभयसहितं सानंदं सहितं यथा स्यात्तथा साध्वसहर्षौ व्यभिचा
रिभावे ॥ लोललोचनेनातिरसानुभावः कटाक्षः ॥ एतेन शृंगाररसस्य सांगत्वं योग्यो मिलितोऽसज्जातः ॥
इति निरूपितः ॥ ७३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागतालध्रुवपदानिपूर्ववत्॥ एवंनिकुंजमंदिरंप्रवेश्यतांसप्रतिहरिदर्शनमहोत्सवानाह॥ राधेति॥ सारा
धांहरिंददर्श॥ कीदृशं॥ राधावदनचंद्रविलोकनेनविकशितायेनानाविकारास्तेभंगविभ्रमाद्यास्तएव
विशिष्टोभ्रमोयस्यतं॥ कमिव जलधिमिवसमुद्रमिव॥ कीदृशं॥ जलधिं॥ विधुमंडलदर्शनेनचंद्रमंडल
वलोकनेननूतनलिलाश्चंचलोत्ताला स्तुंगा अत्युच्चास्तरंगा भ्रमयोयस्यतं॥ अत्रागीध शृंगाररसत्वेनजल
वराडीरागरूपकताले॥ राधावदनविलोकनविकसितविविधविकारविभंगं॥ जलनिधिमिवविधु
मंडलदर्शनतरलितसुंगतरंगं॥ हरिमेकरसं चिरमभिलषितविलासं॥ सादद्दर्शगुरुहर्षवशंवदव
दनमनंगविकाशं॥ ध्रुवपदं॥१॥ हारममलतरतारमुरसिदधतंपरिरभ्यविदूरं स्फुटतरफेनकदंब
करंबितमिवयमुनाजलपूरं॥२॥
धिसाम्यं श्रीराधामुखस्यचंद्रसाम्यं॥ तद्भंगमहादीनांतरंगसाम्यंकीदृशं॥ एकः शृंगाराख्योरसोनुरा
गोयस्यतं॥ यद्वाएकस्याराधायां॥ रसोनुरागोयस्य॥ नान्यासुतं॥ कीदृशं॥ चिरंबहुकालमभिलषितोवां
छितोविलासः केलिर्येनतं॥ अथवाचिरमभिलषितः प्रार्थितोविलासोराधासंबंधीक्रीडायेनतं॥ कीदृशं॥

गुरुर्महान्यः प्रियाप्रः स्याहर्षआनंदस्तस्यवशंवदमधीनंवक्त्रंयस्यतं॥ पुनः कीदृशं॥ अनंगविकाशं
काममंदिरं॥ मन्मथकोटिप्रकाशमिलर्थः॥१॥ कीदृशंविदूरंअतिशयेनपरिरभ्यालिंग्योरसिवक्षसि
हारंदधतंबिभ्राणं॥ कीदृशंहारं॥ विमलतरस्तारोतिः॥ विमलोमौक्तिकंयत्रतं॥ किमिवस्फुटतरः प्रकाशः
बहुलोयः॥ फेनकदंबः फेनसमूहः तेनकरंबितंमिश्रितंयमुनाजलपूरं प्रवाहमिव॥ अत्रस्पष्टश्चुतेः
ल्लोललेनयमुनायाः साम्यं॥ हरस्योतिविमलत्वेनफेनसाम्यं॥२॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कीदृशं हरिं ॥ श्यामलं नीलं मृदुलं कोमलं शरीरं मंडलं शरीरस्य मंडलं गयस्य तं ॥ कीदृशं ॥ अधिग
तं परिवृतं प्रयोगसादृश्यात् गौरदुकूलं पीताम्बरं येन ॥ कमिव ॥ पीतपरागाणां गौरपुष्परेणूनां पटलभरः स
मूहा निरन्तरस्तेन वलयितं वेष्टितं मूलं यस्तादृशं नीलकमलमिव ॥ अत्र श्रीकृष्णस्य श्यामत्वेन परागसम्
श्यामलमृदुलकलेवरमंडलमधिगतगौरदुकूलं ॥ नीलनलिनमिव पीतपरागपटलभरवलयितमूलं ॥ ३ ॥
तरलदृगंचलचलनमनोहरवदनजनितरतिरागं ॥ स्फुटकमलोदरखेलितखंजनयुगमिव शरदि तडागं ॥ ४ ॥
वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं ॥ स्मितरुचिरुचिरसमुज्वलिताधरपल्लवकृतरतिलोभं ॥ ५ ॥
हस्य पीतेनांबरेण बहिर्मूले परागवृतत्वात् नीलोपमैव ॥ ३ ॥ कीदृशं हरिं ॥ तरलानां चंचलानां कटाक्षाणां चलने
न मनोहरं यद्वदनं तेन जनितो रतिरागः सुरतानुरागो येन तं मध्ये श्रीराधायाः ॥ एतेन दर्शनसौख्यस्य पराका

ष्ठा दर्शिता ॥ कीदृशं ॥ स्फुटानां विकसितानां कमलानां सुंदरे मध्ये खेलितानां क्रीडायुक्तानां खंजनयुगा
नि चंचरीटपक्षियुगलानि यत्र तादृशं शरदि शरत्काले तडागमिव सरोवरं यथा भवति तथा श्रीकृष्णः श्री
राधादर्शनेन भातीत्यर्थः ॥ अत्र व्रजवृन्दः तडागस्थानीयः श्रीकृष्णः विकसितकमलस्थानीयस्तस्य नेत्र
कमलोदरस्थानीयं नेत्रयोर्मध्यमंगं ॥ खेलितखंजनस्थानीये नेत्रगोलके ॥ चारस्थानीया श्रीराधेति
यथावद्योग्यमुन्नेयं ॥ श्रीराधाशरत्कालागमेन श्रीकृष्णचंद्रस्य विकाशो जात इति ध्वनिः ॥ ४ ॥ कीदृशं हरिं श्रीरा
धावदनकमलस्य परिशीलनेनात्यादरावलोकनेन मीलिते स्थिरीभूते मिहिरसमे सूर्यसदृशे कुंडले यस्य
शोभायुक्तं ॥ तां विना भरणशोभाभावे भारवदिति ध्वनिः ॥ यथा सूर्यदर्शनेन कमलप्रकाशस्तथा श्रीराधा
वदनसूर्यप्रदर्शनेन श्रीकृष्णवदनकमलप्रकाशो जात इति प्रेमपराकाष्ठा दर्शिता ॥ कीदृशं हरिं ॥ स्मितरु
च्या ईषद्धास्यकांत्या रुचिरो मनोहरस्तथा समुल्लसिता राधाधरपानोत्कंपितो योऽधरपल्लवस्तेन कृतो राधा
याः रतिलोभः ॥ सुरतलालसा येन तं ॥ यथा सूर्यमंडले कमलश्रीनिस्तथा श्रीराधामुखे श्रीकृष्णस्य सुरते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीदृशं शशिकिरणैः स्फुरितं कर्बुरितं सुंदरं यस्य जलधरस्य तद्वत् सुंदराः सुकुसुमाः केशा यस्य तं॥ पुष्पा
णां चंद्रकिरणैः साम्यं॥ केशानां बलाहकसाम्येन नायकस्य नायिकादर्शनेनातिशृंगारित्वमुक्तं॥ कीदृशं

शशिकिरणकर्बुरितोदरजलधरसुंदरसुकुसुमकेशं॥ तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनि
वेशं॥६॥

तिमिरे अंधकारे उदितं यद्विधुमंडलं चंद्रबिंबं तद्वन्निर्मलो मलयजतिलकस्य निवेशो रचनाविशे
षो यस्य तं॥ तिलकस्य वर्तुलत्वात् पूर्णचंद्रसाम्यं॥ एतेन नायकस्य तिलकशोभोक्ता॥६॥

पुनः कीदृशं विपुलैर्विस्तीर्णैः पुलकभरैः रोमांचितसमूहैः दंतुरितं व्याप्तं॥ अनेनापि नायकस्य नायिकाद
र्शनेन रोमांचवत्त्वमिति ध्वनिः॥ कीदृशं रतिकेलिकलाभिः सुरतक्रीडायां चुंबनालिंगनादिकामकलाचा
तुरीभिरधीरं चंचलं अथवा रतिकेलिकलाभिरुपलक्षिता श्रीराधा तस्या दर्शनेन। धीरं॥ एतेन नाय

विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं॥
॥७॥

कस्य नायिकादर्शनेनातिव्याकुलता इति ध्वनिः॥ कीदृशं मणिगणानां आभरणखचितरत्नसमूहानां
किरणसमूहैः समुज्ज्वलानि दीप्यमानानि भूषणानि अंगाभरणानि तैः सुभगं सुंदरं शरीरं यस्य तं॥ अथ
वा राधाया मणिगणकिरणसमूहेन समुज्ज्वलभूषणैः सुभगं शरीरं यस्य तं॥ अथवा॥ श्रीराधांगान्येव
मणिगणकिरणसमूहसमुज्ज्वलभूषणैः सुभगं शरीरं यस्य तं॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णभजनं शिक्षयन् सर्वाननुपदिशति॥ श्रीजयदेवेति॥ हे रसिकाः॥ सुचिरं निरन्तरं हरिं संसाधूनां भजनानुसारेण पापतापहरं हृदि विनिधाय हृदये आरोप्य प्रणमत नत एव भजनीयो नान्य इति नमनेनैव नमनमेव सर्वं करिष्यतीत्युपदेशः॥ कीदृशं॥ सुकृतस्य पुण्यस्योदयेन सारं श्रेष्ठं येस्य तं॥ गतावितिधातुः

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं॥ प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं
॥८॥

हरिस्तु भजनसुकृतेन प्राप्यत इति प्रसिद्धिः॥ पुनः कीदृशं॥ श्रीजयदेवभणितस्य गीतस्य विभवेन सामर्थ्येन जयदेवसरस्वत्यास्वगुणवर्णनैर्द्विगुणीकृतो भूषणभारोऽलंकारसमूहो येन॥ जयदेवसरस्वती स्वयमेवोपमालंकारवती भगवद्गुणैश्च सुतरामलंकृतेति भावः॥८॥

संप्रति श्रीराधायाः श्रीकृष्णदर्शनेन हर्षं दर्शयति॥ अतिक्रमेति॥ इदानीं तत्क्षणे प्रियतमसंगमसमालोकनसमये कृष्णावलोकनकाले राधायाः अक्ष्णोर्नेत्रयोर्हर्षाश्रुनिकरः सात्त्विकभावेनानंदजलसमूहः पपात॥ कइव॥ अपांगे नेत्रप्रांतं भागं अतिक्रम्य श्रवणपथस्य कर्णमार्गस्य पर्यंतगमनप्रयासेनेव स्वेदांबुपूर इव

अतिक्रम्यापांगं श्रवणपथपर्यन्तगमनप्रयासेनेवाक्ष्णोस्तरलतरभावं गमितयोः॥ इदानीं राधायाः प्रियतमसमालोकसमये पपात स्वेदांबुप्रसर इव हर्षाश्रुनिकरः
॥७४॥

प्रस्वेदजलप्रसर इव॥ कीदृशयोरक्ष्णोः॥ श्रीकृष्णदर्शनाभिकांक्षयातिशयेन चंचलत्वं प्रापितयोः श्रमः श्रीराधादर्शनार्थं कृष्णस्याप्येतानि चिन्हानि जातानीति ध्वनिः॥७४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः स्तदेवप्रकारांतरेणाह॥भजंत्या इति॥मृगदृशो मृगाक्ष्याः राधायाः॥नत्वांतं ज्ञाय्यांशांतं भजंत्याः प्रा
भुवंत्याः॥ अवहिते सावधाने आलीपरिजने सखीसेवकवर्गे॥ गेहान्तः गृहात् बहिर्यातेसति लज्जा सखीव
दूरमनिरायेन व्यगमत् दनिदूरं मगमत्॥ कीदृशो परिजने॥ स्तोकं पटेन कर्णो दित्कंडूयनेन विहिते स्मिनं हास्यं

भजंत्या स्तलशांतं कृतत्कपटकं कंडूतिपिहितस्मितेयाते गेहाद्बहिरवहितालीपरिजने॥ प्रिया
स्यं पश्यंत्याः स्मरशररसाकूतसुभगं सलज्जा लज्जापि व्यगमद् तिदूरं मृगदृशः॥७५॥

येनतस्मिन् कीदृश्याः॥ सलज्जा लज्जा सहितं यथा तथा प्रियास्यं कृष्णमुखं पश्यंत्याः॥ कीदृशं॥ स्म
रशाररसेन कामोत्पन्नविषयरसेनाकूतं कीडोविलासस्तेन सुभगं सुंदरं॥ आकूतं स्यादभिप्रायो कामक्रीडि
ते ध्वनिनार्धकइतिहलायुधः॥७५॥

सर्गांतेकविराशिषमाशास्ते॥ सुरजितः श्रीकृष्णस्य भुजदंडो जयति सर्वोत्कर्षेण वर्तते॥ कीदृशः॥
प्रकीर्णासृक्बिंदुः लग्नाः असृक्बिंदवो रुधिरकणा यत्र॥ कीदृशस्य॥ भुजापीडस्य बाहुदंडस्य क्रीडा
याहतः कुवलयापीडनामा कंसहस्ती येन तस्य॥ कइव॥ जयश्रीया विजयश्रिया शोभया विन्यस्तैर्नाना
रचनया स्थितैर्मंदारकुसुमैः पारिजातपुष्पैर्महितइव पूजितइव॥ पुनः कइव स्वयमेव सिंदूरेण द्विपस्य

जयश्रीविन्यस्तैर्महितइव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुद्रितइव॥ भुजापीडक्रीडा
हतकुवलयापीडकरिणः प्रकीर्णासृक्बिंदुर्जयति भुजदंडो मुरजितः॥७६॥ इति० अभिसारिकावर्णन
हेलिनः रणे मुदानंदेन मुद्रितइव चिन्हितइव॥ अथवा स्वयमात्मना सिंदूरेण विररसोदयेन दीपेन हास्योश्री
राधाकृष्णाभ्यां शृंगाररसं पिबतो लिहिपः कामस्तेन योरणः सुरतसंग्रामस्तत्र मुदानंदेन मुद्रित इव विचित्रि
तइव॥ प्रकीर्णानि वलयानि विस्तारितानि यादव॥७६॥ इति श्रीमत्कृष्णचंद्रसेवकारी व्यावतस श्री शिवदास
लजवनमालिभट्ट विरचितायां वनमालि संजीविन्यां श्रीगीतगोविंदटी० अभिसारिकावर्णने एकादशः सर्गः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वादशोपाधिनं कांतां राधां संभाष्यकेशवः॥ सुमापल्लवशय्यायामुवाचस्मितमंजुलं॥१॥ गतवती निसर संश्रृंगाररसहितं यथा स्यात्तथा हरिः प्रियां श्रीराधां इत्थं वाचं वक्ष्यमाणमितिशेषः॥ कस्मिन् सति सखीवृंदे लज्जया समं अनुपमं गतवति अपयाते सति॥ कीदृशीं॥ अमंदा अधिका त्रपया लज्जा तस्याः यो भरोतिशय

गतवति सखिवृंदेमंदत्रपाभर निर्भरस्मरशरवशाकूतस्फीतस्मितस्नपिताधरां॥
सरसमसमंदृष्ट्वा मुहुर्नवपल्लवप्रसवशयने निःक्षिप्ताक्षीमुवाच हरिः प्रियां॥७७॥

स्तस्मादेव तेन ये स्मरशराः॥ कामबाणाः स्तद्वशाद्यदाकूतं साभिप्रायो विलासो वा तेन स्फीतं प्रवृद्धं यत्स्मि तमीषद्धास्यं तेन स्नपितो व्याप्तो अधरो यस्यास्तां॥ पुनः कीदृशीं॥ मुहुर्वारंवारं नवपल्लवप्रसवशयने नूतनकिशलयपुष्पशय्यायां निहितनयनां॥ एतेन सुरतेच्छा तस्याः सूचिता॥७७॥

११३

हरिः प्रियामाहेत्यियदुक्तं तदीतिनाह॥ किशलयेति॥ गीतस्यास्य विभासरागः तत्स्वरूपं॥ स्वच्छंदं संमानितलघुष्पचापः प्रियारसखा द्युरसाभिलक्षः॥ पर्यंकमध्ये स्वरतोपवेशो गौरोमता सा विपूर्वैः किलहेसगौरः॥१॥ ना लध्ववयोः स्वरूपमुक्तमेव॥ हे राधिके अधुना मां अनुसर भज॥ कीदृशं॥ क्षणमनुगतं त्वदनुयद्क्षणमनु

विभासरागेण एकतालीताले॥ किशलयशयनतले कुरु कामिनि चरणनलिनविनिवेशं॥ तवपदपल्लववैरिपराभवमिदमनुभवतु सुवेशं॥ क्षणमधुना नारायणमनुगतमनुसर राधिके॥ ध्रुपदं॥१॥ करकमलेन करोमि चरणमहमागमितासि विदूरं॥ क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगति शूरं॥२॥

गामिनं अधीनं वा॥ अथवा नवक्षणमधुना क्षणमधुरेण मदनवसंतेन वा॥ अनुगतं त्वदधीनं॥ पुनः कीदृशं॥ मां॥ नाः पुरुषस्तस्यायं नारः श्रृंगारः स अयनमाश्रयो यस्य तं॥ तस्येदमित्यणन उदिभ्यः ककुत्स्यणादेशः॥ एतेन श्रृंगाराश्रयो नारायण इति सिद्धं॥ अथवा॥ नारा आपः नारा अश्रुजलानि वा अयनमाश्रयो यस्य॥ त्वद्वियोगानलसंतप्तत्वाज्जलेष्वसामि रोदनं करावेति भावः॥ हे कामि मि चरणनलिनस्य प्रवेशं पल्लवतल्पे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुरुप्रवेश॥ इदं तव पद पल्लवं वैरियत्नेनायनं तस्मात् पराभवं तत्॥ क्रांत्यानि तिरस्कार मनुभवतु आप्नोतु॥ की
दृशं सुवेशं सुंदरं॥ पल्लवं रचनादि नालं कृतमपि॥ तव पद पक्षं पल्लवं तल्लं त्वं चरण विन्यासपराजयं आप्नोति
त्यर्थः॥ अनेनान्यनायिका शिरस्सुपदारोपः कृतो भविष्यतीति भावः॥१॥ किंच॥ अहं तव चरणं करकमले
न हस्तकमलेन करोमि संवाहयामि॥ कथमिति चेत्॥ यतस्त्वं विदूरमागमितासि अतिदूरं आगतासि स
ख्या नीतासीति वा॥ अतः क्षणं नूपुरं शयनोपरिशोभायामुपकुरु॥ नूपुरं चरणयोर्निवेशयेत्यर्थः॥ २
मिव॥ २ अनुगतो तवानुसरणे शूरं मामिव नूपुरानुगमन शूरत्व कथनेना जेन तत्पादस्पर्शं प्रार्थयत
इति भावः॥२॥७॥

किंच॥ अमृतमिव जीवनमदं वचनं अनुकूलं सानुरागं रचय कथय॥ कीदृशं॥ वदनमेव सुधानिधिश्चंद्रस्त
स्मात् गलितं च्युतं॥ आलापय मिति वा तत्र हितं उरसि स्थितं दुकूलं पट वस्त्रं विरहमिव वियोगमिवापनयामि
दूरीकरोमि किमिति॥ पयोधररोधकं स्तनाच्छादकं॥ एतेनान्यत्र विरहदुःखं शांतं तु तत्रैवास्तीति ध्वनिः॥

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं॥ विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं॥३॥
प्रियपरिरंभणरभसवलितमिव पुलकितमतिदुरवापं॥ मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापं॥४॥
अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासं॥ त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासं॥५॥

॥३॥ किंच॥ हे प्रिये वल्लभे मदुरसि वक्षसि मम कुचकलशं विनिवेशय अर्पय॥ तदर्पणेन मनसिजस्य काम
स्य तापं संतापं आत्मनो मम च शोषय नाशय॥ तत्स्पर्शमात्रेण कामपीडा निवृत्तिर्भवतीति भावः॥ कथमि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वांछयस्तपरिरंभे आलिंगने सौरभसौरभस्यंतवरोत्कंठा तेन वलितंमिव॥ कीदृशं पुलकितं॥ संजातपु
लकं एतेनर सः पूर्यमाणः पुलकव्याजेन बहिरुद्गतइति धन्यतेपुनः कीदृशं॥ दुरवापमतिदुर्लभंत्वदनु
ग्रहेणैव सुलभमितिध्वनिः॥ कुचकुंभस्य पदं केलि रिंसुनरणायालमिति भावः॥ कामज्वरे शीतलज
लपूर्णकलशालिंगनं विधानव्यमेव॥ यथा॥ कलशाकांक्षाजलभृतभाजनं विरहिणीवदनज्वरशां
तये विरचयेत्तपुनस्तु सरसीजनेनानलिनवंदनपंकजयोजनमिति॥४॥ एवमप्यप्रसन्नां मतिमालइ
वाह॥ हमा विनिधराला भिप्राये अधरसुधारसं अधरामृतउपनयसमर्पय॥ अधरवल्लव स्संयोगं
कुर्वीत्यर्थः॥ विंबाधरामृतंदत्वा दासस्यचरणानुवर्तिनं मांस्तमिवजीवय॥ त्वदधरामृतपानेनैव
ममजीवनं नान्यथेतिभावः॥ किंच॥ तामितविनिहितमनसंत्वध्यानेनदत्तचित्तं॥ किंच विरहानलेन
दग्धवपुषदग्धशरीरं॥ अतएवानिलासंभिलासरहितं॥ एतेनदेहेकजीवनमात्रंकथितं॥५॥

किंवेदृशान्निमुखिचंद्रवदने॥ श्रुतियुगले कर्णयुगे मणिरशनानूपुरंकांचीदामसुखरयवाचालंकार
रयेति इत्यर्थः॥ कीदृशं॥ अनुगुणः सदृशः॥ कंठस्यनिनादः कूजितंयत्रतं॥ किंच॥ श्रुतियुगलेपिकरु
तैः कोकिलशब्दैः विकलेव्याकुलेविरहिणांनध्वनिर्दुःखदएव॥ तदप्यणभावसारं संगादममशमय
नाशयः रशनाकांतिजिरुयापरिमितिमदिनीकरः॥६॥ एवं श्रुत्वाकिंहिलाकलंनीरषं प्रसन्ना भत्याह॥
शशिमुखिमुखरयमणिरशनागुणमनुगुणकंठनिनादं॥ श्रुतियुगलेपिकरुतविकलेममशम
मयविरादवसादं॥६॥ ममाविकलरूपाविकलौहतलेवलोकितुमधुनेदं॥ मीलतिलज्जित
मिवनयनं तवविरमविसृजरतिखेदं॥७॥
मामत्तीतिहेप्रियेइदानींतवेदं नयनं मामवलोकितुं इदंमीलतिमुद्रांधारयति॥ कमिव॥ लज्जितमिव
लाविहितावरणादिति॥ कीदृशं मां॥ अतो विकलरूपः अतिशय निरर्थकक्रोधेनांधकृतौ रूतं प्रियाव
लोकनादिसुखवंचितं॥ नयनविशेषणंवा॥ विरमनिः फलक्रोधात्॥ रतौरसंश्रमंकी डादिन्यंवा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजयदेवभणितं कथितं इदं गीतं रसिकजनेषु पुलकसंभावितानंदः करणेषु मनोरमं विजनकं निरस
भावाः शृंगाररसभावाः संनोरिसा लिखादले स्तोपाय विनोदकौतुकं जनयतु उत्पादयतु॥ कीदृश
मिदं॥ अनुपदध्वनिपदं निगदितोमधुरिपुमोदः स्वस्य हर्षो यत्र तं॥ अथ चैवं संबंधः॥ श्रीजयदेवभणि

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदं॥ जनयतु रसिकजनेषु मनोरमरतिरसभाव
विनोदं॥८॥

तं॥ श्रीयः राधायाः दर्शनेन जयो आनंदो यस्य॥ दीव्यती निक्रीडती तिदेवः स चासौ श्रीलक्ष्मसेनभ
णितं श्रीराधां प्रति मामनुसरेत्यनुनयवाक्यं कथितं॥ कीदृशं अनुपदं निगदितं मधुरिपोः स्वस्य मो
दो हर्षो यत्र॥ तादृशं॥ अन्यत्समानं॥ मुत्प्रीतिः प्रमदो हर्ष इत्यमरः॥८॥

तं च मनुवर्ण्य प्रियं प्रतिकवि सुरतारंभमाह॥ प्रत्यूह इति॥ तयोः राधाकृष्णयोः ससुरतारंभः प्रियं भावु
कः॥ प्रियभवनशीलः परमसुखकर्त्ता॥ उद्भूतः प्रकटो बभूव॥ सः कयस्मिन्निबिडश्लेषगाढालिंगने
कर्त्तव्ये सुरतारंभे पुलकांकुरेण रोमोद्गमेन प्रत्यूहः॥ आलिंगन विघ्नो भूत्॥ किंच॥ यस्मिन्सुरतारंभे सु
प्रत्यूहः पुलकांकुरेण निबिडाश्लेषे निमेषेण च क्रीडाकूतविलोकितेऽधरसुधापाने कथा नर्मभिः
आनंदाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नुद्भूतः सल्लयोर्बभूव सुरतारंभः प्रियंभावु
रतक्रीडायां यदाकूतमभिप्रायपूर्वकमन्योन्यमवलोकितं तस्मिन् निमिषेण पक्ष्मचलनेन प्रत्यूहो भूत्॥
किंच॥ नैतावत्परमेव किंतु॥ सुरतारंभे धरसुधापाने विधेये कथानर्मभिः रहःकथाकौतुकैः प्रत्यूहो भूत्॥ किं
च॥ सुरतारंभे आनंदाधिगमेन आनंदप्राप्त्या मन्मथकलायुद्धकामचतुःषष्टिकलान्वितसंग्रामे प्रत्यूहो
भूत्॥ एतेः सुरते विघ्नबाहुल्यं विपरीतरसस्य दुर्लभतावद्योतितं॥७८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरतमेवविविन्नरसारंभेन दर्शयति॥ दोर्भ्यां मिलितादि दोर्भ्यां बाहुभ्यां सापराधः सा लिंगनेसंयमितो यंत्रि
तः॥ किंच॥ पयोधरभरेण स्तनभरेण स्तनभरेण पीडितः॥ किंच॥ पाणिजैर्नखैराविधः खंडितः दंतैः क्ष
ताधरपुटः व्रणिताधरः श्रोणीतटेन नितंबेनाहतः संमर्दितः॥ किंच॥ कचं केशं धृत्वा हस्तेनानमितो नम्रीभू
तः पदुयोः तलइव॥ किंच॥ अधरमधुस्यंदनअधरामृतद्रवेण संमोहितो विस्मृतान्यरसः कृतः॥ एवं किं
दोर्भ्यां संयमितः पयोधरभरेण पीडितः पाणिजैराविद्धो दंतैः क्षताधरपुटः श्रोणीतटेनाहतः
॥ हस्तेनानमितः कचे धरमधुस्यंदनसंमोहितः कांतः काममपि तृप्तिमापयद्धो कामस्य वामागतिः ९
वितेपि कांतः श्रीकृष्णः काममप्यनिर्वचनीयां तृप्तिमवाप॥ तन्नतोहेतो॥ आहो अपश्चर्ये कामस्य वामावि
रुद्धागतिः स्थितिः॥ अथवा वामयति नानयनी वामा परा भवकारिणी वामा मनः शावा॥ एतेन विपरी
तसुरतेस्पष्टमेवोक्तं॥ वामोनिरुक्तशीलस्यान्कूरे रम्ये विकल्पेतरालिहल्लायुधः॥ नायकमाथिलादंडः

तामेव तिंशिं विशिनष्टि॥ मारांकइति॥ अनया श्रीराधयासाहसप्रायं साहसं बहुकालं कांतं जयायष्ट
स्मं जयं कर्तुं तदुपरि कांतोपरि किंचिल्लोको नरसुरतमिति शेषः॥ रतिकेलिसंकुलारंभारंभेण रतिकेलिभिः सं
श्लेषचुंबनादिभिः संकुले व्याप्तेरणारंभसंग्रामोपक्रमे यन्नूयदा आरंभितदासाहसात् संभ्रमात् जघन

मारांकरतिकेलिसंकुलरणारंभेनयासाहसप्रायं कांतजयाय किंचिन्नदुपरि प्रारंभि यत्नसाहसात्॥ निः
स्पंदा जघनस्थली शिथिलता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति॥ ८०॥
स्थलीनिःस्पंदाति श्वासाश्वासादिति शेषः॥ कीदृक्॥ कामः स्यांकः चिह्नं नखक्षतादि यत्र॥ किंच॥ दोर्वल्लिबाहु
लता शिथिलता श्लथीभूता वक्षोहृदयं उत्कंपितं॥ अक्षि च क्षिमीलितं मुद्रितं॥ आलिंगनायकेनापि रस
विशेषेण सर्वजातमिति भावः॥ एवं कृते स्त्रीणां पौरुषरसः पुरुषरसः पुरुषाभिलाषः॥ कुतः कथं सिद्ध्यति
॥ अपितु न सिध्यंदेवेत्यर्थः॥ सकीर्णे संकुले व्याप्ते रणे याद्व॥ ८०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंपुरुषायितेन स्वजयमलभमाना स्वस्वभावमचलंव्या ... स्मजयं स्तावली॥ नितामेवजयसंपत्तिमाह॥
तस्या इति॥ एभिः पूर्वोक्तैः कामशरैः॥ पत्युर्मनः कीलितंवशीकृतं तदद्भुतमाश्चर्यमभूत्॥ मनसाप्यथम
न्यवधूसागच्छति निर्भावः॥ कीदृशैः॥ आतनिरवातैः॥ आतः आतः काले दशनैर्नयो निरवातैरारोपितैः॥ के
तस्याः पाटलपाणिजांकितमुरो निःशङ्कपायदशनिधोर्णोधर रोणिमा विलुल्लितस्त्रस्तस्रजो मूर्धजा
कांचीदामदरश्लथांचलमितमसुनितनिरवातैर्दशैरभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं॥ ८१॥
कशयेतिलोहिते॥ तस्या अधरशोणिमा अधररागः निर्भेदः पीतः चुंबनोपदेनाग्नि॥ तस्याः मूर्धजाः केशाः
विलुलिताः स्रस्ताः शिथिलिताः स्रजो मालायेभ्यस्तेन स्याः दरइषत् श्लथं शिथिलं अंचलवस्त्रांतं तादृशं
कांचिदाम॥ मेखलागुणनिवीमोचनांतःस्निकामपंचशरत्वेन निरूपितानि॥ अन्यत्र निरवातैर्बाणैरन्यत्र कीलितमिदमित्याश्चर्यमित्यर्थः॥ ८१॥

११८

तेद्वाह॥ व्याकोश इति॥ इयंश्रीराधानंदं मंधितोनिशीस्यति॥ यदपि केशपाशः केशकलापो व्याको
शो विलुलितो जातः॥ अलके घूर्णकुंतले स्तरलिकइतस्ततः प्रसृतं॥ कपोलौ स्वेदं तसात्विकभावजलेन
चंचलौ बिंबाधर श्रीः दष्टा खंडिता॥ कुचकलशरुचा कांत्या हारयष्टिर्हरिकलापः हारिता गिलिता॥ का
व्याकोशः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा बिंबाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः
॥ कांचीकंचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धिनोति॥ ८२॥
नीमेखला कांचित्॥ आशांदिशंगता चलिता॥ तथाविधाजातापि किंकुर्वती॥ हस्तेन स्तनघनपदं स्तन
नितंबभागमाच्छाद्य सद्यः शीघ्रं सत्रपं सलज्जं॥ कीदृशी॥ विलुलितां म्लानां स्रजं धारयंती॥ मज्जया
यत्तप्रयत्नाः स्वचयनेन पराभवइति भावः॥ ८२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंपुरुषायितसुरतविलासंसुक्त्वासुखपानसौभाग्यमाह॥मीलदृष्टीत्यादिधन्यःश्रीकृष्णःकुरंगीदृशः॥
मृगनयनायाःश्रीराधाया आननं मुखंधयतिपिबतिधन्योहमिति सादरंराधाधरामृतंपिबतीतिभावः॥
कीदृश्याःहर्षस्यसुरतानंदस्योत्कर्षेणाधिक्येन विमुक्तासालसा निःसहाश्रांताव्यापाराक्षमातनुर्देहो
यस्याः॥कीदृशः श्यामायाःश्रीराधायायौउत्तुंगौस्तनौतयोरुपरिपरिरिष्वांगीआलिंगनस्यभावः॥एतेन
मीलद्दृष्टिमिलत्कपोलपुलकंशीत्कारधारावशादव्यक्ताकुलकेलिकाकुविकसद्दंतांशुधौताधरं॥
श्वासोत्तुंगपयोधरोपरिपरिष्वंगीकुरंगीदृशोहर्षोत्कर्षविमुक्तनिःसहतनोर्धन्योधयत्याननं॥८३॥
सुरतविरामेपिसुरताल्लिः कथितः कीदृशं आननंकनिवसुरतानंदसुखविशेषेणसुरतश्रमेणवामी
लद्दृष्टिर्मुद्रिताक्षि॥कीदृशं॥मिलतौस्फुरद्रोमांचयोःकपोलयोःपुलकानियत्रतत्॥पुनःकीदृशंसी
त्काराधारास्तेषांअवशःकिरणश्रेणयस्तद्वशादधीनात्अव्यक्ताःअस्फुटाःआकुलाश्रयाकेलयस्ता
कुःस्त्रीणां विकारायःशोकभीत्यादिभिर्ध्वनिरित्यमरः॥८३॥

अथोतिमंगलंअथानंतरंवाराधासुरतश्रमहननमंडनापुनरपिमंडनवांछयामाधवंश्रीकृष्णंजगादोक्तव
ती॥कीदृशी॥स्वाधीनभर्तृका॥पुनःकीदृशीसुग्धासुरतसंग्रामचतुरासुंदरीवा॥कीदृशं कांतं॥मनोहरं॥र
तिश्रांतंहतसुरतश्रमं॥८४॥साराधाइदंवक्ष्यमाणंसुरतांतेआनंदेन सादरं गोविंदंजगादोक्तवती॥कीदृशं

अथकांतंरतिश्रांतंमपिमंडनवांछया॥जगादमाधवंमुग्धाराधास्वाधीनभर्तृका॥८४॥अ
थसहसासुप्रीतंसुरतांतेसा नितांतखिन्नांगी॥राधाजगादसादरमिदमानंदेनगोविंदं॥८५

सहसाइपत्येप्रासाःप्रसवःप्राणस्तैःसुप्रीतंसुतरांप्रीतियुक्तं॥कीदृशी॥नितांतखिन्नांगीस्मरजर्जरितांगी॥
एतेनांगमेवभिन्नंनतुमनइतिपुनःसुरताभिलाषःसूचितः॥८५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागतालध्रुवानांलक्षणंपूर्ववदुक्तमेव॥अन्यस्वाधीनभर्तृकेयंनायिका॥पूर्वंजगादेतियदुनंदनंराधीनेना
हकुर्विति॥साराधायदुनंदनेदाङ्गेनसाभिलाषंजगाददउक्तवती॥कीदृशोक्रीडेतिरमसाःनेहृदयानंदने॥
विनाल्क्रादडनकेक्रिसुक्तवती॥हेयदुनंदननंदनयादवानांहिताथ्वंधृतोगोवर्द्धनामयेति॥अत्रा॥

रामकरीरागेरूपकताले॥कुरुयदुनंदनचंदनशिशिरतरेणकरेणपयोधरे॥मृगमदपत्रकम
त्रमनोभवमंगलकलशसहोदरे॥निजगादसायदुनंदनेक्रीडतिहृदयानंदने॥ध्रुपदं॥१॥

स्मिन्पयोधरेकुचेकरेणमृगमदपत्रकंकस्तूरिकापत्ररचनांकुरुरचय॥करेणेतिपुनःकरस्पर्शाभिलाषः
सूचितः॥कीदृशेनकरेण॥चंदनादपिशिशिरतरेण॥कीदृशेपयोधरेमनोभवस्यमंगलायकलशः
पूर्णकुंभस्तस्यसहोदरेतुल्ये॥१॥

किंचहेप्रियवल्लभ॥लोचनेननेत्रेत्वदधरचुंबनेनलंघितंविगलितंकज्जलमुज्वलयपुनरर्पय॥कीदृशं॥भ्र
मरसमूहमदनपराभवजनकं॥रतिनायकस्यकामस्यसायकान्मोचयतीतिमोचनंकामबाणप्रहारेपि
यद्दीप्यजगद्विजयायकामोबाणंननसंदधातीतिभावः॥२॥किंचापरमप्याह॥हेसुभगेवपरुषिरमूर्ते॥ममस्तु
अलिकुलगंजनसंजनकंरतिनायकसायकमोचने॥त्वदधरचुंबनलंघितकज्जलमुज्वलयप्रि
यलोचने॥२॥नयनकुरंगतरंगविकासनिरासकरे श्रुतिमंडले॥मनसिजपाशविलासधरेशुभ
वेषनिवेशयकुंडले॥३॥

तिमंडलेकर्णप्रदेशेकुंडलेनिवेशयार्प्पय॥कीदृशे॥नयनकुरंगस्यतरंगानाविकारास्यप्रकाशस्यनिरास
करेनिरोधके॥एतेनकर्णांतविशाललोचनत्वमुक्तं॥पुनःकीदृशे॥कामजालस्यक्रीडालुकारकेवपोलंकरणे
केलिभवनेकृत्वायकइतिविजयंती॥लंबितंगलितेनपार्श्वेलंबमानदुराःपयोरितिस्तनकोषः॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

किंचहेप्रियममसुखे अलकंचूर्णकुंतलं परिकर्मयमंडयचुंबनादिना॥ अलकंकीदृशंउपरिसुखेपरिसुचिरं निरंतरंभ्रमरसमूहभ्रमरश्रेणीरागभंजनयंतं॥सजातीयबुध्याभ्रमरास्तत्रपतंतीतिभावः॥पुनःकीदृशं॥रुचिरमंजनकंपरिहासक्रीडाकारकं॥नर्मजनःपरिहाससखीजनःतस्यकंसुखरूपंवा॥कीदृशेविभ्रमरचयंरचयंतसुपरिरुचिरंसुचिरंममसन्मुखे॥जितकमलेविमलेपरिकर्मयनर्मजनकमलकंसुखे॥ ॥४॥
लेनिर्मलेअनेनकलंकाभावःसूचितः॥कीदृशे॥सन्मुखेसुंदरेअनुग्रहाभिमुखेवा॥पुनःकीदृशे॥जितंकमलंयेनतस्मिन्॥हेजितकमलजितमालिनयनकांत्याकमलंयेननतत्संबोधनंवातदाविमलेइःकामस्तेन विमलेप्रसन्ने॥ परिकर्मप्रतिहृतोभूषणेदासकर्मणीतिकोपसवस्ये॥४॥

हेकमलाननलूहन॥अलिकरजनीकरेललाटचंद्रेतिलकंकुरुरचय॥कीदृशं॥कस्तूरीरसेनमितं॥अतएवललितंमनोहरं॥कीदृशं॥विहिताहला॥कलंककलानंदकलंकयोगभासाहृयंयेनलतं॥कीदृशे॥विश्रमितोविश्रामंप्रापितो श्रमरीकरेबुकणायत्रतादृशे॥ललाटमलिकंगोधिरित्यमरः॥मृगनाभिर्मृगमदःकस्तूरीगंधशेखरइतिहारावली॥वलितंनिर्मितंपुलकइतियादवः॥शीकरोंबुकणःस्तइत्यमरः॥रोहिणीत्रोनिशा
मृगमदरसंवलितललितंकुरुतिलकमलिकरजनीकरे॥विहितकलंककलंककमलाननविश्रमित
श्रमरीकरे॥५॥ममरुचिरेचिकुरेकुरुमानदमानसजध्वजचामरेरतिगलितेललितेकुसुमानि त्रि
खंडि शिखंडकडामरे॥६॥
नाथोरजनीकरइतिहलायुधः॥५॥ किंच॥हेमानदमानखंडनमानप्रदायकइतिवा॥ममरुचिरेचिकुरेकेशपाशेकुसुमानिकुरुरचय॥मानसजस्यकामस्यध्वजचामरतुल्ये॥कीदृशे॥रतिगलितेसुरतसमयेवंधनमुक्ते॥श्रृंगारचेष्टयासुंदरेवा॥कीदृशे॥शिखंडिनोमयूरस्यशिखंडिकाश्चंद्रकास्तद्वडामरे आटोपाआडंबरावा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेसुभाशयसुभांतःकरण॥ममसुंदरेजघने नितंबेमणिरशनारत्नखचितक्षुद्रघंटिकावसनाभरणानिवासयप
रिधानंकारय॥कीदृशे॥सरसे शृंगारादिरससहितेघनेनिविडे चक्रमेधारय॥पुनःकीदृशे॥शंबरदारणःका
मःसएववारणःकुंजरस्तस्यकंदरे निवासे॥कुंजरोवारणःकरीत्यमरः॥७॥हेरसिकजनश्रीजयदेववचसिव
चनेदयासहितंहृदयंकुरु॥कीदृशेजयदेवेविश्वजयप्रदे॥कीदृशे॥आलंकारभूषिते॥पुनःकीदृशे॥हरिचरण

सरसघनेजघनेममशंबरदारणवारणकंदरे॥मणिरसनावसनाभरणानिशुभाशयवासयसुंद
रे॥७॥श्रीजयदेववचसि जयदेवहृदयंकुरुमंडने॥हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखं
डने॥८॥

स्मरणामृतेननिर्मितकलिकलुषज्वरखंडनेनाशोयेनतादृशेयद्वाजयदेवेनिपाते॥जयतीतिजयःदीव्यतीति
देवःहेजयदेवहृत्स्थश्रीजयदेववचसिस्वहृदयंसदयंकुरु॥तद्वचोत्सिमंडयेत्यर्थः॥कीदृशामंडनेश्रीराधालंका
रसंपादके॥अन्यत्समानं॥८॥

१२२

गीतोक्तश्लोकेनमेवरनाह॥रचयेति॥हेयदुनंदनममकुचयोःपत्रंपत्रिकारचनांमकरिकांरचय॥किंच॥कपोल
योश्चित्रंचित्राख्यंरचनाविशेषंकुरु॥किंच॥जघनेनितंबेकांचीक्षुद्रघंटिकांघटयपरिधापय॥किंच॥कब
रीभरंकेशसमूहंस्रजापुष्पमालयाअंचसंयोजय॥किंच॥वलयश्रेणींकंकणसमूहंपाणौकलयकुरु॥किं

रचयकुचयोःपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघनेकांचीमंचस्रजाकबरीभरं॥कल
यवलयश्रेणींपाणौपदेकुरुनूपुराविति निगदितःप्रीतःपीतांबरोपितथाकरोत्॥९७॥

च॥पदेचरणयोर्नूपुरौकुरु॥इत्येवमुक्तोश्रीराधयाप्रीतःसंतुष्टःपीतांबरःश्रीकृष्णोपितथैवाकरोत्॥एते
नस्वाधीनभर्तृकत्वमुक्तं॥९७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किंच॥यद्गांधर्वकलासुगानविधौकुशलत्वं तैः पुण्यं प्राक्तव्यं॥गंधर्वमार्गदर्शविदः॥कस्मात्त्यां भेदविल
सास्य इत्येवं विज्ञेरनुध्यानं अनुध्यानं चिंतनं॥यश्च शृंगारस्य शृंगाररसस्य विवेकः संभोगादिविधान
कौशलं तेस्य त्वं यथा वदन्तानं॥किंच॥यत्काव्येषु कविरचनासुलीलयिलं क्रीडाविलासस्य चीस्वं तत्सर्वमन्य
दपि च सुधियः जयदेवपंडितकवेः॥पंडासहस्रं हि विवेकबुद्धिः कादर्दवलाप्रसादलब्धाक वित्वं तस्य श्रीगीतगो
यद्गांधर्वकलासुकौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्त्वमपि यत्काव्येषु लीलायि
तं तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतु सुधियः श्रीगीतगोविंदतः॥८८॥
विंदतः श्रीगीतगोविंदग्रंथात्परिशोधयंतु विवेकेन विचारयंतु जानंतित्यर्थः॥कीदृशाः सुधियः सानंदाः आ
नंदसहिताः॥कीदृशस्य कवेः कृष्णैकतानात्मनः कृष्णे हरौ एकतानं तदाकारं आत्मा मनो यस्य तस्य॥अथवा
कृष्णस्यैकतानो मुख्य आत्मा मनो यस्यां श्रीराधायां इत्यनेन श्रीराधाकृष्णोपासकत्वमुक्तं॥एकतानोनन्यवृ

सर्गतिकोचरा शिष्यमात्रास्तेपर्य मितिहरिर्वो युष्मान् रक्षतु॥कीदृशः॥कायव्यूहं बहुशरीरमिवाचरन्नुपवि
तः कृष्णिगतः आकूलः क्रीडाविशेषो यस्य सः॥कीदृशः॥अक्ष्णां नेत्रैः सहस्रैः पादांभोरुहं ध्वजरणकमलं
धारयति धारिणि यावरिधिसुतालक्ष्मी तां दिदृक्षुः द्रष्टुमिच्छुः॥लक्ष्मीदर्शने तु नेत्रयुग्मेन न संभवतीति का
यव्यूहं नेत्रसहस्रं स्वात्स्वव्येति भावः॥किंभूतं तु॥पर्यंकीकृतः शय्यास्थानेकृतो योनागनायकः॥शेषस्तस्य
पर्यंकीकृतनागनायकफणाश्रेणीमणीनां गणे संक्रांतप्रतिबिंबसंवलनया विभ्रद्वपुर्विक्रियां
पादांभोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः कायव्यूहमिवाचरन्नुपचितो कूतो हरिः पातु वः॥८९
णाश्रेणीनां पंक्तीनां ये मणयस्तेषां गणे समूहे संक्रांतप्रतिबिंब संवलनया तद्वशप्रतिबिंबप्रसरणेन वपुर्विक्रि
यांविकृतरूपाकारं विभ्रद्धृतमणीनां मानेनत्वात्रेनदहतःमेनताहृक् नेत्रलाभो भूदित्यर्थः॥पक्षे वारिधिसुता
वारिधितुल्यगुणः वृषभानुस्तत्सुता श्रीराधा तदर्शनेन कैनयपुष्पकुर्वाणो पितोपमूलभमानः कायव्यूहमिवा
चरन्निति तुल्यं॥अस्मिन्पक्षे नागनायकेन नागासनं॥तल्पनिशामार्थं निहिताये मगिगणास्ता दिव्यास्त्वेव॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कविरंत्येपद्यसमाप्तावाशिषमाहाः त्वामिति॥ हरिर्वः पातु हे सुंदरि॥ मृडानीपतिः॥ रुद्रः क्षीरोदतीरे क्षी
स रसमुद्रतटे त्वामप्राप्य कालकूटं विषमपिबदिति शंके॥ इत्थमनेनप्रकारेण पूर्वकथाभिरन्यमनसान्यमनस्कया विक्षिप्य
लस्तनांचलं करं विक्षिप्य प्रसार्य राधायाः स्तनकोरकोपरि कुचमुकुलोपरि तदुपरि मिलन्नेत्रः॥ कीदृशीं त्वां॥ मयि स्व

पि त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे शंके सुंदरि कालकूटमपिबन्मूढो मृडानीपतिः॥ इत्थं
पूर्वकथाभिरन्यमनसा विक्षिप्य वक्षोंचलं राधायाः स्तनकोरकोपरि मिलन्नेत्रो हरिः पातु वः॥९०॥ ल

यंवरपरां॥ अनेन किशोरलीलाविलासित्वं ध्वनितं॥९०॥

इदानीं कविरात्मनः काव्यस्य माधुर्यादिगुणत्वं कथयति॥ साध्वीति हे माध्वीक मद्य भवतस्तवेयं मधुराह
मिति चिंता साध्वी न भवति॥ एतत् सहृद्यं भवामीति चिंतैव न कार्या॥ किंच॥ हे शर्करे त्वं च कर्कशासि॥ कर्क
श्येन रूक्षा रूपासीत्यर्थः॥ किंच॥ हे द्राक्षे त्वां के द्रक्ष्यंति आस्वादयिष्यंति अवलोकयिष्यंतीति वा किंच॥ हे अ
मृत त्वयापि माधुर्यमादकारुण्यादि शायेन गर्वो न धार्यः॥ तदपेक्षया त्वं मृतमसि हे क्षीर तेन वरसः नीरं ज

साध्वी माध्वीक चिंता न भवति भवतः शर्करे कर्कशासि द्राक्षे द्रक्ष्यंति के त्वाममृत मृतमसि ×मृत× क्षीर नीरं रसस्ते॥
माकंद क्रंद कांताधर धरणितलं गच्छ यच्छंति यावत् शृंगारभावं सारस्वतमिह जयदेवस्य विष्वग्वचांसि॥९१॥

लवत् मधुरं॥ हे माकंद पक्वफलस्वरूप आम्र क्रंद विलप॥ किंच॥ हे कांताधर त्वं पाताललं गच्छ॥ जयदेवस्य विष्वक् साम
स्त्येन वचांसि यावत् शृंगारं भावं श्रीराधाकृष्णविषयं यच्छंति यावत् ज्ञुष्माभिर्नस्थेयं॥ कीदृशानि सारस्वता
नि सरस्वतीरसमूलानि॥ जयदेवभणितामृतेन सर्वे पदार्था निरासकाइति भावः॥९१॥ ×सारस्वतं×

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीभोजदेवप्रभवस्य रामादेवीसुतस्य श्रीजयदेवकस्य पराशरादि प्रियवर्गकंठे श्रीगीतगोविंदकवि
तास्तुनो विदुषां येऽप्यत्र पिअविद्   ग्राम पिनद्योग्यता माह ॥ साधुना मिति ॥ इह वनमालिसंज्ञी विन्यां श्री
गीतगोविंदटीकायां भक्त्यर्थिनां साधुनां भक्तानां संमतिः स्वीकारः स्यत एव स्यात् विदुषामपि नाश्रंगार ना

साधूनां स्वत एव संमतिरिह स्यादेव भक्त्यर्थिनामाल्लोच्य ग्रथनश्रमं च विदुषामस्मिन्न भ
वेदादरः ॥ ये के विसरन्त्यपश्रुतिपरास्तान् अर्थये मत्कृतिं भूयो वीक्ष्य वदंत्ववद्यमिह चेत् तत्साव
सनास्थास्यति ॥ १२ ॥ ॥ ३ ॥ श्रीगीतगोविंदे सुप्रीतपीतांबरो नाम द्वादशः सर्गः ॥ १२ ॥

रसग्रथनश्रमं विचारयत्स्वादरो भवेदेव ॥ केवलभक्तिपांडित्यहीना विरलाः परग्रंथनिंदापरास्तान् अर्थयेयावे
॥ किं वा मत्कृतिं भूयो वारं वारं वीक्ष्य इह टीकायामवद्यं वदंतु चोक्ता श्रमे तु ज्ञाने तु परनिंदेच्छावासनास्थास्य
ति चेत् ॥ भक्तिमार्गपरिशीलनेन कुतः सा दुर्वासनेति भावः ॥ टीकासप्तकमालोक्य सारे सारं समुद्धृतं ॥ त   १२५

अपि स्खलितं किंचित् संतुमर्हंतु सूरयः ॥ १ ॥ शिवदासतनुजेन भट्टेन वनमालिना ॥ गीतगोविंदटीके
यं रचिता शुभदास्तु वः ॥ २ ॥ वेदोखरस पक्षस्ये काद्द्यां शुभमंगले ॥ वाराणस्यां रचिता टीका । भट्टेन व
नमालिना ॥ ३ ॥ काश्यां नरोत्तम महेमध्यमा धवसदयोः ॥ रचिता गीतगोविंदटीका श्रीवनमालिना ॥ ४ ॥
कलिंदजातीविहारशीलं गोपांगनानां नयनाभिरामं ॥ वंशीरवैर्मोहितमारकोटिं वंदे सदा तं वृषभानुजा
रतं ॥ ५ ॥ ॥ ३ श्रीमत्सुरुचंद्रसेवकौदीच्यावतंस श्रीशिवदासात्मज श्रीवनमालिभट्टविरचितायां
वनमालिसंज्ञीविन्यां श्रीगीतगोविंदटीकायां सुप्रीतपीतांबरो नाम द्वादशः सर्गः ॥ १२ ॥ श्लोकसंख्या ॥
॥ श्रीसद्गुरुनाथार्पणमस्तु ॥ ॥   ३४५

Dr. Urmila Sharma Collection, Varanasi